संस्कृतविद्या

(शोधपत्रिका)

प्रधानसम्पादकः

प्रो. एन्. आर्. श्रीनिवासन्

सङ्कायप्रमुखः

प्रकाशकः

संस्कृतविद्याधर्मविज्ञानसङ्कायः

काशीहिन्दूविश्वविद्यालयः

वाराणसी-५

संस्कृतविद्या

(शोधपत्रिका)

प्रधानसम्पादकः

प्रो. एन्. आर्. श्रीनिवासन्

सङ्कायप्रमुखः

मीमांसाधर्मशास्त्रविभागाध्यक्षश्च

प्रकाशकः

संस्कृतविद्याधर्मविज्ञानसङ्कायः

काशीहिन्दूविश्वविद्यालयः

वाराणसी-५

वि०सं०-२०५८ ई० २००१

संरक्षकः प्रो. पी. रामचन्द्रराव:
कुलपतिः
काशीहिन्दूविश्वविद्यालयस्य

पत्रिकाप्रकाशनसमितिः प्रो. बालशास्त्री (अध्यक्षः) प्रो. चन्द्रमौलिद्विवेदी (सदस्यः)

सम्पादकमण्डलम्
प्रो. रामचन्द्रपाण्डेयः प्रो. रमेशचन्द्रपण्डाः
प्रो. आञ्जनेयशास्त्री प्रो. चन्द्रमौलिद्विवेदी
डॉ. कमलेशझाः डॉ. हृदयरञ्जनशर्मा
डॉ. कमलेशकुमारजैनः

सहयोगिनः
प्रो. सुधांशुशेखरशास्त्री प्रो. व्यासमिश्रः
प्रो. कृष्णकान्तशर्मा डॉ. चन्द्रभानुशर्मा भारद्वाजः
डॉ. सूर्यप्रकाशव्यासः डॉ. अमलशास्त्री
डॉ. कैलाशचन्द्रदवे डॉ. कौशलेन्द्रपाण्डेयः
डॉ. श्रीनिवासतिवारी डॉ. उपेन्द्रपाण्डेयः
डॉ. चन्द्रमापाण्डेयः डॉ. जगदीशचतुर्वेदी
डॉ. रामचन्द्रपाठकः डॉ. कामेश्वर उपाध्यायः
डॉ. सत्येन्द्रकुमारमिश्रः डॉ. वीरेन्द्रकुमारमिश्रः

मुद्रकः
श्रीमाता कम्प्यूसिस प्रा.लि.
हनुमानघाट, वाराणसी– १
दूरभाष – 2275272

श्रीः

प्रस्तावना

अथैषमः अस्य सङ्घायस्य 'संस्कृतविद्या'नाम्नी वार्षिकी शोधपत्रिका विद्वद्भ्यः समुपह्रियते । अखिलोऽपि हि संसारः स्वेष्टमाप्तुं कामयते, अनिष्टं च निवर्तयितुम् । सर्वस्यापि परममिष्टं सुखमेव, अन्यस्य समस्यापीष्यमाणस्य सुखेच्छानिबन्धनेच्छाविषयत्वात् । परमञ्चानिष्टं (द्वेष्यं) दुःखमेव, अन्यस्य द्वेष्यस्य दुःखद्वेषनिमित्तकद्वेषविषयत्वात् । सुखदुःखे ऐहिकामुष्मिकभेदेन द्विविधे अपि अस्मत्कर्मफलभूते एव । अतोऽस्माभिस्सुखसम्पत्तये दुःखनिवृत्तये च यज्ञादिकर्माण्यनुष्ठेयानि । कर्मसु दीयमानेन हविषा आप्तप्रीतयो देवा अस्मभ्यं फलं ददतीति देवमनुष्यौ परस्परभावनेनैव जीवतः । यथोक्तं तैत्तिरीये- "तस्मादितः प्रदानं देवा उपजीवन्ति, तस्मादमुतः प्रदानं मनुष्या उपजीवन्ती"ति ।

गीतायाञ्च -

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।। इति ।।

अतः सुखप्राप्तिदुःखनिवृत्तिसाधनदेवप्रीतिः यज्ञादिकर्मद्वारेणैव सम्भवति ।

कर्मान्तर्गताश्च यज्ञाः द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयस्संशितव्रताः ।। इति ।।

बहुविधाः दृढसङ्कल्पेषु यतनशीलेषु वृत्तित्वेन प्रोक्ताः । तदन्यतमः स्वाध्यायज्ञानयज्ञो वेदतदर्थज्ञानात्मको नैव शास्त्रविचारमन्तरा सम्भवतीति वेदतदर्थज्ञानसाधन-व्याकरणाद्यङ्ग-तर्क-स्मृति-मीमांसादिशास्त्र-विचारपरिपूर्णेयं शोधपत्रिका स्वाध्यायज्ञानयज्ञानां मध्येऽत्यन्तहर्षपूर्वकं प्रकाश्यते ।

अत्र प्राचीनैः विद्वद्वरैः श्रीनिवासाचार्यैः महामहोपाध्यायतिरुप्पुट्कुळिश्रीकृष्णताताचार्यैश्च रचितं प्रधानप्रतितन्त्रदर्पणं विशेषलक्षणविमर्शं च प्रकाशयन्नात्मानं धन्यं मन्ये ।

एवमस्मत्प्रार्थनया स्वीयसारपूर्णलघुग्रन्थमत्र प्रकाशनाय प्रेष्यानुगृहीतवद्भ्यो महायशस्केभ्यः तिरुपतिविद्यापीठकुलपतिचरेभ्यः प्रो. एन्.एस्. रामानुजताताचार्येभ्यः प्रणामान्निवेदयामि ।

तत्तच्छास्त्रीयविचारगर्भितान् शोधलेखान् प्रदायोपकृतवद्भ्यो महामहोपाध्यायाचार्यरेवाप्रसादद्विवेदि-महोदयप्रभृतिभ्यो विद्वद्भ्यो धन्यवादान् ज्ञापयामि ।

एतत्प्रकाशने यथापेक्षमुपकृतवद्भ्यः सहृदयेभ्यः प्रो. बालशास्त्रिमहोदयेभ्यः, टङ्कणव्यवस्थादि-विविधसहकारैः पत्रिकायाः सुष्ठुस्वरूपसम्पादनाय कृतश्रमेभ्यः सुहृद्वरेभ्यः प्रो. चन्द्रमौलिद्विवेदि-महाशयेभ्यश्च विशिष्य कार्तज्ञ्यं प्रकटयामि -

एन्. आर्. श्रीनिवासन्
सङ्घायप्रमुखः

वसन्तपञ्चम्यां, २०५९ वैक्रमाब्दे

विषयसूची

विषयाः .... लेखकाः .... पृष्ठाङ्काः

१. विशेषलक्षणविमर्शः .... महामहोपाध्यायतिरुप्पुट्कुळिश्रीकृष्णताताचार्याः १
(सम्पादकः-प्रो. एन्.आर्, श्रीनिवासन्)

२. प्रधानप्रतितन्त्रदर्पणम् .... विद्वद्वरश्रीनिवासाचार्याः १५
(सम्पादकः-डॉ. एन्.आर्, शठकोपताताचार्यः)

३. शाब्दापरोक्षपरिशीलनम् .... महामहोपाध्याय-प्रो. एन्.एस्. रामानुजताताचार्यः ३७

४. काव्यनिष्पत्तिप्रक्रिया .... महामहोपाध्याय - प्रो. रेवाप्रसादद्विवेदी ५७

५. अर्थवादप्रामाण्यम् .... प्रो. एन्.आर्. श्रीनिवासन् ६१

६. लोपार्थविमर्शः .... प्रो. बालशास्त्री ६५

७. साहित्यप्रस्तावेशब्दनिरूपणम् .... प्रो. चन्द्रमौलिद्विवेदी ७०

८. काव्यदोषाणांमूलंशब्दशास्त्रम् .... पण्डितवायुनन्दनपाण्डेयः ७९

९. शब्दस्य प्रामाण्यं स्वरूपञ्च .... डॉ. चन्द्रभानुशर्मा भारद्वाजः ८३

१०. वेदे मनुष्योत्पत्तिगतं विज्ञानम् ...... डॉ. हृदयरञ्जनशर्मा ८९

११. वेदे जगत्कारणविमर्शः .... डॉ. कैलाशचन्द्रदवे ९२

१२. निरुक्तोक्तदेवताप्रकारपरिशीलनम् .. डॉ. रामानुज उपाध्यायः ९४

१३. स्वात्ममहेश्वरसपर्या .... डॉ. कमलेशझाः ९७

१४. निगमागमस्वरूपविमर्शः .... पं. व्रजवल्लभद्विवेदी ९८

१५. सांख्यसिद्धान्ते शब्दस्य प्रामाण्यं
तत्स्वरूपञ्च .... डॉ. अमलधारी सिंहः ११०

१६. द्वितीयार्थे व्याकरणमीमांसयो-
स्तुलना .... डॉ. एन्.आर्. रङ्गनाथताताचार्यः ११२

१७. रषाभ्यां नो णः समानपद-
इतिसूत्रार्थविचारः .... श्री एस्. वेङ्कटेशताताचार्यः ११९

१८. सांख्ये प्रमाणं तत्स्वरूपञ्च .... डॉ. शशिकान्तद्विवेदी १३१

१९. कालिदासस्य साहित्ये
शिवस्वरूपम् .... डॉ. शशिशेखरचतुर्वेदी १३८

२०. वैष्णवागम में शक्ति का स्वरूप ... डॉ. शीतलाप्रसादपाण्डेयः १४२

२१. प्राकृतोत्पातविचार .... श्री सुरेन्द्र - पाण्डेयः १५१

विशेषलक्षणविमर्श-

भूमिका

प्रो. एन्. आर्. श्रीनिवासन्
संस्कृतसङ्कायाध्यक्षः, का.हि.वि.वि.

भगवता महर्षिणा कणादेन शास्त्रान्तरविलक्षणतया विशेषाख्यः पदार्थः साधितः, येन तदीयं तन्त्रं वैशेषिकतन्त्रत्वेन प्रसिद्धिमाप । एतादृशस्य विशेषपदार्थस्य लक्षणम्, 'अन्त्यो नित्यद्रव्य-वृत्तिर्विशेषः परिकीर्तितः' इति कारिकांशप्रोक्तं, तद्व्याख्यायां मुक्तावल्यां 'सतु स्वत एव व्यावृत्त' इति व्याख्यातं विवृण्वन्तो महादेवभट्टा अब्रुवन् - स्वतो व्यावृत्तत्वञ्च स्वभिन्नलिङ्गकस्वविशेष्यकस्व-सजातीयेतरभेदानुमित्यविषयत्वमिति । अत्र अनुमितौ स्वविशेष्यकत्वविशेषणाऽनुपादाने विशेषवान् पृथिवीपरमाणुर्विशेषान्तरभिन्नः पृथिवीत्वादित्यनुमिति[1]मादायासंभवापत्तिः, तस्याः विशेषभिन्नलिङ्गजन्यत्व-विशेषसजातीयेतरभेदविधेयकत्वयोः सत्त्वात्, विशेषस्य च तद्विषयत्वात् । स्वविशेष्यकत्वविशेषणोपादाने तु उक्तानुमितेः विशेषविशेष्यकत्वाभावात् न विशेषस्य तद्विषयत्वेऽपि क्षतिः ।

अत्र प्रभामञ्जूषाकारावavदताम् - अनुमित्यविषयत्वमित्यस्य स्थाने अनुमित्य[2]विशेष्यत्वमिति निवेशनेनैव उक्तानुमितिमादाय प्राप्तासंभववारणसंभवेन स्वविशेष्यकत्वविशेषणं व्यर्थमेवेति ।

अत्रैतद्ग्रन्थकारा नानाशास्त्रनिष्णाता रचितानेकगूढप्रबन्धत्वेन प्रथितयशस्का महामहोपाध्यायाः श्रीकृष्णताताचार्या एवमाहुः - स्वभिन्नलिङ्गजन्यस्वसमानजातीयेतरभेदविधेयकानुमित्यविशेष्यत्वमित्यस्य लक्षणत्वे केनचिदपि कदाप्यननुमिताङ्कुरविशेषे तादृशानुमित्यविशेष्यत्वसत्त्वात्तत्रातिव्याप्तिवारणाय तादृशानुमितिविशेष्यत्वसमानाधिकरणपदार्थविभाजकोपाधिमद्भिन्नत्वरूपपरिष्कारस्यावश्यकतया 'अयं विशेषो विशेषान्तरेभ्यो भिद्यते, एतद्विशेषत्वादि'त्यनुमितिमादायासंभवप्रसङ्गः । स्वपदेन साध्यभूत-भेदप्रतियोगिनो यत्किञ्चिद्विशेषस्य ग्रहणे तद्विशेषेतरानेकविशेषप्रतियोगिकभेदविधेयकत्वस्य अनुमितौ सत्त्वेन तस्याः तत्समानजातीयेतरभेदविधेयकत्वात्, अत्र पक्षभूतविशेषस्यैव हेतुत्वेन अनुमितेः स्वपदगृहीत-विशेषभिन्नलिङ्गकत्वात्, एतादृशानुमितिनिरूपितपक्षभूतविशेषनिष्ठविशेष्यतासमानाधिकरणविशेषत्वाख्य-पदार्थविभाजकोपाधिमत्त्वाच्च सकलस्यापि विशेषस्य, तद्भिन्नत्वाभावात् । अनुमितौ स्वविशेष्य-कत्वविशेषणोपादाने तु उक्तानुमितेः स्वपदगृहीतसाध्यभूतभेदप्रतियोगिविशेषविशेष्यकत्वाभावान्न तामादाय दोषप्रसङ्गः ।

वस्तुतस्तु पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ पृथिवीत्वादिना सकलस्याप्यङ्कुरस्य तादृशानुमिति-

---

१. यद्यपि 'घटो विशेषाद्भिद्यते कपालसमवेतत्वात्' इति तरङ्गिणीप्रदर्शितानुमितिमादायासंभवोपपादनं शक्यते कर्त्तुं, तथापि तदनुमितौ विधीयमानभेदप्रतियोगिविशेषस्य स्वपदेन ग्रहणे अनुमितेस्तत्सजातीयेतरभेद-विधेयकत्वाभावेन दोषाभावात् 'विशेषादि'ति पदस्य अनेकविशेषतात्पर्यकत्वं स्वीकार्यम् । तथा च सति विधेयभेदप्रतियोगियत्किञ्चिद्विशेषस्य स्वपदेनोपादाने विशेषान्तरप्रतियोगिकभेदविधेयकत्वस्य अनुमितौ सत्त्वादसंभव उपपद्यते । एतदपेक्षया 'विशेषवान् पृथिवीपरमाणुर्विशेषान्तरभिन्न' इत्यनुमितिविशेष्य-कोटिप्रविष्टविशेषं स्वपदेनादाय असंभवोपपाद-नस्याञ्जसत्वेन इयमेवानुमितिरुपादत्ता ।

२. अविशेष्यत्वमत्र मुख्यविशेष्यताशून्यत्वम् ।

विशेष्यत्वात्, तदविशेष्यत्वं नास्तीति नातिव्याप्तिरिति पदार्थविभाजकोपाधिघटितलक्षणस्यानपेक्षिततत्वेन असंभवाभावात् नैवं स्वविशेष्यकत्वविशेषणसार्थक्यसिद्धिः ।

अतः स्वविशेष्यकत्वसार्थक्यमेवं साधनीयम् - अनुयोगिनि स्वत्वमन्तर्भाव्य स्वभिन्नलिङ्गजन्य-स्वसजातीयेतरभेदानुमित्यविशेष्यत्वस्य लक्षणत्वाङ्गीकारे यत्किञ्चिद्विशेषव्यक्तितात्पर्यकस्वशब्द-घटितलक्षणस्य विशेषान्तरे अव्याप्तत्वेन लक्ष्यभेदेन लक्षणावृत्तिरूपाननुगमापत्तिः । प्रतियोगिनि स्वत्वमन्तर्भाव्य स्वभिन्नलिङ्गजन्यस्वसमानजातीयेतरभेदविधेयकानुमितिविशेष्यं यत्स्वं तदन्यत्वमिति लक्षणकरणे स्वपदेन घटादियत्किञ्चिद्व्यक्तिग्रहणे तदितरपटादावतिव्याप्तिः । तद्वारणाय तादृशानुमितिविशेष्यं यद्यत्स्वं तत्तदन्यत्वं लक्षणत्वेन विवक्षणीयम् । तथा च विशेषेतरसकलपदार्थस्य लक्षणभूतभेदप्रतियोगित्वेन तद्भेदात्मकलक्षणज्ञानार्थं प्रतियोगितावच्छेदकतत्तद्व्यक्तित्वेन विशेषेतरसकलपदार्थज्ञानस्यावश्यकतया सर्वज्ञेनैव लक्षणं ज्ञातुं शक्येत । अतः एवमनुगमः कर्त्तव्यः- स्वभिन्नलिङ्गजन्यत्व-स्वविशेष्यकत्व-स्वसजातीयेतरभेदविधेयकत्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टानुमितिमद्भिन्नत्वमिति । अत्र स्वविशेष्यकत्वसंबन्धानुपादाने स्वभिन्नलिङ्गजन्यत्व-स्वसजातीयेतरभेदविधेयकत्वोभयसंबन्धेन घटविशिष्टां विशेषो घटेभ्यो भिन्नो, गुणशून्यत्वात् इत्यनुमितिमादायासंभवापत्तिः । स्वविशेष्यकत्वसंबन्धोपादाने तु उक्तानुमितेः त्रितयसंबन्धेन किञ्चिद्विशिष्टत्वाभावान्नासंभवः ।

यद्यपि स्वविशेष्यकत्वानुपादानपक्षे स्वभिन्नलिङ्गजन्यस्वसजातीयेतरभेदविधेयकानुमितिविशेष्यं यद्यत्स्वं तत्तदन्यत्वमित्यस्य स्वजनकलिङ्गभिन्नत्व-स्वविधेयभेदप्रतियोगिसजातीयत्व-स्वोद्देश्यत्वैतत्त्रितयसंबन्धेन अनुमितिमद्भिन्नत्वमित्यत्र तात्पर्याङ्गीकारे नासर्वज्ञदुर्ज्ञेयत्वप्रसङ्गः । न च पूर्वोक्तानुगमापेक्षया अत्र किं लाघवमिति वाच्यम् । किञ्चित्पदार्थस्य तत्संसर्गस्य चात्र प्रवेशाभावेन लाघवात् । तथाऽपि विशेषो विशेषान्तराद्भिद्यते, एतद्विशेषघटान्यतरत्वादित्यनुमितिमादायासंभववारणाय नालमयं परिष्कारः । पूर्वोक्तकिञ्चिद्विशिष्टानुमितिकभिन्नत्वपरिष्कारे तु स्वभिन्नेत्यनेन स्वाविषयकप्रतीतिविषयत्वस्य विवक्षणेन एतद्विशेषघटान्यतरत्वादेश्च एतद्विशेषाविषयकप्रतीतिविषयत्वाभावेन न तल्लिङ्गकानुमितिविषयत्वेऽप्येतद्विशेषस्य काचित्क्षतिः ।

अनुमितिमद्भिन्नत्वपरिष्कारे तु स्वजनकलिङ्गभिन्नेत्यनेन स्वजनकलिङ्गाविषयकप्रतीतिविषयविवक्षणेऽपि एतद्विशेषस्य अन्यतरत्वाविषयकप्रतीतिविषयत्वस्य सत्त्वात् उक्तत्रितयसंबन्धेन अनुमितिमत्त्वात् तद्भिन्नत्वाभावेन नासंभववारणसंभवः ।

अतः किञ्चिद्विशिष्टानुमितिमद्भिन्नत्वपरिष्कारस्यादरणीयतया तत्र च वैशिष्ट्यनियामकत्वेन स्वविशेष्यकत्वसंबन्धानुपादाने असंभवस्य दर्शितत्वेन तद्वारणेन सार्थकं स्वविशेष्यकत्वसंबन्धसमर्पकं स्वविशेष्यकत्वपदम् ।

परन्त्वेवमपि पृथिवीवृत्तिविशेष इतरभिन्नः, सामान्यान्यत्वे सति, सदन्यत्वे सति पृथिव्यनुयोगिकसमवायादित्यनुमितिमादयासंभवः । तद्वारणाय स्वविषयक (स्वोद्देश्यक)लिङ्गज्ञान-जन्यतानवच्छेदकत्व[१]-स्वसजातीयभेदविधेयतानिरूपितत्वस्ववृत्तित्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टोद्देश्यत्वं लक्षणत्वेन विवक्षणीयम् । समन्वयश्च "द्व्यणुकारम्भप्रयोजकः (परमाणोः) परस्परभेदः यत्किञ्चिल्लिङ्गज्ञानज्ञाप्यः, भेदत्वात्, घटादिभेदवदिति" विशेषग्राहकानुमितिमादाय कर्त्तव्यः । तथाहि -

---

१. लिङ्गज्ञानजन्यतावच्छेदकत्वम् अनुमितिनिरूपितोद्देश्यतायां कथं संभवतीति प्रभायां निरूपितम् ।

परमाणुभेदानुमापकविशेषस्य व्यावर्त्तकान्तरव्यावृत्तत्वेऽनवस्थेत्यनवस्थाभिया धर्मिग्राहकमानेन सिद्ध्यन् विशेषः स्वतः परस्परं व्यावृत्त एव सिद्ध्यति । अतश्च उपरिदर्शितधर्मिग्राहकमाने परमाणुभेदोद्देशेन परस्परभिन्नयत्किञ्चिल्लिङ्गज्ञानज्ञाप्यत्वं विधीयते । तत्र विधेयकोटिप्रविष्टानामप्यनुमितेः प्रागसिद्धानां विधेयत्वाङ्गीकारात् लिङ्गत्वेन सिद्ध्यमानविशेषगतपरस्परभेदेऽपि विधेयता विद्यते, तन्निरूपितोद्देश्यता च विशेषे । सा च धर्मिग्राहकानुमितेः परमाणुभेदविषयक (-उद्देश्यक) लिङ्गज्ञानजन्यत्वेन विशेषविषयक-लिङ्गज्ञानजन्यत्वाभावात् तादृशलिङ्गज्ञानजन्यतानवच्छेदिकेति ।

अत्र स्ववृत्तित्वरूपतृतीयसम्बन्धः स्वविशेष्यकत्वपदलभ्यः । स्ववृत्तित्वानुपादाने 'घटो गुणेभ्यो भिद्यते, घटत्वादि'त्यनुमितौ स्वपदेन यत्किञ्चिद्गुणादानेन घटेऽतिव्याप्तिः । अतस्तद्वारणाय स्ववृत्तित्वसम्बन्धसमर्पकस्वविशेष्यकत्वविशेषणमावश्यकमेवेति । इत्थं सूक्ष्मतमविचारैः स्वविशेष्यकत्वपदसार्थक्यसाधकस्यास्य निबन्धस्य प्रपठनेन एतत्सम्पादनपरिश्रमसार्थक्यं साधयन्तु विद्वांस इति प्रार्थये ।

।। श्रीहयग्रीवाय नमः ।।

विशेषलक्षणविमर्शः

महामहोपाध्यायतिरुप्पुट्कुळिश्रीकृष्णताताचार्यविरचितः

रघुकुलजलधौ जातं, संश्रितसन्तानमाश्रये कञ्चित् ।
अधिकोन्नतैरपि यतो, विनतैरग्र्यः फलोत्करो ग्राह्यः ।।१।।

महादेवप्रोक्ते सहृदयबुधानां सुरुचिरे, विशेषाणां लक्ष्मण्यभिदधुरसाङ्गत्यमिह ये ।
वचोभङ्गीं तेषां दृढघटितदोषां प्रकटयन्, सुधीः कृष्णाभिख्यो रचयति मुदं सर्वविदुषाम् ।।२।।

स्वत एव व्यावृत्तत्वञ्च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसजातीयेतरभेदानुमित्यविषयत्वम् । साजात्यञ्च पदार्थविभाजकोपाधिरूपेण । तेन घटादेस्तादात्म्येन व्यावृत्तत्वेऽपि, विशेषस्य गुणादिशून्यत्वेन इतरभेदानुमितिविषयत्वेऽपि, द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेऽपि न क्षतिरित्याह महादेवः । अत्राक्षिपन्तिअनुमित्यविषयत्वमित्यत्र अनुमित्यविशेष्यत्वनिवेशेनैव विशेषवान् परमाणुः विशेषान्तरभिन्नः पृथिवीत्वादित्यनुमितिमादायासम्भववारणसम्भवात् पृथक्स्वविशेष्यकत्वनिवेशो व्यर्थः । यत्तु–स्वविशेष्यकत्वनिवेशे त्रयाणां सम्बन्धत्वं परिकल्प्य स्वभिन्नलिङ्गजन्यत्वस्वविशेष्यकत्वस्वसमानजातीय–प्रतियोगिकभेदविधेयकत्वैतत्त्रितयसम्बन्धेन स्वविशिष्टानुमितिकं यद्यत्स्वं तत्तदन्यत्वस्यैव लक्षणत्वस्वीकारसम्भवात् अनुमितिविषयताया एव निवेशो नास्तीति लाघवमिति तन्निवेशनमावश्यकम् । ननु त्रयाणां सम्बन्धविधया प्रवेशे विशेषो द्रव्याद्भिन्नो, निर्गुणत्वात्; घटो विशेषान्तराद्भिन्नो, घटत्वादित्या–कारकसमूहालम्बनानुमितिमादायासम्भवापत्तिरिति चेन्मैवम् । यतो यथाश्रुतेऽपि एतद्दोषवारणाय स्वसमानजातीयभेदनिष्ठविधेयतानिरूपितस्वनिष्ठोद्देश्यताकत्वं मिलितमेकं विशेषणमिति वाच्यम् । तथाऽत्रापि मिलितस्य सम्बन्धत्वं स्वीक्रियताम् । तथा च स्वभिन्नलिङ्गजन्यत्वस्वसमानजातीयभेदनिष्ठविधेयतानि–रूपितस्वनिष्ठोद्देश्यताकत्वैतदुभयसम्बन्धेन स्वविशिष्टानुमितिकभिन्नत्वं पर्यवसन्नम् । यदि चैतद्विशेषस्तद्वि–शेषाद्भिन्नः तादात्म्येनैतद्विशेषात्, घटो विशेषान्तराद्भिन्नो घटत्वादित्याकारकस्वभिन्नघटत्वात्मकलिङ्गजन्य–समूहालम्बनात्मकानुमितिमादाय तद्दोषतादवस्थ्यमिति भाव्यते, तदा स्वभिन्नलिङ्गविषयताघटित–धर्मावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकीभूता या स्वसमानजातीयभेदनिष्ठविधेयतानिरूपित–स्वनिष्ठोद्देश्यता तन्निरूपकतासम्बन्धेन स्वविशिष्टानुमितिकभिन्नत्वमेव वक्तव्यम् । (स्वविशेष्यकत्व) विशेषणत्वपक्षेऽप्येषैव गतिरिति कैश्चिदभिहितं ; तन्न चारु । स्वविशेष्यकत्व–विशेषणानुपादानेऽपि स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदविधेयकानुमित्युद्देश्यतासम्बन्धेन स्वविशिष्टं यद्यत्स्वं, तत्तदन्यत्वस्यैव लक्षणतया विवक्षणेन लाघवसम्पादनसम्भवात् स्वविशेष्यकत्वविशेषणस्य नादेयत्वात् ।

यदपि, एतद्विशेषः तद्विशेषाद्भिद्यते, तादात्म्येनैतद्विशेषात्; घटो विशेषान्तराद्भिद्यते घटत्वात् इति समूहालम्बनानुमितिं, विशेषो द्रव्याद्भिन्नो निर्गुणत्वात्, घटो विशेषान्तराद्भिन्नो घटत्वात् इति समूहालम्बनानुमितिं चादाय असम्भवापत्तिरिति स्वविशेष्यकत्वनिवेशनम् । तथा सति समासे चरमनिर्दिष्टस्य उद्देश्यतया प्रथमनिर्दिष्टस्य विधेयतया स्वसजातीयभेदविधेयकत्वे स्वविशेष्यकत्वा–वच्छेदकत्वं लभ्यते । तद्विशिष्टे स्वभिन्नलिङ्गजन्यत्वान्वयित्वलाभाच्च स्वभिन्नलिङ्गजन्यतावच्छेदकत्वं [१]स्वोद्देश्यतावच्छेदकीभूतस्व–समानजातीयभेदविधेयकत्वे लभ्यते । तथा च स्वभिन्नलिङ्गविषयताघटितधर्मावच्छिन्नजनकतानि–

१- अत्र स्वपदेन स्वभिन्नलिङ्गजन्यत्वं ग्राह्यम् ।

रूपितजन्यतावच्छेदकीभूतं यत् स्वोद्देश्यकत्वावच्छेदकस्वसमानजातीय- भेदविधेयकत्वं तच्छाल्यनुमितिकभिन्नत्वं पर्यवस्यतीति न प्रागुपदर्शितसमूहालम्बनानुमितिद्वयमादाय दोषप्रसर इति अन्यैरुदितम् । तदप्यपेशलम् । स्वविशेष्यकत्वमित्यत्रापि विशिष्टस्य वैशिष्ट्यमिति रीत्या अन्वयस्वीकारेण विशेषणीभूतधर्मान्तरविशिष्टेन व्यावर्त्यमानस्य विशेष्यस्य भाने विशेषणांशे प्रकारीभवन्त्यां व्यक्तौ विशेष्यसम्बन्धावच्छेदकत्वस्य विशिष्टवैशिष्ट्यबोधे भानात् स्वसमानजातीयभेदविधेयकत्व-रूपविशेषणविशिष्टानुमित्या निरूपकीभूय विशेष्यताव्यावर्त्तने अनुमितौ प्रकारीभूते स्वसमानजातीयभेद-विधेयकत्वे विशेष्यतानिरूपकतावच्छेदकत्वलाभात् विशेषो द्रव्याद्भिद्यते, घटश्च विशेषान्तराद्भिद्यते इति समूहालम्बनानुमितिनिष्ठायां विशेषनिष्ठविशेष्यतानिरूपकतायां विशेषान्तरभेदविधेयकत्वस्य अनवच्छेदकत्वात् नासम्भवप्रसक्तिः । न च तथाप्यत्र कल्पे समानजातीयभेदविधेयकत्व एतदवच्छिन्ननिरूपकताकविशेष्यतायां वा स्वभिन्नलिङ्गजन्यत्वावच्छेदकत्वं वैवक्षिकमेव न शाब्दमिति वाच्यम् । स्वसमानजातीयभेदविधेय-कत्वविशिष्टानुमितौ स्वाभिन्नलिङ्गजन्यत्वान्वयबलात् स्वसमानजातीयभेदविधेयकत्वे एतदवच्छेदकत्व-लाभसम्भवात् । ततश्च स्वभिन्नलिङ्गजन्यतावच्छेदकं यत्स्वसमानजातीयभेदविधेयकत्वं तदवच्छिन्न-निरूपकताकविशेष्यतावच्छिन्नत्वस्य पर्यवसितत्वेन एतद्विशेषः तद्विशेषाद्भिन्नः तादात्म्येनैतद्विशेषात् , घटो विशेषान्तराद्भिन्नो घटत्वात् इत्याकारकसमूहालम्बनानुमितिनिष्ठायां विशेषनिष्ठविशेष्यतानिरूपकतायां स्वभिन्नलिङ्गजन्यताव-च्छेदकीभूतस्वसमानजातीयभेदविधेयकत्वावच्छिन्नत्वविरहेण असंभवानवकाश इति ।

अथ स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदानुमित्यविशेष्यत्वस्य लक्षणत्वे गगनवृत्तिः इतरभिन्नः गगनानुयोगिकसमवायादित्यनुमितिविशेष्यतामादाय असम्भवः प्रसज्यते । अतः स्वमात्रविशेष्यकत्वपरं स्वविशेष्यकत्वमावश्यकम् । दर्शितानुमितौ स्वेतरशब्दादिविशेष्यत्वात् नानुपपत्तिः । न च अनुमित्यविशेष्यत्वमित्यत्र अनुमितिनिरूपितस्वमात्रवृत्तिविशेष्यतावद्भिन्नत्वमिति विवक्ष्यतां, तावताप्युक्तदोषवारणसम्भवादिति वाच्यम् । विषयभेदेन विषयतानां भिन्नतया गगनवृत्तिरितरभिन्न इत्यनुमितिनिरूपितयोर्गगनवृत्तित्त्वरूपैकधर्मावच्छिन्नयोरपि विशेषशब्दनिष्ठयोर्विशेष्यतयोः भिन्नतया विशेषनिष्ठविशेष्यतायाः स्वमात्रवृत्तित्वानपायाद् उक्तदोषस्यानुमितौ स्वेतराविशेष्यकत्वविशेषणेनैव वारणीयत्वात् । न च अनुमित्यविशेष्यत्वमित्यत्र अनुमितिनिरूपितस्वेतरवृत्तिधर्मानवच्छिन्न-विशेष्यतावद्भिन्नत्वमेव विवक्ष्यतां, तावताप्युक्तदोषवारणसम्भवादिति वाच्यम् । स्वेतराविशेष्यकत्व-मित्यस्य अनुमितिविशेषणत्वापेक्षया तस्य लघुत्वाभावात्, उपायस्य उपायान्तरादूषकत्वाच्चेति चेन्मैवम् ।

यतस्स्वेतराविशेष्यकत्वस्य अनुमितिविशेषणत्वेऽपि स्वेतरवृत्तिधर्मानवच्छिन्नत्वं विशेष्यताविशेषण-मावश्यकम्, अन्यथा गगनवृत्तिविशेषः परमाणुवृत्तिविशेषाद्भिन्नः गगनानुयोगिकसमवायात् इत्यनुमितिविशेष्यतामादायासम्भवापत्त्या, तादृशानुमितेरपि स्वेतराविशेष्यकत्वात् । उक्तविवक्षणे तु तादृशानुमितिनिरूपितविशेषनिष्ठविशेष्यतावच्छेदककोटौ स्वेतरशब्दादिवृत्तेः गगनादिवृत्तित्त्वस्य घटकत्वात् नानुपपत्तिः । एवञ्च गगनवृत्तिरितरभिन्न इत्यनुमितिविशेष्यतामादाय प्रसक्तासम्भवस्यापि वारणसम्भवात् स्वेतराविशेष्यकत्वं व्यर्थम् । विशेष्यतायां स्वेतरवृत्तिधर्मानवच्छिन्नत्वलाभश्च स्वविशेष्कत्वपदेन स्वेतरवृत्तिधर्मानवच्छिन्नविशेष्यताकत्वविवक्षयेव अनुमित्यविशेष्यत्वपदेन अनुमितिनिरूपितस्वेतर-वृत्तिधर्मानवच्छिन्नविशेष्यतावद्भिन्नत्वविवक्षयाऽपि निर्वहतीति व्यर्थं स्वविशेष्यकत्वपदम् ।

ये त्वत्र विशेषाणां परस्परभेदानुमितिर्न स्वभिन्नलिङ्गजन्या अभ्युपेयत इति समयं बध्नन्ति ते केवलं प्रतारयन्ति पामरान् । सति गगनपरिमाणशब्दादौ व्याप्तिज्ञाने सति च हेतोर्गगनवृत्तिविशेषरूपपक्षधर्मताज्ञानादौ

लोकानां जायमानायाः पूर्वोक्तानुमितेः कस्यचिदुन्मत्तस्य समयबन्धमात्रेण निरोद्धुमशक्यत्वात् ।

न च तथाप्येतद्विशेषः शब्दश्च परमाणुवृत्तिविशेषाद्भिद्यते गगनानुयोगिसमवायादित्यनुमिति-विशेष्यतामादाय असम्भवः प्रसज्यते । स च स्वेतरवृत्तिधर्मानवच्छिन्नत्वविशेषणेन न शक्यते वारयितुम् । एतद्विशेषत्वावच्छिन्नविशेष्यतायास्तथाविधत्वात् । (किन्तु) स्वेतराविशेष्यकत्वविशेषणेनैवेति स्वविशेष्यकपदमावश्यकमिति वाच्यम् । एवमपि एतद्विशेषः परमाणुवृत्तिविशेषाद्भिन्नः गगनानुयोगिक-समवायादित्यनुमितिविशेष्यतामादाय असम्भवारणाय स्वसमानाधिकरणावृत्तित्वेन भेदस्य विशेषणीयतया तेनैव पूर्वोक्तासम्भववारणस्य सम्भवात् । तथा हि – हेतोर्व्याप्तिपक्षधर्मताज्ञानादौ दर्शितानुमितिः दुरपलापा । सा च स्वेतराविशेष्यका स्वेतरावृत्तिधर्मावच्छिन्नविशेष्यका चेति तद्विशेष्यतामादायासम्भवः प्रसज्यते । स च स्वसमानाधिकरणपदार्थान्तरावृत्तित्वेन वार्यते । परमाणुवृत्तिविशेषभेदस्य स्वसमानाधिकरणशब्द-परिमाणदिरूपपदार्थान्तरवृत्तित्वात् न पूर्वोक्तदोषः । एवञ्च पूर्वोक्तत्रिविधानुमितिविषयीभूतस्यापि भेदस्य स्वसमानाधिकरणपदार्थान्तरवृत्तित्वेन असम्भवप्रसक्त्यभावात् स्वेतराविशेष्यकत्वं स्वेतरवृत्तिधर्मा-नवच्छिन्नत्वमुभयमपि नोपादेयमेव । तत्तत्परमाणुनिष्ठो यो विशेषः तत्समानाधिकरणपदार्थान्तरावृत्तिश्च भेदः – तद्विशेषेतरयावद्व्यक्तिप्रतियोगिकः तद्विशेषमात्रवृत्तिभेदः, तद्विशेषेतरपृथ्वीसमवेतप्रतियोगिक-तद्विशेषजलपरमाण्वादिवृत्तिविशेषसाधारणभेदः इत्यादिः । तदनुमापकश्च एतद्विशेषे कश्चिद्धेतुर्नास्ति । स च एतद्विशेषमात्रवृत्तिर्वक्तव्यः । अन्यथा व्यभिचारापत्तेः । तद्यथा- एतद्विशेषेतरभेदे साध्ये एतत्परमाण्वनुयोगिकसमवायो न हेतुर्भवितुमर्हति, एतत्परमाणुवृत्तिरूपादौ व्यभिचार इति । एतद्विशेषत्वञ्च न वस्तुगत्या एतद्विशेषादतिरिच्यते । घटादौ तु मैवम् । एतत्कपालसमवेतद्रव्यत्वादेः एतत्कपाल-संयोगजन्यत्वादेर्वा तत्र तदिरयावद्व्यक्तिप्रतियोगिकभेद- साधकत्वसम्भवात् । तदिरयावद्व्यक्तिप्रतियोगिकभेदो नाम तदितरत्वावच्छिन्नप्रतियोगिताकभेदस्तत्तद्भेदकूटो वेत्यन्यदेतत् । एवञ्च अत्र यदि प्रतियोगिनिविष्टं स्वं तदा घटादिकमेव तादृशं स्वम् । यद्यनुयोगिनिविष्टं, स्वम् = एतद्विशेषः तद्भिन्नलिङ्गं घटत्वादि, तज्जन्या स्वसमानाधिकरणपदार्थान्तरावृत्तिभेदविधेयका घट इतरेभ्यो भिद्यत इत्याद्यनुमितिः, तद्विशेष्य-भिन्नत्वस्य विशेषे सत्त्वाल्लक्षणसमन्वयः ।

यदि चैवं विशेषो द्रव्याद्भिन्नः गुणशून्यत्वात् इत्यनुमितिविषयीभूतस्य भेदस्यापि विशेष-समानाधिकरणरूपाद्यात्मकपदार्थान्तरवृत्तितया तत एव तादृशानुमितिविशेष्यतामादाय प्रसक्त-दोषवारणसम्भवात् स्वसमानजातीयत्वविशेषणं व्यर्थम्, अपि चैतद्विशेषेतरभेदे साध्ये न हेतुदुर्भिक्षम् । समवेतत्वे सति सदन्यत्वे सति एतत्परमाणुभिन्नासमवेतत्वादेः हेतुत्वसम्भवात् । किञ्चिद्विशेषण-वैकल्याघटितस्य च रूपादौ सर्वत्र दुर्लभत्वादिति विभाव्यते, तदा भेदे स्वसमानाधिकरण–पदार्थान्तरावृत्तित्वं परित्यज्य लिङ्गे स्वसमानाधिकरणमात्रवृत्तिभिन्नत्वं देयम् । तथा हि – गगनानुयोगिकसमवायस्तु विशेषसमानाधिकरणमात्रवृत्तिरेव, तद्विशेषस्यापि तद्विशेषसमानाधिकरणत्वानपायादिति न तल्लिङ्गकानुमिति-मादायासम्भवः । घटादौ तु तत्तद्घटसमानाधिकरणमात्रवृत्तिभिन्नं यद्घटत्वादि, तज्जन्या या स्वसमान-जातीयघटादिप्रतियोगिकभेदानुमितिः, तद्विशेष्यत्वान्नातिव्याप्तिः । एवञ्च गुणादिशून्यत्वस्य तत्तद्विशेषसमानाधिकरणेतरवृत्तित्वात् तद्धेतुकद्रव्यभेदानुमितिमादाय असम्भववारणाय स्वसजातीयत्व-विशेषणसार्थक्यम् ।

अथैवं सति एतद्विशेषतद्विशेषौ विशेषान्तराद्भिद्येते एतद्विशेषतद्विशेषान्यतरत्वादित्यनुमितिमादाय

असंभववारणाय स्वेतराविशेष्यत्वार्थकम् स्वविशेष्यकपदमावश्यकमेव । तादृशानुमितेः तत्तद्विशेषेतर-विशेष्यकत्वान्नासम्भव इति चेन्न । स्वभिन्नेत्यस्य स्वाविषयकप्रतीतिविषयेत्यर्थात् । अन्यथा स्वेतराविशेष्यकत्वस्य अनुमितिविशेषणत्वेऽपि एतद्विशेषः विशेषान्तरभिन्नः, एतद्विशेषघटान्यतरत्वादिति अनुमितिविशेष्यतामादाय असंभवस्य दुर्वारत्वात् । तथा च स्वसमानाधिकरणमात्रवृत्तिभिन्नस्वाविषयक-प्रतीतिविषयलिङ्गजन्य-स्वसमानजातीयभेदानुमित्यविशेष्यत्वं पर्यवसन्नम् । एतद्विशेषस्य, एतद्विशेषत्वस्य, एतत्परमाणुसमवेतत्वादेश्च एतद्विशेषस्वरूपानतिरिक्ततया नैतद्विशेषाविषयकप्रतीतिविषयत्वम् । एतद्विशेषतद्विशेषान्यतरत्वादेश्च एतद्विशेषातिरिक्तत्वेऽपि एतद्विशेषघटितत्वादेः न तदविषयक-प्रतीतिविषयत्वम् । एतत्परमाण्वनुयोगिकसमवायादेश्च एतद्विशेषाविषयकप्रतीतिविषयत्वेऽपि न तत्समानाधिकरणमात्रवृत्तिभिन्नत्वम् । गुणशून्यत्वादिहेतोः तादृशत्वेऽपि न तत्साध्यभेदस्य स्वसजातीय-प्रतियोगिकत्वमिति न कोऽपि दोषः । अतः स्वविशेष्यकत्वविशेषणं व्यर्थमेवेति ।

अत्र तरङ्गिणीकारः- स्वत्वं हि नानुगतं, किन्तु तत्तद्व्यक्तिपर्यवसन्नमेव । अत्र च स्वपदेन विशेषोपादानं न सम्भवति । विशेषे विशेषान्तरभेदसाधने विशेषेतरलिङ्गाभावादप्रसिद्ध्यापत्तेः । घटादीनेव तत्तद्व्यक्तित्वेनोपादाय लक्षणं सङ्गमनीयम् । तथा च स्वविशेष्यकेत्यनुक्तौ विशेषो घटाद्भिद्यते, गुणवद्भिन्नत्वात् इत्यनुमितेः घटभिन्नलिङ्गकत्वेन घटसजातीयप्रतियोगिकभेदविधेयकत्वेन च तादृशानुमितौ विशेषस्य मुख्यविशेष्यत्वादसंभव एव स्यात् । तदुपादाने तु उक्तानुमितेः घटभिन्नलिङ्गकत्वेऽपि घटमुख्यविशेष्यत्वाभावात् तामादाय नासम्भव इति ज्ञेयम् ।

न चैवं विशेषकालीनो घटो विशेषान्तराद्भिद्यते एतत्कपालसमवेतत्वादित्यनुमितेरपि घटभिन्नलिङ्गकत्वात् स्वसजातीयघटान्तरभेदविधेयकत्वाच्च तद्विषयत्वस्य विशेषे सत्त्वादसम्भवतादवस्थ्यमिति वाच्यम् । अविषयत्वमित्यस्य मुख्यविशेष्यताशून्यत्वार्थकत्वात् । अनुमितिश्च मुख्यविशेष्यताद्वयशून्यत्वेन विशेषणीया । अन्यथा विशेषो घटाद्भिद्यते घटश्च पटाद्भिद्यते निर्गुणत्वाद्घटत्वाच्चेतिसमूहालम्बनानुमितिमादाय स्वपदेन घटव्यक्तिमादाय असम्भवप्रसङ्गादित्याचख्यौ ।

अत्रेदं चिन्त्यते - विशेषो घटाद्भिद्यते गुणवद्भिन्नत्वादित्यनुमितिमादायासम्भवः किमनुयोग्यन्तर्भावित-स्वत्वकस्य स्वाभिन्नलिङ्गजन्यस्वसजातीयभेदानुमित्यविशेष्यत्वस्य लक्षणस्य, उत प्रतियोग्यन्तर्भावितस्वत्वकस्य स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदानुमितिविशेष्यं यद् यत्स्वं तत्तदन्यत्वरूपलक्षस्य ? नाद्यः, अनुयोगिनि स्वत्वान्तर्भावे विशेषमेव स्वपदेन सङ्गृह्य लक्षणस्य सङ्गमनीयतया घटादिकं स्वपदेन उपादाय लक्षणागमनस्य अदोषत्वात् । यत्तूक्तमत्र - विशेषस्य स्वपदेन उपादानं न सम्भवति, विशेषे विशेषान्तराद्भेदसाधने विशेषेतरलिङ्गाभावात् अप्रसिद्ध्यापत्तेरिति; तत्तुच्छम् । विशेषे विशेषान्तरभेदसाधकविशेषेतरलिङ्गाभावमात्रेण स्वपदेनोपादाने प्रसिद्धिवैधुर्यात् । घटो विशेषाद्भिद्यते सगुणत्वादित्यनुमितेः विशेषेतरलिङ्गकत्वात् विशेषसजातीयभेदविधेयकत्वाच्च स्वपदेन विशेषोपादाने स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदविधेयकोक्तानुमितिविशेष्यताशून्यत्वस्य विशेषे सम्पत्तेः । यदि स्वविशेष्यकत्वविशेषणमुपादीयते तदा स्वपदेन विशेषोपादाने उक्तरीत्याऽप्रसिद्धिर्भविष्यति । स्वविशेष्यकत्वविशेषणमनन्तर्भाव्य लक्षणं परिष्कुर्वतान्तु नेदमप्रसिद्ध्युद्भावनमुपपद्यते ।

नापि द्वितीयः, प्रतियोगिनि स्वत्वान्तर्भावे विशेषस्य स्वपदेन उपादातुं शक्यत्व एवासंभवप्रसक्तेः ।

घटादिकं स्वपदेनोपादायासम्भवोद्भावनायोगात्[१] । उपदर्शितानुमितिविशेषस्य घटविशेष्यकत्वविरहेण तत्र स्वपदेन घटोपादानशङ्काया एव अनवताराच्च । न हि समभिव्याहृतपदार्थपरामर्शिनः स्वशब्दस्य प्रतियोगिपरत्वम्, अनुयोगिवृत्तित्वं वा अन्तरेण प्रकारान्तरं प्रमाणिकं मतम् । अतो नायं समाधिस्साधीयान् । अथ स्वत्वेन न यस्य कस्यचिल्लक्षणघटकत्वेनाभिप्रायः, किं तु तत्तद्व्यक्तित्वेन घटादीनां तथात्वे[२], अतएव घटादीनेव तत्तद्व्यक्तित्वेनोपादाय लक्षणं सङ्गमनीयमित्यवदत् । उपरिक्वचित् स्वत्वेन निवेशनप्रदर्शनं च स्वत्वतत्तद्व्यक्तित्वयोरत्यन्तभेदवैधुर्याभिप्रायात् । ततश्च तद्व्यक्तिभिन्नलिङ्गकतद्व्यक्तिसमानजातीय-प्रतियोगिकभेदविधेयकानुमितिविशेष्यत्वस्य पर्यवसिततया प्रागुक्तरीत्याऽसंभवः प्रसज्यत इति स्वविशेष्यकत्वोपादानमर्थवद्भवतीति सम्यगुक्तमिति चेन्न । यथाश्रुत-स्वत्वघटित-लक्षणमव्याजं परित्यज्य परिष्कारान्तरमनूद्यासंभवं सम्पाद्य स्वविशेष्यकत्वादरणस्य प्रक्षालनाद्धि- न्यायग्रस्तत्वात्, तादृशविशेष्यभूता या तद्व्यक्तिस्तदन्यत्वस्यैव लक्षणत्वसंभवेन पृथक्तद्व्यक्तिविशेष्यकत्वार्थकस्वविशेष्यकत्वोपादनवैफल्याच्च । अतो न कथंचिदपि तरङ्गिणीकृदुक्तं सङ्गच्छते ।

वयं तु ब्रूमः – स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदविधेयकानुमित्यविशेष्यत्वमात्रस्य लक्षणत्वे यादृशाङ्कुरविशेषे नोक्तानुमितिः, तादृशाङ्कुरविशेषेऽतिव्याप्तिः । अतः तादृशानुमितिविशेष्यता-समानाधिकरणपदार्थविभाजकोपाधिमद्भेदस्य लक्षणत्वं वाच्यम् , ततश्च स्वविशेष्यकत्वानुपादाने अयं विशेषो विशेषान्तराद्भिन्नः तादात्म्येनैतद्विशेषात् इत्यादिस्थलीयानुमितिमादायासंभवप्रसङ्गः । तत्र साध्यभूतभेदप्रतियोगिनः विशेषस्य स्वपदेनोपादाने स्वभिन्नलिङ्गजन्यत्वस्वसमानजातीयप्रतियोगिक्-त्वयोरनुमितौ सम्पत्त्या विशेषत्वात्मकपदार्थविभाजकोपाधेरपि निरुक्तानुमितिविशेष्यता समानाधिकरणतया तादृशविशेषे लक्षणगमनायोगात् । पक्षभूतविशेषेऽपि विशेषान्तरपक्षकैतद्विशेषभेदसाध्यकानुमितिमादाय उक्तरीत्या लक्षणगमनासम्भवस्य स्फुटत्वात् । स्वविशेष्यकत्वोपादाने तु भेदप्रतियोगिविशेषस्य स्वपदेनोपादानासम्भवान्नोक्तरीत्या असम्भवावकाशः । न चानुयोगिन्येव स्वत्वस्य निवेशकल्पे विशेषमेव स्वपदेनोपादाय लक्षणस्य सङ्गमनीयतया स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसमानजातीयभेदविधेय-कानुमितेरेवाप्रसिद्ध्या असम्भवस्तदवस्थ एवेति वाच्यम् । स्वविशेष्यकत्वमुपाददानैः प्रतियोगिन्येव स्वत्वमन्तर्भाव्य स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसमानजातीयभेदविधेयकानुमितिविशेष्यता-समानाधिकरणपदार्थविभाजकोपाधिमद् यद्यत्स्वं तत्तदन्यत्वस्य लक्षणत्वेन परिष्कारात् । न चैवमपि यादृशाङ्कुरे ईदृशानुमितिः कस्यचिदपि न जाता, तादृशाङ्कुरविशेषस्य स्वपदेनोपादातुमशक्यतया तत्रातिव्याप्तितादवस्थ्येन पदार्थविभाजकोपाधिघटनमप्रयोजकमिति शङ्क्यम्; तादृशानुमितिविशेष्यतासमाना-धिकरणयादृशयादृशपदार्थविभाजकोपाधिमद्यद्यत्स्वं तत्तन्निष्ठतादृशतादृशपदार्थविभाजकोपाध्यवच्छिन्न-

---

१. स्वत्वस्य प्रतियोगिनिविष्टत्वपक्षे 'स्वभिन्नलिङ्गजन्यत्वादिविशिष्टानुमितिविशेष्यप्रतियोगिकभेद' रूपलक्षणघटकस्वपदेन गृहीतस्य घटादेः प्रतियोगिभूतानुमितिविशेष्यत्वावश्यम्भावात्, तद्भेदस्य च विशेषे सत्त्वान्नासम्भव इति भावः । वस्तुतः 'विशेषो घटाद्भिद्यते गुणवद्भिन्नत्वात्' इत्यनुमितौ घटस्य विशेष्यत्वाभावेन लक्षणभूतभेदप्रतियोगित्वाभावात् न तस्य प्रतियोगिनिविष्टत्वपक्षे स्वपदेनोपादानसम्भव इत्याह- उपदर्शितानुमितीति ।

२. तथा च प्रतियोग्यनुयोगित्वयोरभावेऽपि घटादयस्तत्तद्व्यक्तित्वेन लक्षणघटकतया ग्रहीतुं शक्यन्त इति भावः ।

प्रतियोगिताकभेदवत्त्वस्य विवक्षणीयत्वात् घटादेः स्वपदेनोपादातुं शक्यतया तन्निष्ठद्रव्यत्वाद्यवच्छिन्न-प्रतियोगिताकभेदवत्त्वस्योपदर्शिताङ्कुरविशेषेऽप्यसत्त्वेन अतिव्याप्तेरनवकाशात्। अत्र घटादियत्किञ्चिद्व्यक्तिं स्वपदेनोपादाय तन्निष्ठद्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकभेदवत्त्वमादाय गुणादिष्वतिप्रसक्तिपरिहाराय यादृशयादृशेति यद्यत्स्वमिति च वीप्सादरणम्। स्वपदेन द्रव्याद्यात्मकैकैकव्यक्तिमादाय तत्तन्निष्ठद्रव्यत्वादि-रूपपदार्थविभाजकोपाध्यवच्छिन्नप्रतियोगिताकभेदषट्कमेव लक्षणं विवक्षणीयं, न तु यावद्द्रव्यादिव्यक्तीनां स्वपदेनोपादानं, गौरवात् प्रयोजनाभावाच्चेति मन्तव्यम्।

वस्तुतस्तु पृथिवीतरेभ्यो भिद्यते गन्धादित्यनुमितेः सर्वपृथिवीविषयकत्वसम्भवेन निरूक्तानुमित्यविषयाङ्कुरविशेषस्यैवाप्रसिद्ध्या पदार्थविभाजकोपाधिघटितपरिष्कारस्यैवानादरणीयतया प्रागुपदर्शितरीत्या असम्भवानवकाशात् नोक्तरीत्या स्वविशेष्यकत्वविशेषणसार्थकीकरणसम्भवः। किन्तु स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदविधेयकानुमितिविशेष्यत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं स्वस्य लक्षणमित्येवंरीत्या अनुयोगिनि स्वत्वमन्तर्भाव्य लक्षणकरणेऽननुगमः। स्वत्वस्य प्रतिव्यक्तिविश्रान्तत्वात्। तादृशानुमितिविशेष्यं यद्यत्स्वं तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वं लक्षणमिति प्रतियागिनि सत्त्वमन्तर्भाव्य लक्षणकरणे तु लक्षणस्य असर्वज्ञदुर्ज्ञेयत्वप्रसङ्गः। अतः स्वभिन्नलिङ्गजन्यत्व-स्वविशेष्यकत्वस्वसमानजातीयभेदविधेयकत्वैतत्रितयसम्बन्धेन किञ्चिद्विशिष्टानुमितिविशेष्यत्वावच्छिन्न-प्रतियोगिताकभेदवत्त्वं लक्षणत्वेन विवक्षणीयम्। तत्र च स्वविशेष्यकत्वानुपादाने विशेषो घटाद्भिन्नः, गुणशून्यत्वादित्यादिस्थलीयानुमितिमादाय असम्भवप्रसङ्गः। उक्तानुमितेः स्वभिन्नलिङ्गजन्यत्वस्व-समानजातीयभेदविधेयकत्वोभयसम्बन्धेन घटविशिष्टत्वात्तादृशानुमितिविशेष्यत्त्वाच्च विशेषस्य। स्वविशेष्यकत्वोपादाने चोक्तानुमितेः घटविशेष्यकत्वविरहेण निरुक्तत्रितयसम्बन्धेन किञ्चिद्विशिष्टत्वासम्भवेन नासम्भवावकाश इति रीत्या स्वविशेष्यकत्वविशेषणं सार्थकीकरणीयम्। एतेन स्वभिन्न-लिङ्गजन्यस्वसमानजातीयभेदविधेयकानुमितिविशेष्यं यद्यत्स्वं तत्तद्व्यक्तिनिष्ठपदार्थविभाजकोपाध्यवच्छिन्न-प्रतियोगिताकभेदवत्त्वस्य अङ्कुरविशेषातिव्याप्तिवारकस्य असम्भववारकस्य च परिष्कारस्य सम्भवेन न स्वविशेष्यकत्वमुपादेयमित्यपास्तम्। प्रागुक्तरीत्या अङ्कुरविशेषे अतिव्याप्त्यभावेन पदार्थविभाजकोपाधिघटित-परिष्कारस्यानादरणीयत्वात्। न च प्रागुपदर्शिताया असर्वज्ञदुर्ज्ञेयतायाः परिहारायैव पदार्थविभाजको-पाधिघटनमस्तु। तथा सति व्यक्तिषट्कस्यैव लक्षणघटकतया तद्दोषविरहादिति वाच्यम् उक्तदोषस्यास्मदु-पदर्शितलघुतरपरिष्कारेणैव निरासात्। अनेकधा द्रव्यत्वाद्यन्यतमरूपपदार्थविभाजकोपाधित्व-घटितगुरुतरपरिष्कारस्याश्रद्धेयत्वात्। द्रव्यत्वादीनां षण्णां निवेशावश्यम्भावे तेषां द्रव्यत्वत्वादिनैव निवेशसम्भवेन द्रव्यत्वाद्यन्यतमत्वेन तन्निवेशस्य शिरोवेष्टनेन नासिकास्पर्शनतुल्यत्वात्। उक्तपरिष्कारस्य केवलगौरवसम्पादनफलकत्वाच्च।

न च द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकभेदषट्कमेव लक्षणमस्तु, को दोष इति शङ्क्यम्। तथा सति स्वभिन्नलिङ्गजन्यत्वादेर्लक्षणे कथंञ्चिदपि अनन्वये मूलविरोधप्रसङ्गादिति न किञ्चिदेतत्।

अथ स्वभिन्नलिङ्गजन्यस्वसमानजातीयभेदविधेयकानुमितिविशेष्यं यद्यत्स्वं तत्तदन्यत्वमित्यनेन स्वजनकलिङ्गभिन्नत्वस्वविधेयभेदप्रतियोगिसमानजातीयत्वस्वविशेष्यकत्वैतत्त्रितयसम्बन्धेन अनुमितिमद्भिन्नत्वस्य अत्यन्तलघुभूतस्य विवक्षणात् नासर्वज्ञदुर्ज्ञेयत्वम्। इत्थमेतदपेक्षया गुरुभूतभवदीयपरिष्कारस्याप्यनुपादेयतया स्वविशेष्यकत्वविशेषणं दुर्धरमेवेति चेन्मैवम्। विशेषो

विशेषान्तराद्भिन्नः एतद्विशेष-घटान्यतरत्वादित्याद्यनुमितिमादाय असम्भवप्रसङ्गात् । विशेषस्य तादृशानुमितिजनकलिङ्गभिन्नत्वात् तद्विधेयभेदप्रतियोगिसजातीयत्वात्, तद्विशेष्यत्वाच्च । न च भवन्मतेऽप्येष दोषस्समानः, स्वभिन्नलिङ्गजन्यत्व-स्वविशेष्यकत्व-स्वसमानजातीयभेदविधेयकत्वैतत्त्रितयसम्बन्धेन विशेषविशिष्टायामनुमितौ विशेषस्य विशेष्यत्वादिति वाच्यम् । स्वभिन्नेत्यनेन स्वाविषयक - प्रतीतिविषयत्वस्य विवक्षणेन अस्माभिरुक्तदूषणप्रत्याख्यानसम्भवात् । न ह्येवं रीत्या भवन्मतेऽपि स्वजनकलिङ्गभिन्नेत्यनेन तादृशलिङ्गाविषयकप्रतीतिविषयत्व विवक्षणाद्वारणसम्भवः । एतद्विशेषे एतद्विशेषघटान्य-तरत्वविषयकप्रतीतिविषयत्वस्याक्षतत्वात् । न च तादृशलिङ्गविषयकप्रतीतिविषयताशून्यत्वस्यैव तत्पदेन विवक्षणान्नोक्तदोषः । एतद्विशेषघटान्यतरत्वविषयकप्रतीतिविषयताशून्यत्वस्य एतद्विशेषेऽभावादिति वाच्यम् । घटादीनामपि तादृशलिङ्गविषयकेश्वरज्ञानादिविषयतया तच्छून्यत्वस्याप्रसिद्ध्या असम्भव-प्रसङ्गात् ।

अथ स्वजनकलिङ्गभिन्नेत्यनेन तादृशलिङ्गविषयताव्यापकविषयताकान्यत्वस्य विवक्षणेन तत्तद्विशेषविषयताया एतद्विशेषघटान्यतरत्वविषयताव्यापकतया नासम्भवावकाशः, न वाऽप्रसिद्धिः । एतत्कपालसमवेतद्रव्यत्वादिरूपलिङ्गविषयतां प्रति घटादिविषयतायाः व्यापकत्वविरहेण घटादेस्तादृशत्वोपपत्तिरिति चेन्न । तथा सति व्यापकत्वघटनया गौरवप्रसङ्गात् । स्वविशेष्य-कत्वनिवेशनप्रयुक्तगौरवात् आनीतानामुक्तगुरुतरपरिष्काराणामभ्युपगमस्य वृश्चिकाद्भीतानामाशीविष-मुखपतनवद्धास्यतापत्तेः । एवमयं विशेषो विशेषान्तराद्भिन्नः गगनानुयोगिकसमवायादित्यनुमितिमादाय असम्भवप्रसङ्गः, विशेषस्य निरुक्तत्रितयसम्बन्धेन उक्तानुमितिविशिष्टत्वात् । मन्मते तु पूर्वपक्षिदर्शितरीत्या स्वसमानाधिकरणमात्रवृत्तिभिन्नत्वस्य स्वासामानाधिकरणवृत्तित्वपर्यवसितस्य लिङ्गविशेषणस्य निवेशनीयतया न दोषः । न चैवंरीतिर्भवतामपि सम्भवति । स्वजनकलिङ्गासमानाधिकरणवृत्तित्वस्य सम्बन्धघटकत्व-स्वीकारेऽपि उक्तदोषानिरासात्, गगनानुयोगिकसमवायासमानाधिकरणगगनवृत्तित्वाद्विशेषस्य ।

ननु तदनधिकरणसमानाधिकरणत्वमेव सम्बन्धघटकमिति गगननिष्ठविशेषस्य गगनानुयोगिक-समवायानधिकरणीभूतघटाद्यसमानाधिकरणतया न पूर्वोपदर्शितानुमितिमादाय असम्भवात्रकाशः । न च तदनधिकरणघटाभावादिसमानाधिकरणतामादाय असम्भवतादवस्थ्यमिति शङ्कनीयम् । तदनधिकरण-समवायिसमवेतत्वस्य निवेशनीयत्वात् । तथा च स्वजनकलिङ्गानधिकरणसमवायिसमवेतत्वतादृशलिङ्ग-भिन्नत्वस्वविधेयभेदसमानजातीयत्वस्वविशेष्यकत्वैतच्चतुष्टय-सम्बन्धेनानुमितिमद्भिन्नत्वस्य पर्यवसानादनुपपत्तिविरहः । न च नित्यद्रव्येऽतिव्याप्तिः, तत्र समवेतत्वविरहेण निरुक्तचतुष्टयसम्बधेन अनुमितिमद्भिन्नत्वस्य सत्त्वादिति वाच्यम् । समवेतत्वस्यापि लक्षणे निवेशनीयत्वात् । अन्यथा सर्वमतेऽपि समवायेऽतिव्याप्तिः । तत्समानजातीय- पदार्थान्तराप्रसिद्धेरिति चेन्न । शब्दान्यगगनवृत्तिः इतरभिन्नः श्रावणप्रत्यक्षाविषयत्वे सति गगनानुयोगिकसमवायात् इत्यनुमितिमादाय असम्भवस्य तावताप्यनिस्तारात् । गगनवृत्तिविशेषस्यापि उपदर्शितलिङ्गानधिकरणशब्दसमानाधिकरणत्वात् । मन्मते स्वासमानाधिकरणवृत्तित्वा-भावादेव दोषपरिहारात् । [१]अथ तद्व्यापकसामानाधिकरण्यकभिन्नत्वमेव तत् । तथा च गगनानुयोगिकसमवायं प्रति गगनवृत्तिविशेषसामानाधिकरण्यस्य व्यापकतया न तादृशसामानाधिकरण्यकभिन्नत्वं गगनविशेषस्येति नासम्भव इति चेत् , एवं सति व्यापकत्वघटनया गौरवमिति । ततश्च अस्मदुपदर्शितपरिष्कारादरणस्यैव न्याय्यतया स्वशिष्यकत्वविशेषणसार्थक्यं निष्प्रत्यूहमेव ।

---

१. लिङ्गानधिकरणसमानाधिकरणत्वेन लिङ्गव्यापकसामानाधिकरण्यकभिन्नत्वं विवक्षितमिति भावः ।

न चैवमपि घटः पटाद्भिन्नो घटत्वात्, विशेषश्च घटाद्भिन्नो निर्गुणत्वादितिसमूहालम्बनानुमितिमादाय असम्भवः, तादृशानुमितेः निरुक्तत्रितयसम्बन्धेन घटविशिष्टत्वात् तद्विशेष्यत्वाच्च विशेषस्येति वाच्यम्। मुख्यविशेष्यताद्वयशून्यत्वेन अनुमितेर्विशेषणीयत्वस्योक्तप्रायत्वात्। न च तथापि यत्र घटे पटभेदबोध-निश्चयसमन्तरं घटे पटभेदसाधकघटत्वस्य एतद्विशेषे विशेषान्तरभेदसाधकैतद्विशेषस्य च समूहालम्बनरूपपरामर्शः, तत्र तादृशपरामर्शसमनन्तरं घटभेदानुमितिजनकसामग्रीवैकल्येन विशेषे विशेषान्तरभेदविधेयकायाः समूहालम्बनानात्मिकाया एवानुमितेरुत्पत्त्या तस्यां स्वभिन्नलिङ्गज्ञान-जन्यत्वस्यापि सम्पत्त्या असम्भवतादवस्थ्यमिति वाच्यम्। स्वभिन्नलिङ्गविषयताघटितधर्मावच्छिन्न-जनकतानिरूपितजन्यत्वस्य स्वभिन्नलिङ्गजन्येत्यनेन विवक्षणीयत्वात्।

अथवा स्वभिन्नलिङ्गजन्यतावच्छेदकत्व-स्वसमानजातीयभेदविधेयतानिरूपितत्वैतदुभयसम्बन्धेन किञ्चिद्विशिष्टा या अनुमितिविशेष्यता तद्वद्भिन्नत्वं लक्षणतया विवक्षितम्। तत्र स्वविशेष्यकत्वानुपादाने विशेषो घटाद्भिद्यते गुणशून्यत्वात् इत्यनुमितिमादायासम्भवः। तादृशानुमितिनिरूपिताया विशेष-निष्ठविशेष्यताया घटभिन्नलिङ्गजन्यतावच्छेदकत्वात् घटसजातीयभेदविधेयतानिरूपितत्वाच्च। तदुपादाने च तस्य विशेष्यतागतस्ववृत्तित्वे पर्यवसानात् स्वभिन्नलिङ्गजन्यतावच्छेदकत्वस्वसमानजातीय-भेदविधेयतानिरूपितत्वस्ववृत्तित्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टानुमितिनिरूपितविशेष्यतावद्भिन्नत्वस्य लक्षणत्वसिद्ध्योपदर्शितानुमितिनिरूपितविशेषनिष्ठविशेष्यताया निरुक्तत्रितयसम्बन्धेन किञ्चिद्विशिष्टत्वविरहान्न दोषः। इत्थञ्च अनुमितौ न मुख्यविशेष्यताद्वयानिरूपकत्वं निवेश्यं, घटः पटाद्भिद्यते घटत्वात् विशेषो घटाद्भिद्यते निर्गुणत्वादिति समूहालम्बनानुमितिनिरूपितायाः विशेषनिष्ठविशेष्यताया निरुक्तसम्बन्धेन किञ्चिद्विशिष्टत्त्वविरहादेवानुपपत्त्यसंभवात्। वस्तुतो विशेष्यतायामनुमितिनिरूपितत्वं नोपादेयम्, प्रयोजनविरहात्। न च भावत्वावच्छेदेन विशेषभिन्नत्वावगाहिनिर्गुणत्वहेतुकानुमितिमादायासम्भवः, तत्र विशेषनिष्ठाया विशेष्यताया निरुक्तत्रितयसम्बन्धेन किञ्चिद्विशिष्टत्वात्। अतो भ्रमान्यनिरूपितत्वार्थ-कमनुमितिनिरूपितत्वमावश्यकमिति वाच्यम्। स्वभिन्नलिङ्गविषयताघटितधर्मावच्छिन्नजनकतेत्यत्र लिङ्ग-विषयतायां भ्रमानिरूपितत्वस्य निवेशनीयत्वात्। अन्यथा गुणशून्यत्वादिहेतुकभ्रमपरामर्शजन्यां विशेषे विशेषान्तरभेदविधेयकां प्रमानुमितिमादाय असम्भवस्य दुर्वारत्वात्। एवं स्वविशेष्यकत्वस्य विशेष्यतादात्म्यपर्यवसानमङ्गीकृत्य स्वभिन्नलिङ्गजन्यतावच्छेदकस्वसमानजातीयभेदविधेयतानि-रूपितोद्देश्यतातादात्म्योभयसम्बन्धेन प्रमेयवद्भिन्नत्वमपि लक्षणं वक्तुं शक्यम्।

एतेन (स्वभिन्नलिङ्गजन्यतावच्छेदकत्वादित्रितयसम्बन्धेन किञ्चिद्विशिष्टविशेष्यताकान्यत्वस्य लक्षणत्वोपगमेन) स्वभिन्नलिङ्गजन्यत्वस्वविशेष्यकत्वस्वसमानजातीयभेदविधेयकत्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टानुमितिविशेष्यभिन्नत्वस्य लक्षणत्वे पृथिवीत्वाभाववत् पृथिवीभिन्नं गन्धशून्यत्वात् इत्यनुमितिमादायासम्भवः। तादृशानुमितेः निरुक्तत्रितयसम्बन्धेन जलादिविशिष्टत्वात् विशेषस्यापि तद्विशेष्यत्वात्। अतो गुरुभूतमपि प्रागुपदर्शितानुमितिमद्भिन्नत्वमेवादरणीयम्। तथा सति विशेषस्य स्वविधेयकभेदप्रतियोगिसमानजातीयत्वविरहेण असंभवानवकाशात्। न च विशेष्यभेदभिन्नानेक-मुख्यविशेष्यतानिरूपिकायास्तस्याः मुख्यविशेष्यताद्वयानिरूपकत्वाभावान्नासंभव इति शङ्क्यम्। स्वनिरूपकत्वस्वावच्छेदकानवच्छेदकमुख्यविशेष्यतानिरूपकत्वैतदुभयसम्बन्धेन मुख्यविशेष्यता-वद्भिन्नत्वस्य मुख्यविशेष्यताद्वयानिरूपकपदार्थत्वात्। अन्यथा एकव्यक्तिमात्रविषयकानुमितेरेव लक्षण-

घटकतया यादृशाङ्कुरविशेषमात्रविषयकोक्तानुमितिरप्रसिद्धा तादृशाङ्कुरविशेषे अतिव्याप्त्यापत्तेरित्यपि समाहितम्। पृथिवीत्वाभाववत्पृथिवीभिन्नमित्यनुमितिनिरूपितविशेषनिष्ठविशेष्यतायाः स्ववृत्तित्वघटितो-पदर्शितत्रितयसम्बन्धेन किञ्चिद्विशिष्टत्वाभावात्।

अथ एतद्विशेषः जलपरमाणुवृत्तिविशेषाद्भिन्नः पृथिव्यनुयोगिकसमवायात्, जलसमवेतत्वाभावात् इत्याद्यनुमितिमुख्यविशेष्यतामादायासम्भवो दुर्वारः। तादृशलिङ्गस्य एतद्विशेषाविषयकप्रतीतिविषयत्वात् एतद्विशेषसमानाधिकरणेतरघटत्वादिवृत्तित्वाच्च। यत्तूक्तं केनचित् – स्वसमानजातीयभेदपदस्य स्वेतरसमान-जातीययावत्प्रतियोगिकभेदपरत्वात् नोक्तानुमितिमादाय असम्भव इति, तन्न चारु, स्वभिन्नलिङ्गजन्यत्वस्य यथाश्रुतार्थपरत्वे एतद्विशेषो विशेषान्तराद्भिद्यते एतत्परमाण्वनुयोगिकसमवायात् एतद्विशेषघटान्यतर-त्वादित्याद्यनुमितिमादाय असम्भवापत्तेः। स्वाविषयकप्रतीतिविषयस्वसमानाधिकरण-मात्रवृत्तिभिन्नलिङ्ग-जन्यत्वार्थकत्वे घटादावपि तादृशानुमितेरप्रसिद्ध्या असम्भवात्। घटत्वादेस्तत्तद्घटाविषयघटान्तंर-विषयकप्रतीतिविषयत्वेऽपि तत्तद्घटसमानाधिकरणेतरघटान्तरवृत्तित्वेऽपि च तत्तद्घटेतरयावद्द्रव्यप्रति-योगिकभेदसाधकत्वाभावात्। एतत्कपालसमवायादेस्तु तद्घटसमानाधिकरणमात्रवृत्तित्वादिति चेन्मैवम्।

स्वसमानाधिकरणपदार्थान्तरावृत्तित्वेन भेदस्य विशेषणीयत्वात्। जलपरमाणुविशेषभेदादेस्स्व-समानाधिकरणपरिमाणादिसाधारणत्वात्। घटेतरभेदादेस्स्वसमानाधिकरणपदार्थान्तरावृत्तितया तद्विधेयकघटत्वादिलिङ्गकानुमितेस्तथाविधायाः प्रसिद्ध्या नासंभवावकाशः। तथाविधो भेदः एतद्विशेषे-तरयावत्प्रतियोगिकः एतद्विशेषमात्रनिष्ठः एतद्विशेषेतरपृथ्वीसमवेतप्रतियोगिकः एतद्विशेषजलपर-माण्वादिविशेषसाधारणः, तादृशभेदसाधकत्वं न पृथिव्यनुयोगिकसमवायादेस्संभवति, घटादौ व्यभिचारात्। किं तु समवेतत्वे सति सदन्यत्वे सति एतत्परमाण्वितरासमवेतत्वादेः तत्साधकत्वसंभवेऽपि तस्य न स्वसमानाधिकरणमात्रवृत्तिभिन्नत्वमिति न काचिदनुपपत्तिः।

न चैवं सति विशेषो द्रव्यभिन्नो गुणशून्यत्वादित्यनुमितिमादाय दोषाप्रसक्त्या स्वसमानजातीय-प्रतियोगिकत्वनिवेशनमनर्थकमिति शङ्क्यम्। विशेषो विशेषेतराद्भिन्नः समवेतत्वे सति सामान्यान्यत्वे सति सामान्यशून्यत्वादित्यनुमितिमादाय प्रसक्तासंभववारणाय तदावश्यकत्वात्। तथा हि विशेषेतरभेदस्य स्वसमानाधिकरणपदार्थान्तरावृत्तितयोपदर्शितलिङ्गस्य निरुक्तविशेषणद्वयाक्रान्ततयोक्तानुमितिमादायासंभवः, स्वसमानजातीयप्रतियोगिकत्वानिवेशान्न वार्यते, विशेषेतरस्य विशेषसजातीयत्वाभावात्। यदि च पृथिवीवृत्तिविशेष इतरभिन्नस्सामान्यान्यत्वे सति सदन्यत्वे सति पृथिव्यनुयोगिकसमवायादित्यनुमिति-मादायासंभवः, तत्र लिङ्गस्य स्वासमानाधिकरणविशेषान्तरवृत्तित्वात् भेदस्य च स्वसमानाधिकरण-पदार्थान्तरावृत्तित्वादिति विभाव्यते; न चान्यादृशं ज्यायांसं परिष्कारमाचक्ष्महे। स्वभिन्नलिङ्गजन्येत्यस्य स्वविशेष्यकलिङ्गज्ञानजन्यत्वमर्थः, तच्च समासे प्रथमनिर्दिष्टतया स्वविशेष्यकस्वसमानजातीय-भेदविधेयकानुमितित्वावच्छिन्नविधेयं, ततश्चोद्देश्यविधेयभावमहिम्ना तादृशानुमितित्वे स्वविशेष्य-कलिङ्गज्ञानजन्यत्वव्याप्यत्वलाभात् स्वविशेष्यकलिङ्गज्ञानजन्यत्वव्याप्यतादृशानुमितित्वाश्रयविषयभिन्नत्वं स्वविशेष्यकस्वसजातीयभेदविधेयकानुमितित्वव्यापकस्वविशेष्यकलिङ्गज्ञानजन्यत्वकं यद्यत् स्वं तत्तदन्यत्वं फलितं लक्षणं सिद्ध्यति। भवति च घटादिकं तथाविधम् स्वम्। घटादिविशेष्यकेतरभेदानुमित-र्घटादिविशेष्यकलिङ्गज्ञानजन्यत्वनियमात्, विशेषस्तु न तथाविधं स्वं, परमाणुषु परमाणुभेदानुमितिः यत्किञ्चित्प्रमाजन्या, प्रमाजन्यानुमितित्वात् "द्व्यणुकारम्भप्रयोजकः परस्परभेदः यत्किञ्चिल्लिङ्गज्ञानज्ञाप्यः

भेदत्वात् घटादिभेदव"दिति विशेषग्राहकानुमानात् सिद्ध्यतो लिङ्गस्य व्यावर्तकान्तरव्यावृत्तत्वेऽन-वस्थागौरवमिति गौरवज्ञानसहिताया ज्ञायमानाया अनुमितेर्विशेषेषु परस्परभेदानवगाह्यैव ज्ञायमानतया तत्र विशेषविशेष्यकलिङ्गज्ञानजन्यत्वविरहादिति लक्षणसमन्वयः । तत्र स्वविशेष्यकत्वानुपादाने स्वसमानजातीयभेदविधेयकानुमितित्वावच्छिन्न एव स्वविशेष्यकलिङ्ग-ज्ञानजन्यत्वान्वयात् स्वसमानजातीयभेदविधेयकानुमितित्वव्यापकस्वविशेष्यकलिङ्गज्ञानजन्यत्वकं यद्यत्स्वं तत्तदन्यत्वं लक्षणं पर्यवस्येत्, तथा चासंभवः । घटेतरभेदविधेयकायाः पटाद्युद्देश्यकाया अनुमितेर्घटविशेष्य-कलिङ्गज्ञानजन्यत्ववैधुर्यात् , घटादेरपि स्वपदेनोपादातुमशक्यत्वात् । अतः स्वविशेष्यकत्वोपादानम् । स्वसमानजातीयभेदविधेयकत्वानुपादानेऽपि स एव दोषः । स्वविशेष्यकायाः नीलघटत्वाद्यन्यपर्वतो वह्निमान् इत्याद्यनुमितेः घटविशेष्यकलिङ्गज्ञानजन्यत्वविरहात् ।

न च स्वमुख्यविशेष्यताकानुमितित्वस्य लक्षणघटकतया न दोषः । असम्भवतादवस्थ्यात् । प्रागुपदर्शितविशेषविषयकानुमितेः विशेषमुख्यविशेष्यकत्वविरहात् । विशेषमुख्यविशेष्यकानुमित्यन्तराणां तद्विशेष्यकलिङ्गजन्यत्वनियमात् । अतस्तदुपादानम् । न च तस्य (स्वसजातीयेतरभेदविधेयकत्वस्य) उपादानेऽपि प्रागुपदर्शितानुमितौ परस्परभिन्नलिङ्गप्रमाजन्यत्वस्य तादृशलिङ्गज्ञाप्यत्वस्य वा विधयेत्वं, न तु परस्परभेदस्य । एतस्य विधेयत्वन्तु अयं विशेषो विशेषान्तराद्भिन्न इत्याद्यनुमित्यन्तर एव । तत्र च स्वविशेष्यकलिङ्गज्ञानजन्यत्वमावश्यकमेवेत्यसम्भवः । यदि च स्वसमानजातीयभेदप्रकारकत्वमेवोपादीयते तदाऽपि इतरभिन्नघटवान् पर्वत इत्याद्यनुमितेः घटविशेष्यकलिङ्गजन्यत्वस्य विरहात् स्वपदेन उपादेयस्याप्रसिद्ध्या असंभव इति शङ्क्यकम् । विधेयकोटिप्रविष्टानामप्यनुमितेः प्रागसिद्धानां विधेयत्वस्य सिद्धान्तसिद्धतया तादृशानुमितौ विशेषेषु इतरभेदस्यापि विधेयत्वोपपत्तेः ।

ननु स्वविशेष्यकत्वस्थाने स्वोद्देश्यकत्वनिवेशादेव समाञ्जस्ये समानजातीयभेदविधेयकत्वोपादा-नमनर्थकम् । न च घटे रूपमित्याद्यनुमितेर्घटोद्देश्यकायास्तद्विशेष्यकलिङ्गज्ञानजन्यत्वविरहात् स्वपदेनोपादेयस्य अप्रसिद्ध्या असम्भव इति वाच्यम् । स्वनिष्ठविषयतानिरूपितलिङ्गनिष्ठविधेयता-शालिज्ञानजन्यत्वस्यैव व्यापकत्वेन विवक्षणीयत्वात् । अन्यथा स्वसमानजातीयभेविधेयकत्वोपादानेऽपि घटे इतरभेद इत्यनुमितिमादाय अप्रसिद्धिप्रसङ्गात् । घटत्वस्यापि तत्र घटं प्रति विशेष्यत्वात्, विधेयतायाः प्रकारतानात्मकतया तत्र स्वविशेष्यतानिरूपितत्वस्यापि निरूपयितुमशक्यत्वात् इति चेन्मैवम् । स्वसमानजातीयभेदविधेयकत्वानिवेशे इश्वरीयानुमितौ अतिव्याप्तेः । तथाहि – क्षित्यङ्कुरादौ कृतिजन्यत्वावगाहिन्यामनुमितौ लाघवज्ञानसहकारात् कृतौ नित्यत्वैकत्वयोरपि भानादुक्तयुक्त्या तयोरपि विधेयतया तदंशे कृतेरुद्देश्यतया स्वोद्देश्यकानुमितित्वाक्रान्तायां तस्यामनुमितौ स्वनिष्ठविषयतानिरूपित-लिङ्गनिष्ठविधेयताशालिज्ञानजन्यत्वविरहात् तस्यापि न स्वपदेनोपादानसम्भव इति । स्वसमानजातीय-भेदविधेयकत्वोपादाने तु उपदर्शितानुमितेरेकत्वादिविधेयकायाः स्वसमानजातीयभेदविधेयकत्वविरहेण तादृशभेदविधेयककृत्युद्देश्यकानुमित्यन्तराणां तादृशलिङ्गजन्यत्वनियमेन कृतेरपि स्वपदेनोपादेयतया नातिव्याप्त्यवकाशः । न च [१]स्वाधिकरणवृत्तिस्वभिन्नज्ञानभिन्नत्वादिरूपस्य एकत्वस्य स्वसमान-जातीयभेदरूपतया तद्दोषतादवस्थ्यम् । स्वसमानजातीययावत्प्रतियोगिकभेदविधेयकत्वस्यैव लक्षण-

---

१. स्वभिन्नं यद्यत्स्वाधिकरणवृत्ति (ज्ञानादि), तत्तन्निष्ठगुणविभाजकोपाध्यवच्छिन्नप्रतियोगिताकभेदकूट एवात्रैकत्वमिति भावः ।

घटकत्वात् । व्यापकदिशि स्वनिष्ठविषयताशालिज्ञानजन्यत्वमात्रस्य निवेशेऽसंभवः । विशेषस्यापि स्वपदेनोपादातुं शक्यत्वात् । विशेषग्राहकानुमितेरपि किञ्चिल्लिङ्गत्वेन विशेषावगाहिज्ञानजन्यत्वात्, अतो लिङ्गविषयतानिवेशः । तथा च स्वसमानजातीययावत्प्रतियोगिकभेदविधेयतानिरूपितस्वनिष्ठोद्देश्यता-शाल्यनुमितित्वव्यापकस्वनिष्ठविषयतानिरूपितव्याप्त्यवच्छिन्नविषताशालिजन्यत्वकं यद्यत्स्वं तत्तदन्यत्वं लक्षणं पर्यवसितम् । तेन ज्ञानस्य क्वचित् स्थिरत्वेऽपि, विशेषग्रहाकानुमितौ विशेषनिष्ठविषयतानिरूपितज्ञान-निष्ठविषयताशालिज्ञानजन्यत्वेऽपि च न क्षतिः । न चाङ्कुरादिकं नित्यैककृतिजन्यं, घटश्च गुणभिन्न इति समूहालम्बनानुमितेरीश्वरीयकृतिसजातीययावत्प्रतियोगिकभेदविधेयकत्वेऽपि तत्रातिव्याप्तिः ।

एतेन अनुमितिमद्भिन्नत्वपरिष्कारे न स्वविषयताव्यापकविषयताकान्यत्वं सम्बन्धघटकम् । स्वाविषयकयत्किञ्चित्प्रतीतिविषयत्वं स्वविषयकप्रतीतिनिष्ठाभावीयविषयतासम्बन्धावच्छिन्न-प्रतियोगिताकत्वमेव । एतद्विशेषघटान्यतरत्वादिविषयिण्यां प्रतीतौ क्वचिदपि विषयतासम्बन्धावच्छिन्न-प्रतियोगिताकविशेषाभावासत्त्वात् न दोषः । स्वव्यापकसामानाधिकरण्यकभिन्नत्वमपि न सम्बन्धघटकम् , किन्तु स्वाधिकरणनिष्ठाभावीयसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमेव । तथा च गगनानुयोगिकसमवायविशेषे क्वचिदपि सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकगगनविशेषाभावा-सत्त्वान्न दोषः । इत्थञ्च गौरवलेशाभावादुक्तपरिष्कारादरणसम्भवे स्वविशेष्यकत्वं व्यर्थमेवेत्यपास्तम्। ईदृशपरिष्कारेऽपि प्रागुपदर्शितासम्भवसम्भवेन तादृशानुमितित्वव्यापकत्वादिपरिष्कारस्यादरणीयतया स्वविशेष्यकत्वसार्थक्यस्याव्याहतत्वात् । परन्त्वेवं सति असर्वज्ञदुर्ज्ञेयत्वं लक्षणस्य । तच्च स्वसमानजातीयभेदविधेयकस्वोद्देश्यकानुमितित्वव्यापकजन्यतानिरूपितजनकतावच्छेदकव्याप्त्यवच्छिन्न-विषयतानिरूपितविषयत्वसम्बन्धेन प्रमेयवद्भिन्नत्वस्य लक्षणत्वं स्वीकृत्य वारणीयम् ।

अथ वा [१]स्वत्वासमाश्रयस्वविषयकलिङ्गज्ञानजन्यस्वविशेष्यकस्वसमानजातीयभेदविधेय-कानुमित्यविषयत्वस्य स्वविषयकलिङ्गज्ञानजन्यतानवच्छेदकत्वस्वसजातीयभेदविधेयतानिरूपितत्व-स्ववृत्तित्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टा या अनुमित्युद्देश्यता तत्पर्यवसितस्य लक्षणत्वसम्भवात् न कश्चिद्दोषः । अत्र घटो गुणभिन्न इत्याद्यनुमितौ स्वपदेन गुणादिकमादाय घटादावसम्भववारणाय स्वविशेष्यकत्वपदमिळित (लब्ध) स्ववृत्तित्वोपादानमिति दिक् ।

---

१. अनुमित्यविषयत्वे स्वत्वासामानाधिकरण्योक्त्या स्वत्वस्य अनुयोगिनिविष्टत्वाभावः (प्रतियोगिप्रविष्टत्वं) ज्ञायते ।

प्रधानप्रतितन्त्रदर्पण-
पीठिका

डॉ. एन्. आर. शठकोपताताचार्यः
प्राध्यापकः, न्यायविभागे, श्रीजगन्नाथ सं.वि.वि. पुर्याम्

अयं किल प्रधानप्रतितन्त्रदर्पणाख्यलघुग्रन्थः चतुस्तन्त्रपाण्डित्यमण्डितैः तत्त्वमार्ताण्डाद्यनेक-प्रौढग्रन्थनिर्मातृभिः विद्वत्सार्वभौमैः सुरपुरश्रीनिवासार्यवर्यैः व्यरचि । अत्र विशिष्टाद्वैतवेदान्तस्य 'सर्वेषां वाचकानां शब्दानामचिज्जीवविशिष्टपरमात्मवाचकत्व'मित्यसाधारणसिद्धान्तस्य स्थापनं सप्रमाणं व्यधायि । विशिष्टाद्वैते भगवान् पुरुषोत्तम एव सर्ववेदवेद्यः स एव सर्वफलप्रदाता, कृत्स्नस्य कर्मकाण्डस्यापि भगवदाराधनरूपत्वं, तत्तदसाधारणलिङ्गसहितानामिन्द्रादिपदानां तच्छरीरक-परमात्मपरत्वं, चिदचिदात्मकस्य कृत्स्नस्यापि प्रपञ्चस्य तच्छरीरत्वं, मुख्यवत्त्या ब्रह्मण एव सर्वशब्दवाच्यत्वं चेत्यादयः प्रतितन्त्रसिद्धास्सिद्धान्ताः वर्तन्ते । तत्र प्रमाणानि–"सर्वे वेदा यत्पदमामनन्ति । सर्वे वेदा यत्रैकं भवन्ति । वेदैश्च सर्वैरहमेव वेद्य इत्यादिश्रुतिस्मृतयः सर्ववेद- वेद्यत्वे, "स वा एव महानज आत्माऽन्नादो वसुदानः" "एष ह्येवानन्दयाति" इत्यादय सर्वफलप्रदत्वे, "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेत्यादयः कृत्स्नस्य कर्मणः भगवदाराधनरूपत्वे, उपक्रमे "इन्द्रस्य प्रियं धामोपजगाम" "प्राणोऽस्मि प्रज्ञात्मा" इतीन्द्रप्राणशब्दाभ्यां प्रस्तुतस्य "स एष प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृत" इत्यानन्दाजरामृतशब्दसामानाधिकरण्येनानुगमः तत्तदसाधारण-लिङ्गसहितानामिन्द्रादिपदानां तच्छरीरकपरमात्मपरत्वे, "यस्य पृथिवी शरीरं, यस्यापश्शरीरमित्यादयः कृत्स्नस्य प्रपञ्चस्य परमात्मशरीरत्वे, 'अनुप्रविश्य नामरूपे व्याकरवाणि'' "नामानि सर्वाणि यमाविशन्ति" इत्यादयः ब्रह्मणः मुख्यवृत्त्या सर्वशब्दवाच्यत्वे च प्रादर्शिषत ।

अस्मिन् ग्रन्थे उपनिषदि 'सदेवेदं', 'सर्वं खल्विदं', 'पुरुष एवेदं, 'ब्रह्मैवेदम्,' 'आत्मैवेदं', 'तत्त्वमसि' ,ब्रह्मास्मि' इति सामान्येन विशेषेण च ब्रह्मणः प्रपञ्चसामानाधिकरण्येन यो व्यपदेशः श्रूयते स भाक्त उत मुख्यो वेति प्राधान्येन विचार्यते । तत्र गोत्वविशिष्टव्यक्तिपर्यन्तबोधकत्वेन गुणविशिष्टगुणिपर्यन्तबोधकत्वेन शरीरविशिष्टात्मपर्यन्तबोधकत्वेन लोके प्रसिद्धानां जातिगुणशरीरवाचिनां गोशुक्लदेवादिशब्दानां 'खण्डो गौः, 'शुक्लः पटः', 'देवोऽहम्' इति सामानाधिकरण्यं यथा मुख्यत्वेन सर्वानुभवसिद्धं तथा उपदर्शितमौपनिषदमपि सामानाधिकरण्यं मुख्यमेव । मुख्यसामानाधि-करण्यप्रयोजकस्य अपृथक्सिद्धप्रकारवाचित्वस्य अत्रापि सत्त्वात् । प्रपञ्चस्य ब्रह्मापृथक्सिद्धत्वं च 'यस्यात्मा शरीरं, यस्य पृथिवी शरीरम्' इत्याद्युपनिषद्वाक्यैः चेतनाचेतनात्मकस्य जगतः ब्रह्मशरीरत्वप्रतिपादनात्सिद्धम् ।

इदञ्च सामानाधिकरण्यस्य मुख्यत्वं "चराचरव्यपाश्रयस्तुत्वास्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्" इत्यधिकरणे भगवता श्रीभाष्यकृता प्रत्यपादि । अत्र दृष्टान्तीकृतस्य 'शुक्लः पट' इत्यादिसामानाधि-करण्यस्यापिमुख्यत्वं सोपपत्ति ग्रन्थकृता न्यरूपि ।

श्रीमदण्णयार्यमहादेशिकाय नमः

श्रीनिवासार्यविरचितम्

प्रधानप्रतितन्त्रदर्पणम्

अशेषदोषैकमुषे विदुषां श्रेयसां पुषे।
चिदचिद्वस्तुवपुषे नमस्कुर्मो मधुद्विषे।।
स्वापृथक्सिद्धसर्वार्थस्तद्वाचिपदवाच्यताम्।
गुणिव्यक्त्यादिवद्विन्दन्मुकुन्दोऽस्तु मुदे मम।।

इह खलु भगवान् बादरायणः सर्वे वेदा यत्पदमामनन्ति'' सर्वे वेदा यत्रैकं भवन्तीति श्रुतिसिद्धं वैदैश्च सर्वैरहमेव वेद्य, इति गीतोपबृंहितं भगवतस्सर्ववेद्यत्वं प्रतितिष्ठापयिषुः फलमत उपपत्तेरिति भगवतस्सर्वकर्मफलप्रदत्वप्रतिपादनमुखेन[1] ''वायुमेव स्वेन भागधेयेनोपधावति'' ''स एवैनं भूतिं गमयति' ''तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयती''ति तत्तत्कर्मकाण्डस्थवाक्यप्रतिपन्नं तत्तत्कर्मसमाराध्यदेवतानां फलप्रदत्वं भगवत्पर्यन्तमिष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिरिंति वेदान्तवाक्यप्रतिपन्नं, तत्रोत्पत्तिशिष्टाग्न्याद्युपरोधपरिहाराय तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमा '' इत्युत्तरवाक्येन तद्वाच्याग्न्यादिदेवतानां भगवद्वाचिताप्रतिपादनमुखेन प्रतिष्ठापितं[2] निरूप्य तेन कर्मकाण्डस्य कृत्स्नस्य भगवत्पर्यन्ततां प्रख्याप्य ब्रह्मकाण्डस्य तत्पर्यन्ततां 'अथाऽतो ब्रह्मजिज्ञासा इति प्रतिज्ञाय तदुपयोगितया जगत्कारणतां तद्गतां प्रतिपाद्य तत्प्रकारविशेषं निमित्तोपा-दानस्वरूपं निरुरूपयिषुः प्रत्यक्षादेस्तदनवगमकत्वात् शास्त्रैकप्रमाणकत्वम् (तदुप-पादकम्) अभिधाय तद्वाक्यगतानामाकाशादिपदानामन्यतापरताभ्रमसम्पादकानां 'आकाशस्तल्लिङ्गात्' अत एव प्राणः' इत्यादिभिः यौगिकव्युत्पत्त्या परमात्मपरतां प्रतिपाद्य तत्तदसाधारण- लिङ्गसहितानामिन्द्रादिपदानां तत्तलिङ्गानुग्रहाय तत्तच्छरीरकपरमात्मपरतां प्रतिपाद्य तत्र सर्वशरीरताप्रतिपादकमन्तर्यामि-ब्राह्मणादिकमुपष्टम्भकतया परिगृह्य शास्त्रदृष्ट्या आत्मसिद्धिमभिप्रेत्य अनुप्रविश्य नामरूपे व्याकरवाणि' नामानि सर्वाणि यमाविशन्ती' त्यादिश्रुतिप्रतिपन्नं भगवतश्च-राचरात्मक कृत्स्नप्रपंचवाचिशब्दबोध्यत्वं मुख्यया वृत्त्येति वक्तुं चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वादित्याह। तद्व्यवस्थापयितुं प्रकरणमिदमारभ्यते।

---

1. अस्य निरूप्येत्यनेनान्वयः

2. इदं भगवत्पर्यन्तं फलप्रदत्वमितिपूर्वोक्तस्य विशेषणम्।

वेदान्तेषु तावत्सर्वजगत्कारणभूतं ब्रह्म 'सदेवेदं' 'ब्रह्मैवेदं' 'आत्मैवेदं' पुरुष एवेद– मित्यादिषु सामान्यतः' तत्त्वमसि' 'ब्रह्मास्मीत्यदिषु विशेषतः प्रपञ्चसामानाधिकरण्येन व्यपदिश्यते। पुराणेषु च जगच्च सत्' ज्योतींषि विष्णुर्भुवनानि विष्णुरित्यादिषु तथैव व्यवह्रियते। विलक्षणस्वरूपयोश्च सामानाधिकरण्यं च क्वचिद्व्यपदिश्यते आदित्यो यूपः' 'गौर्वाहीक' इत्यदौ दृश्यत इति चेत् सत्यं दृश्यते। सादृश्यनिबन्धनोऽयं गौणः न मुख्यः। न चेहापि तथा, प्रचुरव्यवहारस्य गौणत्वासंभवात्। हेयप्रत्यनीकस्वभावस्य समस्तहेयास्पद– प्रपञ्चेन सर्वथा सादृश्यासंभवाच्च, न तत्समाभ्यधिकश्चेति सादृश्यविवक्षाया असंभवाच्च। यूपविधिशेषत्वस्येवेह विधयन्तरशेषत्वस्यादर्शनाच्च। न चदृष्टिविधिकल्पना, नाम ब्रह्मेत्युपासीतेतिवत् विधि– शब्द तदुपास्यादर्शनात्, बहु स्यामित्यादिषु तथाकल्पनायोगाच्च।

नाप्युपादानोपादेयभावेन मृद्घट इत्यादाविव सामानाधिकरण्यं निर्वोढुं शक्यम्। तद्विकारस्य ब्रह्मण्यसंभवात्। न च चिदचिद्विशिष्टवेषेणोपादानत्वात् सामानाधिकरण्यम्। दण्डकुण्डलवत् स्वनिष्ठानां द्रव्याणां मत्वर्थीयनिरपेक्षत्वायोगेन प्रपञ्चवाचिनस्सर्वेदं. शब्दादेरमत्वार्थीयान्तस्य केवलेन ब्रह्मवाचिना सामानाधिकरण्यायोगात्।

एतेनेदंसर्वशब्दादेस्स्थूलाकारप्रपञ्चविशिष्टब्रह्मवाचित्वात् ब्रह्मशब्दस्य सूक्ष्मचिदचिद्विशिष्टब्रह्मवाचित्वात् सामानाधिकरण्यमिति निरस्तम्। ब्रह्मशब्दस्य चिदचिद्विशिष्टवाचित्वासिद्धेश्चेति।

अत्रेदं तत्वं– खण्डो गौश्शुक्लो घट इत्यादौ जातिगुणशब्दास्तत्तद्– व्यक्तिगुणिपर्यन्त– सामानाधिकरण्ये मत्वर्थीयनिरपेक्षो दृश्यते। न चासावमुख्य इति कस्यापि प्रतिपत्तिः। तत्कस्य हेतोः ? न तावज्जातिवाचित्वात्, गुणवाचिष्व– व्यापनात्। अत एव न गुणवाचित्वादपि। जातिवाचिष्वव्यापनात्। नाप्यन्यतरवाचित्वात्, देवो मनुष्यो योषित् षण्डो जातः पुरुष इति लौकिकवैदिकद्रव्य वाचिपदसमानाधिकरणप्रयोगाव्यापनात्। न च हेयभ्रमोऽयं, विवेकिनामपि तथा प्रयोगप्रत्यययोर्दर्शनात्। अतोऽपृथक्सिद्ध– विशेषणवाचित्वमेकं सर्वानुगतं तन्निमित्तमादर्तव्यम्। तथा च श्रीमद्भाष्यं "जातिगुणयोरपि द्रव्यप्रकारत्वमेव, खण्डो गौश्शुक्लः पट इति सामानाधिकरण्यं सर्वत्रानुगतमिति प्रकारत्वं सामानाधिकरण्यनिबन्धनं, न परस्परव्यावृत्ता जात्यादय इति।

इदमत्राकूतम् – अनुगतस्य प्रयोगस्य सर्वप्रयोगानुगतं निमित्तं वक्तव्यम्। गुणवाचित्वं जातिवाचित्वं तदन्यतरद्वा न सर्वसामानाधिकरण्यानुगतम्। देवो मनुष्यः पुरुषो योषिदात्मा ज्ञात इत्यादि प्रयोगाननुगतत्वात्। अपृथक्सिद्धप्रकारवाचित्वं तु सर्वप्रयोगानुगुण्येन निमित्तमिति न प्रयोगस्य गौणत्वकल्पनं युक्तम्। तथा सति जातिवाचित्वं गुणवाचित्वं वा निमित्तमाश्रित्य तदन्यतरघटितप्रयोगस्यापि गौणत्वं लाक्षणिकत्वं वा प्रसज्येत।।

नन्विष्टमेवैतत्, गुणवाचिनां शुक्लादिपदानां गुणिलाक्षणिकत्वस्य कैश्चि. दङ्गीकारात्। अत एव गुणवचनेभ्यो मतुपो लुग्वचनं शिष्यते। अन्यथा

जातिवाचिनामिव गुणवाचिनामपि विनैव मतुब्लोपं द्रव्यपर्यन्तप्रयोगोपपत्त्या तद्विधिवैयर्थ्यप्रसङ्गादिति चेदुच्यते--

जातिवाचिन इव गुणवाचिनोऽपि शब्दा अपृथक्सिद्धप्रकारवाचित्वात् गुणिपर्यन्ता एव। प्रत्ययस्तु न गुणिपर्यन्तार्थः, अपि त्वन्यार्थः। तथा च टीका--प्रत्ययस्तु द्विशब्दस्थ द्विवचनवत् प्रकृत्यनतिरिक्तार्थः, त्रिलिङ्गतया शब्दसाधुत्वाय स्वरविशेषाय च भवति। अत एव गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति नैघण्टुकाः।''यतस्स्वत एव गुणिपर्यन्तानां गुणवाचिपदानां लिङ्गस्वरार्थं मतुब्लोपस्मरणं, न तु गुण्यसन्निधाने शक्तिविरहिणां गुण्यभिधानार्थम्। अत एव हि रागशब्दस्य रक्तपदतुल्यतया प्रयोगाभाव इति। अतएव नीलशुक्लादयश्शब्दा गुणिपर्यन्तास्तावत्प्रयुज्यन्ते। तत्र गुण एव तावत्प्रवृत्तिनिमित्तम्, नैल्यं नीलिमेति भावप्रत्ययेन गुणप्रत्ययात्। भावो हि प्रवृत्तिनिमित्तं, भवत्यस्मादभिधानं शब्दस्येति व्युत्पत्तेः। यस्य हि भावात् द्रव्ये शब्दविशेषस्तदभिधाने त्वतलाविति वार्तिकम्। अतो गोत्वमित्यादिभावान्तप्रयोगात् जातिनिमित्तकत्ववदुक्त- भावान्तप्रत्ययात् गुणोऽपि निमित्तमास्थेयः।

एतेन नीलत्वजातिनिमित्तकतया एकशक्तिवादोऽपि निरस्तः। साक्षात्तदाश्रयत्वस्य गुणिन्यभावात्। पारंपर्यनियमनीयाभावेन परम्परया तदाश्रयत्वस्यातिप्रसङ्गित्वाच्च। संबन्धिद्वयसमवायावच्छिन्नापृथग्भावनियमवत्प्रतियोगिकसाक्षात्परंपरान्यतरसंबन्धावच्छिन्नप्रवृत्तिनिमित्ताश्रयताकत्वमपि न। रूपवतो रूपशब्दशक्त्येकत्वप्रसङ्गेनाति-प्रसङ्गित्वात्। शुक्लः पट इत्यादौ गुणवैशिष्ट्यानुभवविरोधेन जातिनिमित्तकत्वकल्पनानुपपत्तेश्च। भावप्रत्ययेन तस्यैवाभिधेयत्वप्रसङ्गाच्च। न चैतदिष्टं, पूरणगुणेतिसूत्रे काकस्य कार्ष्ण्यमित्युदाहरणविरोधात्, शौक्ल्यादिपदे गुणप्रतिपत्तिविरोधात्, संसर्गान्तर्गतगुणस्य भावप्रत्ययानवगम्यत्वाच्च। परंपराविशेषः क्वचित्तदाश्रयत्वं क्वचित्तदनाश्रयत्वमित्यत्र नियामकानुपलम्भनात् समानाधिकरणप्रयोगस्यैव तन्नियामकत्वेऽन्योन्याश्रयात् लुगनुशासनस्य जातिनिमित्तकत्वकल्पनाविरोधाच्च। एतेन जातिनिमित्तक एवासौ गुणे वर्तते तदभेदात्तु द्रव्य इति केषांचित्कल्पनापि निरस्ता।

लुगनुशासनप्रयोजनविचारः

ननु द्विविधाश्शुक्लादयश्शब्दाः गुणवचनाः गुणिपर्यन्ताश्च। तत्र गुणमात्रवाचिभ्यो रूपवानितिवत् शुक्लवानिति मा प्रसाङ्क्षीदिति लुगनुशासनमर्थवदिति चेन्मैवम्। क्वचिद्गुणिपर्यन्तप्रयोगस्य गुणनिमित्तकशब्देनैवोपपत्तौ तदर्थंलुगनुशासनस्य वैयर्थ्यात्। अतस्स्वरार्थमेव लुगनुशासनम्। विशेष्यलिङ्गार्थं च गुणे शुक्लादयः पुंसीत्युच्यते। अतस्तेषां विशेष्यसमभिव्याहारे घञन्ततयाऽन्यलिङ्गाव्यभिचारे प्राप्ते स्वलिङ्गव्यभिचारेण विशेष्यलिङ्गग्राहित्वाय लुगनुशासनम्। गुणप्रवृत्तिनिमित्तमात्रेण तत्सिद्धेः। द्रव्यपर्यन्ततायां तत्संभवेऽपि शुक्लरूपं रक्तरूपमित्यादौ गुणिगुणान्वयाभावेन तेन तदनिर्वाहात्। न च मत्वर्थासंभवः, प्रकृत्यनतिरिक्तार्थस्यैव तस्य संभवात्।

तदिदमुक्तं 'द्विशब्दस्थ– द्विवचनवत्प्रकृत्यनतिरिक्तार्थ' इति। संबन्धिनि हि मतुबनुशिष्यते। अभेदोऽपि हि सम्बन्धः। अतो गुणेऽपि विशेष्ये मतुबन्ताश्शुक्ला–दयश्शब्दा लुप्तमतुबन्तविशेष्यलिङ्गाः प्रवर्तन्तामित्येवमर्थं लुगनुशासनम्। विशिष्टाविशिष्टवाचिनोस्समं गुणिलिङ्गास्तु तद्वतीत्यपि गुणे गुणिनि वा विशेष्यवाचकपदे समानाधिकरणे प्रयुक्ते समानलिङ्गकानि प्रयोक्तव्यानीत्यर्थकम्।

एतेन दण्डीत्यादाविव जातिविशिष्टवैशिष्ट्यबोधनाय लुगनुशासनमित्यपि निरस्तम्। गुणनिमित्तकतोक्त्यैव तत्सिद्धेः। न हि जातिवत् गुणः स्वरुपेण निमित्तमपि तु स्वासाधारणशुक्लत्वादिवैशिष्ट्येन।

एतेन लक्षणानियमार्थं लुगनुशासनमित्यपि निरस्तम्। भावप्रत्ययान्तविरहात्, भावेतरगुणस्य भावान्तेन बोधनानुपपत्तेः। न हि तत्पदजन्यबोधप्रकारमात्रं भावः काकेभ्यो दधि रक्ष्यतामित्यादौ दध्युपघातादेः काकत्वमित्यस्मात् बोधापत्तेः। लाक्षणिकानां गङ्गादिपदानां स्वलिङ्गाव्यभिचारदर्शनेन तथा विशेष्यलिङ्.गत्वानुपपादनाच्च। विवृतं चैतदरूणाधिकरणमञ्जर्याम्। अतो जातिवाचिनामिव गुणवाचिनामपि अपृथक्सिद्धप्रकारवाचित्वादेव गुणिपर्यन्तता व्यक्तिपर्यन्ततेव दुस्त्यजाश्रयणा। तद्वच्छरीरवाचिनामपि देवमनुष्यादिपदानामपृथक्सिद्धविशेषण वाचितया आत्मपर्यन्तत्वं मुख्यमेव।

जातिवाचकं पदं व्यक्तौ लाक्षणिकमितिभट्टमतानुवादः तन्निरासश्च

ननु सिद्धमसिद्धेनेति न्यायोऽयं यद्गवादिदृष्टान्तेन देवादिपदानामात्म–पर्यन्तताकल्पनं, जातिगुणवाचिनामपि संबन्धानुपपत्तिप्रयुक्तव्यक्तिगुणिपर्यन्त–बोधकताकानां गङ्गादिपदवल्लाक्षणिकत्वौचित्यात्। जातिगुणयोः प्रथमप्रतीत–योरानयनाद्यन्वयानर्हत्वात् तत्सबन्धाच्च व्यक्तिगुणिनौ लक्षणया बोध्येते। अन्यथासिद्धेश्च प्रयोगो न शक्तिकल्पकः। न च भावप्रत्ययानुपपत्तिः नीलोत्पलत्वं द्विरेफत्वमित्यादाविव लाक्षणिकत्वेप्युपपत्तेः। अतस्तद्वदिहापि लाक्षणिकत्वमेव युक्तम्। अन्यथा जाति– गुणादिशब्दानामपि व्यक्तिगुणिपर्यन्तता दुर्वारा स्यात्। अपृथक्सिद्धवाचित्वाविशेषादिति चेत्तुल्यमेतल्लक्षणापक्षेऽपि, जातिगुणयोस्सं–बन्धानुपपत्त्यविशेषात्।

ननु पारतन्त्र्यबोधनाबोधनाभ्यां विशेषः, गवादयो हि शब्दाः जात्यादेर्व्यक्ति–पारतन्त्र्यमभिदधति, जात्यादिशब्दास्तु नेति चेन्मैवम्। जात्यादिशब्दे व्यक्तिपारतन्त्र्याप्रतिपत्तौ द्रव्यविलक्षणजातिप्रतीत्यनुपपत्तेः। जातित्वस्य नित्यानेकवृत्तिरूपतया तत्त्वेन प्रतिपत्तौ व्यक्तिपारतन्त्र्याप्रतीत्यनुपपत्तिश्च।

ननु न द्रव्यप्रकारतैकस्वभावपारतन्त्र्याबोधकत्वमिह विवक्षितम्। किन्तु विशेषणान्वयकारकभावानर्हत्वलक्षणपारतन्त्र्याबोधकत्वम्। अतो नोक्तदोषः। उच्यते, गवादिपदैस्तादृशत्वबोधनमेकेन पदेन विशेष्याभिधानप्रयुक्तम्। न हि कुण्डलीत्युक्ते कुण्डलस्य रूचिरत्वादिविशेषणान्वयः। न वा कुण्डलेन भूषित इत्यत्रेव कारकभावः।

एवं च पारतन्त्र्या– बोधनात् व्यक्त्यबोधकत्वेनान्योन्याश्रयः, पारतन्त्र्याबोधनात् विशेष्याबोधनं, विशेष्याबोधनात् पारतन्त्र्याबोधनमिति। किंच गवादिपदानां विशेष्यपर्यन्तशक्तिविरहे पारतन्त्र्यबोधनासामर्थ्यप्रसङ्गः। धर्मिबोधनासामर्थ्यव्यापक– तया जात्यादिशब्देषु दृष्टं पारतन्त्र्याबोधनासामर्थ्यं गवादिशब्देभ्यो व्यावर्तमानं स्वव्याप्यं धर्मिबोधनासामर्थ्यं कथं निर्वहेत्।

एतेन द्रव्यांशे शक्त्यभावेऽपि पारतन्त्र्यबोधकत्वं किं न स्यादिति शङ्कापि परास्ता। गवादिशब्देषु तद्दर्शनात्। जातिमात्रे शक्तौ तत्रैव प्रचुरप्रयोगः प्रसज्येत। द्रव्ये त्वसौ दृश्यते। अतस्तत्रैव शक्तिर्युक्ता। एवं जातिर्व्यक्तिनिष्ठेतिवत् गौः व्यक्तिनिष्ठेत्यपि स्यात्, त्वतलादिनिरपेक्षश्च तत्प्रयोगस्स्यात्। निरूढलक्षणयैतन्निर्वाहे कुशलप्रवीणादिषु दण्डत्ववज्जातिगुणादेः प्रकारतयाप्यबोधनप्रसङ्गात्। लक्षणानिरूढेः प्रचुरप्रयोगरूपतया तेनैव तन्निर्वाहे तदभावात्तदभावे चात्माश्रयात्।

किंच न सर्वप्रयोगानुगता वृत्तिः लक्षणा भवितुमर्हति। अयुतसिद्धविशेषणवाचिता च लक्षणाविरोधिनी जातिगुणादिपदेषु दृष्टा गवादिपदेषु लक्षणां प्रतिबध्नीयात्। ननु विशिष्टशक्तिवादिना विशेषणेऽप्रधानतया प्रतीयमाने लक्षणैव वाच्या, सा विशेष्य एवाङ्गीक्रियतामिति चेन्न। तत्प्रधानप्रयोगस्येवेह विशेष्यांशे लक्षणाग्राहकस्याभावात्। न च नीलोत्पलत्वं द्विरेफत्वमित्यादौ व्यभिचारः, तस्य भावार्थकत्वाभावात्। कृत्तद्धितसमासेभ्यस्संबन्धोपगमे हि त्वतलौ विधीयेते। गोत्वमित्यादौ तु भावार्थ इति विशेषः। सर्वप्रयोगानुगतस्य शक्तिग्रहस्य सद्भावश्च विनाऽनुपपत्तिप्रतिसन्धानं तद्बोधश्च तत्र शक्तिमेव कल्पयति। प्रथमोपस्थितिश्च जातेरसिद्धा, संस्थाना– तिरिक्तजातेरभावात्, संस्थानिना विना प्रत्ययायोगाच्च। विशेषणविशेष्यभावश्च वस्तुस्वाभाव्यात् न प्रथमप्रतीत्या। संयोगसंयुक्तसमवायग्राह्ययोः प्राथम्यचारम्य– व्यत्यासौचित्याच्च।

एतेन जातिप्रतीतौ व्यक्तिरर्थसामर्थ्यात्प्रतीयतामिति शङ्का परस्ता। विवक्षितार्थप्रतिसंबन्धित्वेनाक्षेप्यस्य तदुपसर्जनत्वेनैव भानप्रसङ्गात्। माता पूज्या पुत्रोऽनुग्राह्य इत्यादौ स्वाक्षेप्यपुत्रादेरुपसर्जनत्वमवगतं, सामानाधिकरण्यं च न दृष्टमहं माता अहं पुत्र इति, इह तु खण्डो गौरिति दृष्टम्। अतो विवक्षितार्थप्रतिसंबन्धितया प्रतीयमानं गवादिद्रव्यं प्रतीत्यादौ पुत्रादिवच्छब्दशक्त्यैव प्रतीयत इत्यास्थेयम्। किंच विशिष्टशक्तिमतो रूपशब्देन रूपिप्रतिपत्तिदर्शनात् तद्रहितेन रूपशब्देन तददर्शनाच्च शब्दाद्विशेषणोपश्लिष्टविशेष्यप्रतिपत्तिरन्वयव्यतिरेकाभ्यां शब्दशक्तिनिबन्ध– नेत्यवसीयते।

ननु व्यक्तीनामानन्त्यात्तासु संबन्धग्रहोऽनुपपन्नः, एकस्यां तद्ग्रहे च व्यक्त्यन्तराप्रतिपत्तिप्रसङ्गः। मैवं, यत्र जातिस्तत्रायं शब्द इत्येवंरूपत्वात् व्युत्पत्तेः। अतो वाच्यतानिमित्तैक्यान्न प्रत्येकव्यक्त्यपेक्षा। अतस्सर्वव्यक्तिवाच्यताव्युत्पत्तिः सुग्रहा। एकैकव्यक्तौ निमित्तपौष्कल्यात् प्रत्येकं वाच्यतोपपत्तिः।

ननूपस्थितासु व्यक्तिषु शक्तिग्रहो भवेदपि, नैषोपस्थितिर्दुर्ग्रहेति चेन्न। उपस्थितासु व्यक्तिषु हि तन्निषेधो भवतापि कार्यः। लब्धरूपे क्वचित्किंचित्तादृगेव निषिध्यत इति न्यायात्। तत्त्वमित्येव सर्वे सर्वाः व्यक्तीः प्रतिपद्येरन्। ननु जातिप्रतीतौ मम तदन्यत्सर्वं वाच्यं नेति निषेधः व्यक्तयोऽन्यतो नोपतिष्ठेरन्निति चेन्ममापि तदाश्रयत्वेन सर्वाः व्यक्तयोऽपि गृह्येरन् एवमाकारान्नैव गौरिति।

नन्वेवं जातेः प्रथमोपस्थितिरावश्यकीति चेत् साम्ग्रयनाञ्जस्यादित्युक्तम्। किंच शब्देन तस्या नोपस्थितिः प्राथमिकी, शक्त्यग्रहात् प्रत्यक्षेण तदुपस्थितिसाम्ग्रयाः प्राथम्यता युक्ता। तदन्यत्वेनोपस्थितौ विशेषणे च गौरवम्। भावान्तराभाववादे तथापि दुर्ग्रहता, एवं च तदाश्रयत्वेनोपस्थितासु वाच्यताग्रहो भवत्येव। तदेवं जातिगुणवाचिशब्दयोरिव शरीरवाचिनामपि देवादिपदानामपृथक्सिद्धप्रकारवाचित्वात् विशेष्यपर्यन्ता शक्तिस्सिद्धा।

निष्कर्षकशब्दानां जातिगुणमात्रवाचित्वं, निष्कर्षकत्वपरिष्कारच

नन्वेवं जातिगुणरूपादिशब्दानामपि व्यक्तिगुणिपर्यन्ततताप्रसङ्गो दुर्वार इति चेदुच्यतें निष्कर्षकेतरत्वेन शब्दो विशेषणीयः। निष्कर्षकत्वं च विशेष्यविषयतानवच्छिन्नस्वविषयताकस्वार्थप्रतीतिजनकप्रयोगविषयत्वम्। अस्ति चेदं जातिगुणादिशब्देषु। तत्पदजन्यबोधीयजातिगुणादिविषयताया व्यक्तिगुणिरूपविशेष्यविषयतानवच्छिन्नत्वात्। गोशुक्लादिपदेषु तु नास्ति तत्पदजन्यबोधीयजातिगुणादिविषयताया व्यक्तिगुण्यादिनिष्ठविशेष्यताख्यविषयतावच्छिन्नत्वात्। अत्र च ज्ञानभेदेन विषयताभेदानभ्युपगमे जात्यादिपदजन्यबोधीयजात्यादिनिष्ठविषयताया अपि गवादिपदजन्यबोधीयजात्यादिविषयत्वाभिन्नत्वात् गवादिनिष्ठविषयत्वावच्छिन्नत्वेन तदनवच्छिन्नत्वाभावादसंभव इति विशेष्यतायां स्वनिरूपकज्ञाननिरूपितत्वं देयम्। जातिमान् गुणवानिति समुदायघटकतया जात्यादिशब्देष्वपितथाविधविशेष्यताख्यविषयत्वावच्छिन्नस्वविषयताकस्वार्थप्रतीतिजनकप्रयोगविषयतावत्तया तद्वदन्यत्वमपहाय प्रथमतस्स्वविशेष्यताख्यविषयतानवच्छिन्नत्वं निवेशितम्। तच्च केवलं गोत्वादिपदप्रयोगमादाय सुलभम्। यद्यपि शुक्लरूपकामेत्यादिसमुदायघटकशुक्लादिपदेषु तथाविधप्रयोगविषयत्त्वमस्ति, तथापि तथाविधप्रयोग- विषयतापर्याप्त्यधिकरणत्वविवक्षणान्न दोष इति दिक्।

एवं तथाविधनिष्कर्षकेतरत्वमपि तथाविधनिष्कर्षकत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वम्। अतो न द्वित्वावच्छिन्नभेदमादय निष्कर्षकेऽतिप्रसङ्गः। जातित्वीयविषयितानवच्छिन्नविषयिताकत्वमादायासंभववारणाय विशेष्यताख्यत्वं विषयिताविशेषणम्। यद्यप्येतादृशानिष्कर्षकत्वं शुक्लादिपदेषु विशिष्टाविशिष्टोभयबोधकेष्वतिव्याप्तम्। तथापि स्वावच्छिन्नत्वस्वानवच्छिन्नत्वोभयसंबन्धेन स्वनिरूपकविषयित्वेन निरूपितविशेष्यतानवच्छिन्नस्वार्थविषयिताकप्रतीतिजनकप्रयोगविषयतापर्याप्त्यधिकरणत्वलक्षणं नियतनिष्कर्षकत्वमिह विवक्षितम्। तच्च रूपादिपदेषु

न शुक्लादिपदेष्विति न कश्चिद्दोष इत्यलं बहुना। एवं च नियतनिष्कर्षकजातिगुण–गोत्वरूपादिपदानां व्यक्तिगुणिपर्यन्तप्रतीत्यजनकत्वमिव शरीरवाचिनामपि तादृशानां देहशरीरादिपदानामात्मपर्यन्तबोधाजनकत्वेऽपि गोशुक्लादिपदानां व्यक्तिगुणि–पर्यन्तत्वमिव देवमनुष्यादीनां पिण्डवाचिनां पदानामपृथक्सिद्धवाचित्वात् विशेष्यभूता–त्मपर्यन्ततां मुख्यामेव प्रतिपादयन्ति परीक्षकाः।

कृत्स्नस्य वस्तुनः परमात्मशरीरत्वे प्रमाणोपन्यासः

तदेवं देवमनुष्यादिपदानां तत्तद्विशेषणविशिष्टात्मवाचित्वं चिदचिदात्मकस्य कृत्स्नस्य वस्तुनः परमात्मशरीरत्वात्। तत्त्वं च तत्तदुपनिषद्गतान्तर्यामिब्राह्मणाद्यवगतम्। तथा च बृहदारण्यके तावत् यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृत' इत्यारभ्य 'यस्यापश्शरीरं यस्याग्निश्शरीरं यस्य वायुश्शरीरं यस्य द्यौश्शरीरं यस्यादित्यश्शरीरं यस्य दिशश्शरीरं यस्य चन्द्रतारकं शरीरं यस्याकाशश्शरीरं यस्य तमश्शरीरं यस्य तेजश्शरीरं यस्य सर्वाणि भूतानि शरीरं यस्य प्राणश्शरीरं यस्य वाक् शरीरं यस्य चक्षुश्शरीरं यस्य श्रोत्रं शरीरं यस्य मनश्शरीरं यस्य त्वक् शरीरं यस्य विज्ञानं शरीरं यस्य रेतश्शरीरमित्येवमन्तं काण्वपाठे। माध्यन्दिनपाठे तु विज्ञानस्थाने यस्याऽऽत्माशरीरमिति विशेषः। उक्तक्रमेण पृथिव्यादीनां तत्त्वानां परमात्मशरीरत्व–मभिधाय वाजसनेयके काण्वपाठेऽनुक्तानामपि तत्त्वानां परमात्मशरीरत्वं श्रूयते 'यस्य बुद्धिश्शरीरं यस्याहंकारश्शरीरं यस्य चित्तं शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युश्शरीरमित्यन्तम्। एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति वाक्यशेषः। अत्र मृत्युशब्देन परमसूक्ष्ममचिद्वस्तु तमश्शब्द–वाच्यमभिधीयते। अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयत इत्यस्यामेवोपनिषदि तमसः प्रत्यभिज्ञानात् समेषामेवात्मनां ज्ञानावरणानर्थमूलत्वेन तदेव तमोऽत्र मृत्युशब्देनोच्यते।

यद्यप्यत्र 'इमं च लोकं परं च लोकं सर्वाणि भूतानि योऽन्तरो यमयतीत्यारभ्य तमन्तर्यामिणं ब्रूहि म' इत्यन्तर्यामिविषय एवोद्दालकप्रश्नस्तथापि नान्तर्यामिस्वरूपा–परिज्ञानात् प्रश्नः योऽन्तरो यमयतीत्यवयवार्थस्य परिज्ञातत्वात् किन्त्वन्तर्यामि–विशेषविषयकः। उत्तरे चान्तर्यामिविशेषो नोक्तः, किन्तु सर्वान्तर्यामिण उद्दालकान्त–र्यामित्वमुक्तम्। तत्र प्रष्टुरयमाशयः किं परिदृश्यमानतत्तच्छरीराणां नियन्ता जीवात्मैव सर्वान्तर्यामी ततोऽतिरिक्तः तस्यापि नियामकोऽन्य इति, तदभिप्रायज्ञ उपदेष्टा ततोऽन्तर्यामिणमात्मानं विवक्षुः जीवान्तर्यामित्वमात्रोक्तौ सर्वान्तर्यामी नोक्तस्स्यात् पृथिव्याद्यचेतनान्तर्यामित्वमात्रोक्तौ जीवातिरिक्तत्वं नोक्तं स्यादिति चेतनाचेतनोभया–न्तर्यामित्वमुक्तवान्। तत्र यः पृथिवीमन्तरो यमयतीत्यादिरनुवादः एष त आत्मान्त–र्याम्यमृत इत्यादिर्विधिः। अत्रामृतत्वविशिष्ट– मुद्दालकान्तर्यामित्वं विधेयम्। जीवस्येव भूतेष्वप्यन्तः प्रविश्य नियन्त्रकत्वात् तद्वदेव हेयता स्यादित्येतद्व्यावर्तनाय अमृतत्वोक्तिः।

न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति शरीरशरीरिभावात्मकसंबन्ध एव प्रियाप्रियानपहतिहेतुः न भूतसंबन्धमात्रं, जीवे तथैव दर्शनादित्याशङ्कां निवारयितुं तदप्यङ्गीकृतमित्याह यस्य पृथिवी शरीरमित्यादि। शरीरसम्बन्धमात्रं न दोषहेतुः, मुक्तेष्वप्यनेकशरीरप्रतिपत्तिदर्शनात्। अपि तु कर्मैव। न चास्य तन्निमित्तकः पृथिव्यादेश्शरीरभावः, अतो नास्य हेयसंबन्ध इत्याशयेनामृत इत्युक्तम्। तदेतदाह सूत्रकारः "संभोगप्राप्तिरिति चेन्न वैशेष्यादिति।

परोक्तशरीरलक्षणनिरासः

ननु भोगाश्रयत्वं शरीरत्वम्। यदि ब्रह्म पृथिव्यादिशरीरप्रयुक्तं भोगं नानुभवेत् तर्हि तस्य शरीरत्वकथनं गौणं स्यात्। तत्र तत्प्रयुक्तहेयनिषेधोऽप्रसक्तप्रतिषेधस्स्यादिति चेन्न। न हि भोगायतत्वं शरीरत्वं, मुक्तशरीरेषु रामकृष्णादिशरीरेषु चाभोगाय-तनेष्वव्याप्तेः। किन्त्वन्तः प्रविश्य तन्नियाम्यत्वम्। तच्चात्रापि समानमित्याह यः पृथिव्यां तिष्ठन्नित्यादिना वाक्यत्रयेण। तत्र पृथिव्यां तिष्ठन्नित्यादिना राजा राज्ये प्रतिष्ठित इतिवत् बहिरेव नियन्तृतया स्थितिमान् स्यादिति प्रसिद्ध्या अन्तर इत्याद्युच्यते। अन्तर्देशावधित्वविवक्षायां पञ्चमी।

यद्यपीदं षष्ठीसाधारणं रूपं, तथापि योऽन्तर इत्यादिपञ्चम्यर्थे तद्दर्शनादयमपि पञ्चम्यन्तः। तेन व्याप्यव्यापकभावो लभ्यते। लोके नियाम्यनियामकयोः परस्पराभिज्ञानं दृश्यते। अतो वैलक्षण्यं दर्शयति यं पृथिवी न वेद यमात्मा न वेद इत्यादि।

चिदचितोः परमात्मनियाम्यत्वेन तच्छरीरत्वम्

यद्यपि पृथिव्यादेरचेतनस्य वेदनमप्रसक्तं, तथाप्यात्मगतावेदनदृष्टान्तत्वेन अचेतनानभिज्ञानाभिधानम्। यथा न 'पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्य' इत्यत्र केवलपृथिवीचयननिषेधदृष्टान्ततयाऽन्तरिक्षादिचयननिषेधः तद्वद् चेतनानामिवाचेतना-नामपि तत्स्वरूपानभिज्ञत्वं दर्शयितुं तथाभिधानम्। अन्तःप्रविश्य नियन्तृत्वरूपं शरीरिलक्षणमस्ति पृथिव्यादिनियन्तरि परमात्मनीति तन्नियाम्यं पृथिव्यादि सर्वं तस्य मुख्यमेव शरीरमित्ययमर्थ अन्तरो यमयतीत्यनेनोक्तः। आत्मशब्दोप्य-त्रैवोपष्टम्भकः। अतश्शरीरात्मभावनिबन्धनमन्तर्यामित्वं चेतनाचेतनोभयनिरूपितमिति सर्वचेतनविलक्षणः तन्नियन्ता अन्तर्यामीत्युक्तं भवति।

एतेन शरीरपदं शिलापुत्रकस्येदं शरीरमितिवदभेदाभिप्रायकमिति कस्यचिदाशा निरस्ता। पृथिव्याद्यंशे वैरूप्यापत्तेः। अत एव न गौणत्वमपि, प्रवृत्तिनिमित्ताश्रयस्य तत्पदमुख्यत्वौचित्यात्। अन्यथाऽतिप्रसङ्गात्।

एतेन यत् केनचिदुक्तं सत्यं जीवव्यावृत्तरूपः परमात्मा अन्तर्यामी प्रतिपादितः, न तु स्वव्याप्यनियन्ता। तद्यावृत्तरूपे परमात्मनि तद्व्याप्त्यसंभवात्। सत्यसङ्कल्पस्य नियन्तृत्वाय तदनपेक्षत्वाच्च। न ह्यत्र यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर इति अन्तर्बहिर्भावेन व्याप्त्यभिधानमात्रेण तस्य नियमनानर्हत्वमपि कल्प्यम्। मानाभावात्, पृथिव्याद्यचेतनस्यापि तथात्वापाताच्चेति। तत्तुच्छम्। यः पृथिवीमन्तरो यमयतीति

यमनसन्नियोगेनान्तरत्वश्रवणेन तादात्म्येनैव व्याप्त्यभिधानसिद्धेः अन्तः प्रविष्टश्शास्ता जनानामिति श्रुत्यन्तरैकार्थ्याच्च। अनुप्रविश्य नाम रूपे व्याकरवाणीत्यादौ तदनुप्रविश्य सच्च त्यच्चाभवदित्यादौ चानुप्रवेशः करिष्यमाणकार्यप्रयोजकतया निर्दिष्टो दृष्टः। न चेह विना कारणेन तदन्यथाकर्तुं युक्तम्। अन्तर्यामित्वं चेह दृष्टम्। तच्चान्तःप्रवेशप्रयुक्तमित्यन्तरो यमयतीत्याद्याविष्कृतम्। अन्यथा तदभिधानानर्थक्यं च। न च सत्यसङ्कल्पत्वात् विनैव प्रवेशं नियमनसंभवात्तदर्थत्वेऽपि तत्कथनवैयर्थ्यमिति शङ्क्यम्। शरीरशरीरिभावेन नियमनस्यान्तःप्रवेशपूर्वकत्वनैयत्यात्। ताटस्थ्येन नियमने तदलाभात्। एतत्प्रदर्शनायैवात्मशरीरशब्दप्रयोग इत्युक्तम्।

नन्वेवं तदवेद्यत्वमपि तत्रोक्तं नियमनहेतु स्यादिति चेत्। कस्य वैतन्नेष्टम्। अभिज्ञो ह्यनभिज्ञं नियमयति। तथा च श्रुतिः ज्ञाज्ञौ द्वावजावीशनीशाविति। यथाहुर्महर्षयः

अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा।।

इति। अनेन नियमनं स्वर्गापवर्गोपयुक्तज्ञानप्रदानमित्यपि सूचितम्। मत्तः स्मृतिर्ज्ञानमपोहनं च' ददामि बुद्धियोगं तं येन मामुपयान्ति त इत्याह। एतेन व्याप्त्याधारकत्वमपि लक्षणं निर्व्यूढम्।

यत्तु 'एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः द्यावापृथिव्यौ विधृतौ तिष्ठत इति व्याप्त्यनपेक्षेण प्रशासनेनैव धार्यत्वश्रवणात् व्याप्त्यनपेक्षमेव प्रशासनेनैव धारणकल्पनमिति। तदपि मौढ्यात्। एतस्मिन् खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्चेति स्वेतराधारतया उक्तस्याकाशस्याव्याकृतरूपस्य ओतत्वप्रोतत्वश्रवणेन व्याप्तेरतिस्थूलत्वात्। कस्मिन् खल्वाकाशे ओतश्च प्रोतश्चेति प्रश्ने अक्षरे गार्गीत्युक्तिपूर्वकं प्रशासनमुच्यमान– व्याप्तिसापेक्षमिति ह्यवगम्यते। एतस्मिन्नेव खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्चेति पुनर्वचनं नियमनव्याप्त्या अन्योन्य– सापेक्षत्वद्योतनायैव। अन्यथा शृङ्खलितोक्तिविरोधात्। ननु जीवव्यावृत्तरूपस्या– न्तर्यामिणो न स्वव्याप्त्या नियन्तृता। तद्व्यावृत्तरूपे सर्वात्मना तद्व्याप्त्यसंभवात्। अतो जीवस्वरूपतापत्त्यैव तद्व्याप्तिर्वाच्या। अन्तःप्रविष्टश्शास्तेत्यपि तत्परमेव। स मानसीन आत्मा जनानामिति प्रशासितुः मानसीनत्वश्रवणात्। न ह्यप्राणो ह्यमना इति श्रुतिप्रथितस्य परमात्मनो मानसीनत्वमाञ्जसं, भवति तु जीवस्य। तदयमर्थः जीवं न नियाम्यशरीरैकव्याप्त्या नियच्छति परात्मा किन्तर्हि पृथग्भूतोऽन्तर इति। अन्यथा अनवयवजीवं प्रति अन्तरत्वासंभवः।

अथ नियाम्यतादात्म्याभिमानशून्यस्य नियामकत्वं वास्यादौ तक्षकादेरिव शरीरसापेक्षं स्यादिति चेन्न। परमेश्वरस्य नित्यविभूतिसर्वशक्तितया न शरीरापेक्षा। तदाह यस्य पृथिवी शरीरमिति। विविक्तवस्तुनियमनेऽपि नात्मनश्शरीरापेक्षेत्यर्थ इति चेन्मैवम्। सर्वज्यायसः परमात्मनो न स्वरूपेण व्याप्तिः किन्तु वालाग्रमात्र–

जीवात्मरूपेणेत्यस्योपहास्यत्वात्। न हि व्यापनं व्याप्यतादात्म्याभिमानेनैवेति नियमोऽस्ति, मनसि व्यभिचारात्। न वा नियमनं नियाम्यतादात्म्यापत्त्यैव, राज्ञि व्यभिचारात्। अत एव न विशिष्टमपि तद्विषयकं, नियाम्यनियामकयोर्भेदस्यैव स्वारसिकत्वात्। तत्तादात्म्याभिमानस्यानात्मन्यात्मबुद्धिरूपस्य कर्मकार्यतया तत्संब- न्धगन्धशून्ये तदप्रसक्तेः। मानसीनत्वं चोपासकानुग्रहाय मनोवृत्तिगम्यत्वादाञ्जसम्। मानसीनत्वोक्त्या जीवरूपतापत्तिं वदन् तत्प्रतिसंबन्धिसमर्पकं जनानामिति पदं प्रमत्तो विस्मरति। 'अन्तरादित्ये मनसा चरन्तम्' 'अन्तश्चन्द्रमसि मनसा चरन्तम्, 'हृदि ह्ययमात्मा' 'एष आत्मा अन्तर्हृदय इत्यादि श्रुतिजातमपि न जानाति। अप्राणो ह्यमना इति प्राणाधीनं जीवनं मनआयत्तं ज्ञानं च निषेधत् करणोपकरणत्वादिक मात्मनि प्रतिषेधति, न तत्संबन्धमात्रम्। उक्तविरोधात् हृद्यपेक्षयेति सूत्रविरोधाच्च। अनवयवेऽपि जीवेऽन्तर्व्याप्तिः प्रागुपपादिता। अतः परमात्मनश्शरीरित्वं चिदचितोश्श- रीरत्वं च प्रतिपाद यितुमेवैतावानन्तर्यामिब्राह्मणसन्दर्भः।

स्वमतेन शरीरलक्षणम्

तत्र चैततफलितं यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियाम्यं तत्तस्य शरीरमिति। एवं धार्यत्वघटितमपि। अत्र हि नियन्तृत्वोक्त्या चेतनत्वमर्थसिद्धम्। अधिकरणत्वव्याप्यत्वाद्युक्त्या नियाम्यस्य द्रव्यत्वमर्थसिद्धम्। कारणत्वस्येव नियाम्य- त्वस्य कालानवच्छिन्नत्वात् सार्वकालिकलाभात् नियमनस्य स्वाभाविकत्वमवगम्यते। स्वसत्तावच्छेदकदेशकालाद्यवच्छेदकत्वं तदर्थः। स्वसत्तानवच्छेदकालानवछेद्यत्वमात्रं वा विवक्षितम्। एतदेव सर्वात्मनेत्युच्यते। नियमनं च न निष्प्रयोजनं भवति। तदप्यत्र गर्हितम्। स्वसाध्यकार्योद्देश्यकस्वतन्त्रपुरुषव्यापारो नियमनम्। स्वसाध्यत्वं स्वप्रवृत्ति- प्रयोज्यत्वम्। स्वशब्दश्शरीरितयाभिमतपरः, उद्देश्यत्वं सप्तम्यर्थः। स्वप्रवृत्तिश्च स्वस्वव्याप्येतरनिखिलकारणसमवधानकालीना विवक्षिता। अत्र साध्यत्वोक्त्या स्वप्रयत्नासाध्याकाशगमनादौ स्वशरीरस्य नियमनानर्हत्वेऽपि न दोषः। सामग्री च प्रतिबन्धकाभावरूपा सहकारिरूपा च। तेन सहकारिविरहे रोगादिना शक्तिविरहे च तत्काले नियाम्यताविरहेऽपि नाव्याप्तिः। चेतनपदं चैतन्यविशिष्टपरम्। षष्ठ्यर्थश्च नियमनान्वयिसंबन्धः, स्वनिष्ठज्ञानप्रयोज्यत्वरूपः। तेन ज्ञानस्य द्रव्यत्वेऽपि स्वसत्तानवच्छेदककालानवच्छेद्यनियमनवत्त्वेऽपि च न शरीरत्वापत्तिः तन्नियमनस्य ज्ञानाप्रयोज्यत्वात्। क्रियागुणादेश्शरीरताव्यावृत्तये द्रव्यपदम्। तत्त्वं चावस्थान्तरा- पत्तिमत्त्वम्। तच्च न तयोः। न च तद्व्यावृत्तये साक्षान्नियमन- विषयत्वमेवास्थीयतां किं द्रव्यपदेनेति वाच्यम्। जीवद्वारा तन्नियाम्यानामपि शरीरत्वाङ्गीकारेण साक्षात्तद्विषयतानिवेशनानौचित्यात्। न च यस्य वेदाश्शरीरं यस्य यज्ञाश्शरीरमिति श्रुत्या तयोरपि शरीरत्वमेवास्त्विति शङ्क्यम्। लोके शरीरधर्माणां शरीरत्वादर्शनेन तद्विरोधेन श्रुतेरभिमानिदेवतापर्यन्तत्वादन्यथासिद्धेः। स्वनियाम्यपत्नीपुत्रभृत्यादि- व्यवच्छेदाय सत्तावच्छेदकदेशकालावच्छेद्यत्वोक्तिः। न हि तेषां नियमनं

स्वसत्तावच्छेदकावच्छेद्यम्। व्याप्यवृत्तेरवच्छेदकत्वानङ्गीकारे कालानवच्छेद्यत्वमात्रमेव विवक्षितम्। तदयं निर्गलितार्थः– यद्द्रव्यं यन्निष्ठज्ञानप्रयोज्यस्वस्वव्याप्येतर–सकलकारणसमवधानकालीनस्वकृतिसाध्तावच्छेदकावच्छिन्नोद्देश्यता– निरूपकस्व–सत्तावच्छेदकदेशकालावच्छिन्ननियमनक्रियावत् तत्तस्य शरीरमिति। एवं धारण–घटितलक्षणमपि परिष्कार्यम्। ज्ञानप्रयोज्यत्वं विवक्षितोद्देश्यताकत्वं सत्तावच्छेदक–देशकालाद्यवच्छेद्यत्वं च धारणविशेषणम्। अतो नाव्याप्त्यतिव्याप्ती। तच्छेषतैक–स्वभावमित्यत्र एकशब्दस्सर्वात्मनेत्यस्यार्थे वर्तते। यद्द्रव्यं यन्निष्ठज्ञानप्रयोज्येत्यादि प्राग्वत्। व्याप्यवृत्तेरपि प्रतीतिबलादवच्छेदकत्वाङ्गीकारेणेदम्। तदनङ्गीकारे तु स्वसत्तानवच्छेद्यदेशकालानवच्छेद्यत्वं बोध्यम्। भृत्यादेस्तु नियाम्यता धार्यता शेषता च सत्तानवच्छेदककिंचिद्देशकालावच्छेद्यैवेति नातिप्रसङ्गः।

जगतः परमात्मशेषत्वस्थापनम्

यत्तु शेषिणं प्रत्यकिञ्चित्करस्य न शेषत्वं क्वचिद्दृष्टं कस्यचिदिष्टं वा। न च जगत् परमात्मनः किंचित्करोति। न तावत् भोगम्। अवाप्तसमस्तकामस्य परप्रयोज्य–भोगाभावात् 'अनश्नन्नन्योऽभिचाकशीति' इति श्रुतेः। अत एव न क्रीडानिर्वृत्तिः प्रयोजनं, स्वतस्सिद्धनित्यनिरतिशयानुभवस्यावाप्तसमस्तकामस्य परप्रयोज्यप्रयोजन–लेशस्याप्यभावात्। तथा च स्मर्यते।

'क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमिति चापरे।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा।।

इति। तन्न। 'स एकाकी न रमेत'

''अप्रमेयोऽनियोज्यश्च यत्र कामगमो वशी।
मोदते भगवान् भूतैर्बालः क्रीडनकैरिव।।

क्रीडतो बालकस्येव चेष्टां तस्य निशामय 'लोकवत्तु लीलाकैवल्य'मिति श्रुतिस्मृतिसूत्रैर्लीलानिष्पत्तेरेव प्रयोजनत्वात्। दृश्यते हि महाप्रभावमनुभवतोऽपि राज्ञः स्वाधीनसर्वकामस्यापि क्रीडामात्रार्थकन्दुकचतुरङ्गारामादयो लोके।

यद्यपि लीलासाध्यं किमपि प्रयोजनं न स्यात्, तथापि तन्निर्वृत्तिरेव कार्यं स्यात्। क्रीडाविषयाभावे क्रीडाया अनिर्वृत्तेः। तदिदमुक्तं भगवता भाष्यकारेण 'अखिलभुवनस्थेमभङ्गादिलील' इति। तदिदमुक्तमाचार्यपादैस्तत्त्वटीकायां

किंचिदिष्टमनुद्दिश्य न प्रवर्तेत चेतनः।
तत्प्राप्तार्थस्य नेत्येतल्लीलोक्त्याऽत्र निवार्यते।। इति

यदप्यवाप्तसमस्तकामत्वात् न लीलार्थमप्यपेक्षेति केनचिदुक्तं तदपि न। न ह्यवाप्त समस्तकामत्वं फलोपहितत्वं विवक्षितम्। किन्तु स्वापेक्षितकालाप्रतिहतत्वम्। तदप्युक्तं तत्रैव –

'यद्यदिष्टं तदा तस्य सिद्धेरस्याप्तकामना।
नातः क्षेप्यो यथा लोकं साध्यो लीलान्वयःश्रुतः।।

यत् पूर्णमद इत्यादि तदप्युक्तं न बाधके।
प्रत्युतानुगुणं तस्य स्वतोऽन्येन च पूर्तितः।।

अस्यापि प्रयोजनान्तरनिरपेक्षस्वच्छन्दव्यापारव्यक्त्यै बालः क्रीडनकैरिवेति दृष्टान्ताभिप्रायं च सूत्रं लोकवत्तु लीलाकैवल्यमिति इति। अतः प्रयोजनान्तराभावेऽपि लीलानिर्वृत्तये जगत् भवतीति कन्दुकारामनृत्तादिवज्जगतोऽपि तच्छेषता युक्ता। अतः भोगहेतुत्वाभावमात्रात् न शेषत्वोक्तिरयुक्ता, एवं च लीलानिष्पत्त्यतिरिक्तं प्रयोजनं नास्तीत्येतत्सूचनाय 'क्रीडतो बालकस्येव क्रीडां तस्य निशामयेति चेष्टाशब्दप्रयोगः लीलाकैवल्यमित्यत्र कैवल्यशब्दप्रयोगश्चेत्युक्तं नास्मत्प्रतिकूलम्।

शेषलक्षणम्

एतेन परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपं सः शेषः परश्शेषीति लक्षणमपि निर्व्यूढम्। लोके तत्तत्प्रयोजननिष्पत्तिवत् परात्मनि लीलानिर्वृत्तिरूपातिशयस्याव्यतिरेकात्। अत एव परस्मिन्निरस्तनिखिलदोषस्वभावस्वरूपे निसर्गसिद्धनिरतिशयानन्तकल्याणगुणगणमहोदधौ जगदाधेयातिशयो दोषनिवृत्तिरूपो गुणसंपत्तिरूपो वा न किंचिदस्तीति कस्यचिच्छङ्का परास्ता। लीलानिर्वृत्तिरूपातिशयस्यैव जगदाधेयत्वात्। लीलाविषयाभावे तत्प्रवृत्त्ययोगात्। अत्र स्वगतातिशयमपेक्ष्य राजसेवादौ प्रवृत्तेः स्वशेषताव्यावृत्तये परगतेति। परत्वं भेदः। स चोपादेयप्रतियोगिकः प्रकृते विवक्षितः। स च सामानाधिकरण्येनातिशयविशेषणम्। तथा च स्वावच्छिन्नप्रतियोगिताकभेदवद् वृत्त्यतिशयोद्देश्यकेच्छाप्रयोज्योपादेयतैकाश्रयत्वं शेषत्वमिति पर्यवसन्नम्। तेन भृत्यादिगतातिशयमादाय नातिव्याप्तिः।

यद्यपि राजापि भृत्यगतातिशयाधानेच्छया यतते, तथापि न तदुद्देश्यम्। स्वातिशयोद्देश्येनैव तदतिशयाधानात्। तदेव हि तस्य परमप्रयोजनतयोद्देश्यम्। अत उद्देश्यतानिवेशनान्न 'राज्ञो भृत्यशेषताप्रसङ्गः। भृत्यः स्वातिशयं स्वार्थमेवेच्छति नान्यार्थमिति चोद्देश्यगतेति पदेन न तद्व्यावृत्तिरिति परगतेति विशेषणम्। तद्व्यावृत्त अतिशयश्च तच्छेष्यनुकूलः, तद्गतोत्कर्षापरपर्यायो धर्मविशेषः। स च दृष्टादृष्टान्यतररूपः, यथा प्रोक्षणावघातादिजन्यो व्रीह्यादिगतः, राजादिगतो भृत्यराज्यादिप्रयुक्तो जयसुखादिः। एवं पुत्रभार्याप्रयुक्तः पितृभर्त्रादिगतो दृष्टादृष्टान्यतररूपः। एवं जीवस्वरूपगतभोगात्मकातिशयाधायकस्य शरीरादेः तच्छेषत्वम्। एवं प्रपञ्चस्य स्थूलसूक्ष्मात्मकस्य परमात्मगतस्रष्टृत्वलीलानिष्पत्त्याद्यतिशयाधायकतया तच्छेषत्वम्। न च दुःखभयाद्याधेयकनरकादावतिप्रसङ्गः। दुःखभयादेः सुखरूपानुकूलधर्मत्वाभावात्, तदुद्देश्यकेच्छाप्रयोज्यकृतिविषयत्वाभावाच्च। अत एव सुखादिहेतुभूतचन्द्रलोकादावपि नातिप्रसङ्गः स्वकृतिसाध्यतारूपोपादेयत्वासंभवात्। न च प्रस्तरप्रहरणादेः प्रस्तरशेषत्वापत्तिः, आकीर्णकरत्वाभावरूपातिशयाधायकत्वात् तदर्थकृतिविषयत्वेन तच्छेषत्वाविघातात्। यातनाहेतुशरीरादेः तादात्विकपीडाहेतुत्वेऽपि त्राणशान्त्यर्थदाहच्छेदादेरिव बहुतरदुःखजनकपापक्षयोत्पादकतया तच्चेतनगतातिशयाधेयकतया

उपादेयतया नाव्याप्तिः। विश्वगतार्थित्वादौ भगवतः प्रवृत्तिः न तद्गतातिशया–धानेच्छया, अपि तु स्वगतलीलारसनिष्पत्तीच्छयेति नेश्वरस्य जगच्छेषताप्रसङ्गः।

एतेन परगतातिशय एव परमप्रयोजनं यस्य स परं प्रति शेष इत्यपि लक्षणं निर्व्यूढम्। सर्वस्स्वार्थं समीहत इति न्यायेन चेतनस्य स्वार्थानपेक्षप्रयोजनवत्वाभावात् परमात्मनो विश्वगतसृष्ट्यादिरेव प्रयोजनमिति कल्पना युक्ता। सृष्ट्याद्युपक्रमे 'स एकाकी न रमेतेति लीलानिष्पत्त्यभाववचनेन लीलानिष्पत्तेरेव तद्धेतुत्वात्। 'क्रीडार्थं सृष्टिरित्यन्य इत्यत्रापि भोगसत्तापक्ष एव दूषितः, न क्रीडार्थतापक्षः 'आप्तकामस्य का स्पृहे'ति वचनशेषात्। रमु क्रीडायामिति धात्वर्थानुगुण्याच्च। स्वभावः स्वा–साधारणो धर्मः। ततश्च केवलं लीलैव, न लीलासाध्यप्रयोजनमप्यस्तीति फलितम्। अतः क्रीडार्थमित्यत्र आप्तकामस्य का स्पृहेंति वाक्यशेषानुसारात् क्रीडासाध्यप्रयोजनमुद्देश्यमिति तदर्थो बोध्यः। अतो न कोऽपि विरोधः। इच्छा च शेषशेषिणोश्चेतनत्वेऽन्यतरगता। चेतनाचेतनरूपत्वे चेतनगता। उभयोश्चेतनत्वे उपादातृपुरुषगता। उपादानं च स्वीकारो व्यवहारो वेत्यन्यदेतत्। विस्तरस्तु टीकायां द्रष्टव्यः।

एवं शेषत्वे निर्व्यूढे भृत्यादेश्शरीरतावारणाय शेषतैकस्वभावमित्येकशब्दो भाष्ये प्रयुक्तः। स्वसत्तावच्छेदकदेशकालाद्यवच्छेद्यत्वं तदर्थः। अतो न भृत्यादावति–व्याप्तिरिति सूक्ष्मतयाऽवधातव्यम्। अतः सर्वस्यापि चिदचिद्वस्तुनः सर्वप्रयोगानुगुणत्रिविधशरीरपदप्रवृत्तिनिमित्तवत्तया मुख्यशरीरत्वात्। शरीरस्य च शरीर्यपृथक्सिद्धविशेषण–त्वात् तद्वाचिशब्दैः परमात्मनोऽभिधानं मुख्यमेव।

अपृथक्सिद्धत्वस्वरूपप्रतिपादनम्

इदन्तु विचार्यम्–अपृथक्सिद्धिरित्यत्र केयं सिद्धिः उत्पत्तिर्ज्ञप्तिर्वा। नाद्यः आत्मनो नित्यत्वात्। न द्वितीयः, भिन्नसामग्रीवेद्ययोः शरीरात्मनोर्युगपत् प्रतीत्ययोगात्। पक्षद्वयेऽपि युगपदुत्पन्नयोः युगपत्प्रतीतयोश्च सव्येतरविषाणयोरपृथक्सिद्धि–प्रसङ्गाच्च। अथ तन्नैयत्यविवक्षणान्न दोष इति चेन्न। तथापि तादृशेष्वेव युगपदुत्पत्तिविनाशवत्सु द्रव्येष्वतिप्रसङ्गात्।

अत्रेदं तत्त्वं संबन्धानधिकरणसंबन्धिद्वयाधिकरणकालावृत्तिपदार्थान्वयस्यैव तत्त्वात् सव्येतरविषाणयोरेककालोत्पन्नविनाशवद्द्रव्यान्तरेष्वपि परस्परासम्बद्धेषु सम्ब–न्धिनोरप्रसिद्धेरेव नातिप्रसङ्गात्। कदाचित् संबद्धेषु घटादिष्वपि संबन्धानधिकरणसंबन्धयन्तराधि करणकालवृत्तित्वादेव नातिप्रसङ्गः।

यद्यप्येतादृशमपृथक्सिद्धत्वं रूपरसगन्धादीनामप्यस्ति, तथापि तद्वाचकपदानां पृथिव्याद्यपेक्षया निष्कर्षकशब्दत्वात् तेषां धर्मिपर्यन्तत्वाभावेन न व्यभिचारः।

स्यादेतत्। जातिद्रव्येष्वपृथक्सिद्धविशेषणस्यानुगुणस्य मत्वर्थीयप्रत्यय–निरपेक्षसामानाधिकरण्यप्रत्ययरूपनियामकस्य संभवेऽपि शरीरजीवात्मपरात्मसाधा–रणस्य देवादिशब्द प्रवृत्तिनिमित्तस्य एकस्यासंभवात्, गङ्गापदेन प्रवाहतीरयोरिव

देवादिपदवाच्यता अयुक्ता। अपि तु गङ्गापदप्रवृत्तिनिमित्तगङ्गात्ववतः प्रवाहस्येव देवत्वादिमतो देहस्यैव तत्पदवाच्यत्वं युक्तम्। तत्संबन्धात् जीवस्य, तत्संबन्धात् परमात्मनश्च गङ्गासंबन्धात्तीरस्येव तत्पदलक्ष्यत्वमेव युक्तं, न तत्पदवाच्यत्वमिति।

अत्र टीकाकाराः देवत्वादिकमेव देवादिशब्दस्य शरीरात्मसाधारणं प्रवृत्ति–निमित्तं सुतोऽहं देवोऽहं, मनुष्योऽहमित्याद्यबाधितप्रतीतिवशात् देवस्य देवत्वाश्रयत्ववत् देवोऽहं मनुष्योऽहं जानामीत्यबाधितप्रयोगवशात् देवत्वाश्रयत्वमभ्युपगन्तव्यम्। न च देहात्माविवेकवतोऽयं प्रयोग इति वाच्यम्। नाहं देह इति देहात्मविवेकवतोऽपि नायं देहो मनुष्य इत्यप्रतीतेः। न च देहद्वारा आत्मनो देवत्वाद्याश्रयत्वेऽपि साक्षात्तदाश्रयत्वाभावात् न तत्पदवाच्यत्वम् अन्यथा घटद्वारा घटत्वाश्रयस्य भूतलस्यापि घटशब्दबोध्यत्वप्रसङ्गादिति वाच्यम्। तत्र भूतलं घट इति भूतलस्य घटत्वाश्रयताग्राहकस्याबाधितप्रमाणस्याभावेन तस्य घटशब्दवाच्यत्वाभावेऽपि देवोऽहं मनुष्योऽहं जानामीत्यबाधितप्रतीतेः देवत्वप्रवृत्तिनिमित्ताश्रयत्वस्य सत्त्वेन तच्छब्दवाच्यत्वस्यावश्यकत्वात्। अपूर्वान्तरितस्यापि यागादेस्स्वर्गादिसाधनत्ववदा–स्तरणान्तरितस्यापि शय्यादेर्देवदत्ता–श्रयत्ववत् शरीरान्तरित– स्यात्मनो देवत्वाद्याश्रयत्वं न विरुध्यते। भूतलस्य घटाधारत्वमेव न घटत्वाधारत्वं, तथाऽप्रतीते–रिति शेषः। उष्णं जलमित्यादौ त्वबाधितप्रतीतिव्यवहाराभावेन नोष्णादि–शब्दवाच्यत्वम्। अत एवापृथक्सिद्धप्रभादिवाचिनामपि दीपपर्यन्तता स्यादिति क्षुद्रोपद्रवाश्च निरस्ताः, प्रभात्वरूपप्रवृत्तिनिमित्ताश्रयत्वाभावादित्याहुः।

अत्रेदं चिन्तनीयं – जात्यादिवत्तदेकाश्रयत्वतदेकप्रयोजनत्वतत्प्रकारतैक–स्वभावत्वैः शरीरस्याप्यात्मापृथक्सिद्धत्वं प्रसाध्य जातिगुणवाचिनामिव तद्वाचिनां विशेष्यपर्यन्तसामानाधिकरण्यमुपपाद्य तत्र जातिगुणरूपादिशब्देष्वतिप्रसङ्गमाशङ्क्य तेषां निष्कर्षकत्वान्निष्कर्षकेतरतद्वाचिनामेव तथात्वमिति निश्चित्य, अतो देवमनुष्यादिशब्दा अपि गवादिशब्दवत् विशेष्यपर्यन्ताः, देवमनुष्यविशिष्टानां जीवानां परमात्मनश्शरीरतया तत्प्रकारत्वाज्जीवात्मवाचिनश्शब्दा अपि परमात्मपर्यन्ता इत्युपसंहृतं भाष्ये। सर्वसामानाधिकरण्यस्यानुयाय्येवापृथक्सिद्धप्रकारत्वं निमित्तमास्थेयं नतु जातित्वं गुणत्वं जातिगुणान्यतरत्वं चेति। तत्र हेतुश्चोक्तष्टीकायां गङ्गायां घोष इत्यादौ प्रवाहकूलयोर्गङ्गापदप्रवृत्तिनिमित्तस्यानुगतस्याकारस्यादर्शनात् तद्बलाल्लाक्षणिकत्वं युक्तम्। अत्र तु यत्र यत्र विशेष्यपर्यन्ताभिधायित्वेन प्रयोगो दृष्टस्तत्र तत्र प्रयोगेष्वनुगताकारदर्शनादननुगताकारप्रयोजकत्वाश्रयणेन क्वचिल्लाक्ष–णिकत्वं वक्तुं युक्तम्। अन्यथा अद्रव्यत्वे सति विशेषणत्वं विशेष्यपर्यन्ताभिधाने प्रयोजकमिति न वक्तव्यम्। जातित्वं गुणत्वं वा प्रयोजकमस्तु, अन्यल्लाक्षणिकं स्यात्। न च तथा भवदभिमतम्। जातिगुणवाचिनामुभयेषामपि हि शब्दानां विशेष्यपर्यन्ताभिधायित्वेन प्रयोगदर्शनात्। तस्माच्छरीरवाचिनामपि शब्दानां विशेष्य–पर्यन्ताभिधायित्वेन प्रयोगदर्शनात् प्रयोगेषु सर्वेष्वनुगताकारदर्शनाच्चाननुगता–

कारान्तरस्य प्रयोजकत्वकल्पनेन अन्यतमस्या–मुख्यत्वकल्पनाया अयुक्तत्वादिदमपि सामानाधिकरण्यं जातिगुणवाचिनामिव मुख्यमेवेति। अत्र प्रकारवाचिनां पदानां प्रकारिणि मुख्यतायामपृथक्सिद्धप्रकारवाचित्वं नियामकमित्युक्तमेव। अत्र यद्यपि जातिः गुणो द्रव्यं चेति त्रयोप्यननुगताः तथाप्यपृथक्सिद्धप्रकारत्वेन त्रयोप्यनुगताः, अनुगतसामा–नाधिकरण्यप्रयोजका इत्यपि निदर्शितम्।

सामानाधिकरण्यस्य मुख्यत्वे च तद्घटकपदानां मुख्यया वृत्त्या एकार्थनिष्ठत्वम्। तदभावादेव अग्निर्माणवकः, आयुर्घृतं, गौर्बाह्लीकः, तेजो घृतम् आदित्यो यूपः, यजमानः प्रस्तर इत्यादिषु लौकिकवैदिकप्रयोगेषु सामानाधिकरण्यं गौणमाश्रितं तत्सिद्ध्यादिभिश्च। तदुपपादकं खण्डो गौश्शुक्लः पट इत्यत्र जातिगुणावपृथक्सि–द्धप्रकारावेवाङ्गीकृत्य प्रवृत्तिनिमित्तवत्तया प्रकारिणि मुख्यतामुपगतां प्रतीमः। अत एव तत्प्रकारकमेव बोधं तदुभयस्मादुपलभामहे। प्रवृत्तिनिमित्तवाचिना च भावप्रत्ययेन गोत्वं, शौक्ल्यं, शुक्लिमेत्यादिपदेन विधीयमानं न तु जातिगुणादिगतं निमित्तान्तरम्। तत्कुतो देवोऽहमित्यदावपृथक्सिद्धप्रकारभूतं द्रव्यमपहाय तद्गतदेवत्वमनुष्यत्वादेः परंपरया आत्मगतत्वसंपत्तये यत्नः क्रियते। सामानाधिकरण्यं च तन्निर्वाह्यं तन्निर्वाहकतया कथं समाश्रीयते। किञ्चैवं भूतले घट इति सामानाधिकरण्याभावात् भूतलस्य घटत्वाभाववत् रूपं घट इति सामानाधिकरण्याभावाद्रूपत्वगुणत्वा–देर्घटत्वाद्यवृत्तितया पृथक्सिद्धप्रकारवाचित्वेऽपि तेषां विशेष्यपर्यन्ताभिधानशक्ति–विरहोपपत्तौ निष्कर्षकेतरत्वं तद्व्यावर्तकतया विशेषणं किमर्थमुपादीयते। कथं वा अग्निर्माणवक इत्यादिषु सदपि सामानाधिकरण्यमग्नित्वादेर्माणवकादिग–तत्वानियामकम्। यथा देवोऽहमित्यादौ देवत्वादेरात्मवृत्तितानियामकमभूत् मुख्यमेव तन्नियामकम्। अग्निर्माणक इत्यादि त्वमुख्यमेवेति चेत्, प्राप्तं तर्हि इतरेतराधीन–स्वार्थनिर्णयत्वादितरेतराश्रयणम्। सति सामानाधिकरण्यस्य मुख्यत्वे तेन प्रवृत्तिनिमित्तस्य विशेष्यवृत्तित्वं, सति च तस्मिन् प्रवृत्तिनिमित्ताश्रयत्वात् आत्मनोऽपि तस्य मुख्यत्वमिति।

नन्वबाधितमेव सामानाधिकरण्यं विशेषणवाचकप्रवृत्तिनिमित्तस्य विशेष्य–वृत्तिताग्राहकम्। अग्निर्माणवक इत्यादिसामानाधिकरण्यं तु बाधितम्। नायमग्निः किमपि तत्सदृशः इत्येव व्यवहारादिति चेत्। मैवम्। मम शरीरं नाहं देहः, किन्तु देहपिण्डः, पृथग्यतः पुंसः शिरःपाण्यादि इति बाधस्येहापि तुल्यत्वात्।

ननु विषमोऽयं दृष्टान्तः, अग्निर्माणवक इत्यादौ ययोः पदयोस्सामानाधि करण्यघटकता तत्पदप्रयोगेनैव भेदव्यपदेशः सामानाधिकरण्यबाधं गमयेत्। इह तु देवादिपदैस्सामानाधिकरण्यं देहादिपदैश्च भेदव्यपदेश इति नैतादृशो भेदव्यपदेशः सामानाधिकरण्यविरोधी। अत एव रूपं न घट इति गुणो न घट इति भेदव्यपदेशो न नीलो घट इति सामाना– धिकरण्यविरोधीति चेत् तथापि नायं देवो मनुष्यो वेत्यादिभेदव्यपदेशस्य सामानाधिकरण्य– विरोधिन इहाप्यनपायात्। किंचैवं ब्रह्मणश्चिदचिद्व्यतिरेकनिर्देशस्यान्तर्यामिब्राह्मणादिषु बहुशो दर्शनात् ब्रह्मैवेदमिति सामानाधिकरण्यस्यापि बाधितत्वात् तत्प्रवृत्तिनिमित्ताश्रयस्य सुतरां बाधात् किमपि

पदं परमात्मपदं न स्यादिति सर्वमिदमुपपादनं प्रकृतानुपयुक्तं स्यात्। अतो नियतनिष्कर्षकेतरापृथक्सिद्धप्रकारवाचिपदघटितं सामानाधिकरण्यं मुख्यमन्यदमुख्य–मित्येव वक्तव्यम्। अज्ञादिशब्दाश्च पृथक्सिद्धवचना इति क्वाचित्कस्तत्सामानाधि–करण्यनिर्देशो न मुख्यः। देवादिशरीरवाचिशब्दास्त्वपृथक्सिद्धप्रकारवचना इति तत्सामानाधिकरण्यं मुख्यमेव। देहादिशब्दास्तु गुणरूपादिशब्दवन्नियतनिष्कर्षकाः। अतस्तद्घटितसामानाधिकरण्यं त्वमुख्यमेव। निष्कर्षनैयत्यं हि तत्सामानाधिकरण्येन प्रयोगानर्हत्वम्। अतः शरीरशरीरिभाव– प्रकरणगतव्यतिरेकनिर्देशोऽविरोधीति। अतो जातिगुणद्रव्याण्येवापृथक्सिद्ध– प्रकारत्वेनानुगतानि प्रकारिपर्यन्तानि मुख्यानि निमित्तभूतानीत्येव भाष्यटीकयोस्तात्पर्यम– वगमनीयम्। प्रवाहकूलयोरनुगताकारस्य प्रवृत्तिनिमित्तस्यादर्शनादुक्तं गङ्गापदस्य कूले लाक्षणिकत्वम्। इहापृथक्सिद्ध–प्रकारत्वस्यानुगतस्य दर्शनान्न क्वापि लाक्षणिकत्वं युक्तमिति टीकाग्रन्थस्वारस्यादिति सुधीभिराकलनीयम्।

युक्तं चैतत्– देवो मनुष्यषण्डो योषित् कर्मभिर्जात इत्यादौ शरीराप्रकारकबोध ास्यैवोदयात्। यत्पदं यत्प्रकारकबोधोत्पादकं तत्पदस्य तत्प्रवृत्तिनिमित्तकत्वौचित्यात्। अत एव देवत्वादयश्शब्दा भावप्रत्ययान्तास्तत्परा एव। अत एव देवत्वे देवदेहोऽयं मनुष्यत्वे च मानुषीति भगवतो देवदेहादिमत्त्वमनुसृत्य लक्ष्म्या अपि देवदेहादिमत्त्वमुप–पादयितुं प्रवृत्ते देवत्वशब्दः प्रयुज्यते। अत एव च देवो जात इति देहविशिष्टस्यात्मन उत्पत्तिप्रतिपादनमुपपन्नम्। देहमात्रपरत्वे देवादयश्शब्दा न प्रयुज्यन्ते। एवं मम देह इतिवन्मम देव इत्यप्रयोगात्। अत एव खण्डे गोत्वमितिवत् मयि देवत्वं, मनुष्यत्वं न देवत्वमित्यादिव्यतिरेकनिर्देशः। अत एव च जातिगुणद्रव्याणां खण्डो गौः, शुक्लः' पटः, देवदत्तोऽहमित्यादौ प्रकारतावचनं श्रीमद्भाष्योक्तं सङ्गच्छते। अन्यथा साक्षात्परंपरया वा जातेरेव प्रकारताश्रयणे तेषां प्रकारतोक्तिरनुपपन्ना स्यात्। अतः टीकाव्याख्यातृणां संस्थानसंस्थानिनोवरनतिभेदात् संस्थानातिरिक्तजात्यभावात् संस्थानरूपजातेः प्रवृत्तिनिमित्तत्वोक्तिरिति कथंचिन्नेयम्।

यद्यपि गौरश्वो हस्तीत्यादयश्शब्दा अपि तत्तद्देहविशिष्टचेतनपरा देवादि–शब्दतुल्याः। तथापि खण्डो गौरित्यादिचाक्षुषप्रत्ययतदभिलापरूपप्रयोगयो–श्चाक्षुषव्यक्तिमात्रविषयत्वात्तत्र जातिवैशिष्ट्यविषयक एवायम्। एवं देवोऽयमित्यादावपि परात्मनः परायोग्यत्वात् देवत्वादिविशिष्टदेहमात्रविषयकत्वे अपरोक्षज्ञानं, परोक्षज्ञानं तु देहविशिष्टात्मविषयकं स्यात्, तत्र देहवैशिष्ट्यविषयकत्वेऽपि नास्माकं विरोधः। देवोऽहं मनुष्योऽहमित्यादावपरोक्षेऽपि देहविशिष्टात्मविषयकत्वं देहांशे चाक्षुषत्वमात्मांशे मानसत्वमित्यादिकं तत्र तत्रोह्यम्। तदेतत्सर्वमभिसन्धायोक्तं चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वादिति। तत्र भाक्तोऽभाक्त इति द्वेधाऽपि च्छेदो भाष्ये दर्शितः। तत्रैकस्य श्रौतत्वेऽपर आर्थः। तत्र ब्रह्मण्यभाक्तत्वस्यार्थत्वादपि तस्य श्रौतत्वं युक्तमिति तत्रैवाभिनिवेशो भाष्यकृतोऽवगम्यते। अत एव सारदीपयोस्स एव सूत्रार्थ उपन्यस्तः। वैदिकानामपि पदानां लौकिकाभिन्नानां लोकावगतव्युत्पत्तिमूलको वाच्यवाचकभावनिर्णयः। अतस्तदविरोधेन वैदिकोऽपि व्यवहारो नेयः। अतः चराचराश्रयः

चराचरव्युत्पन्नशब्दावलम्बनः तद्व्यपदेशो ब्रह्मव्यपदेशो न मुख्य इति हि शङ्का, अतस्सैवापकर्तव्या न भाक्तो ब्रह्मव्यपदेशः अपि तु मुख्य इति। चराचरव्यपाश्रय इति विशब्दोऽपि व्यपदेशप्राचुर्यपरः। ब्रह्माप्रतिपत्तिमूलकतयाऽन्यथासिद्धोऽयं व्यवहारः तत्प्रतिपत्तिमूलशास्त्रव्यवहारसिद्धं ब्रह्मणि मुख्यत्वं नोपरोद्धुं क्षमत इत्येतद्दर्शयितुं तुशब्दो व्यतिरेकनिर्देशश्च। शास्त्रस्थव्यवहारस्य निर्मूलत्वशङ्कावारणाय मूलं दर्शयति तद्भावभावित्वादिति ब्रह्मानुप्रवेशपूर्वकत्वादित्यर्थः। चराचरगतनामरूपव्याकरण–स्येत्यर्थसिद्धम्।

अयं भावः 'सेयं देवतैक्षत' 'हन्ताह मिमास्तिस्रो देवता अनेन जीवेनात्मना–ऽनुप्रविश्य नामरूपे व्याकरवाणी'ति तेजोबन्नशब्दितेषु स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणं ब्रह्मणः श्रूयते। तच्च नामरूपयोस्स्वपर्यन्तत्वार्थमित्युपपादितम्। अतश्चराचररूपकृत्स्नप्रपञ्चस्यान्तर्यामिब्राह्मणाद्युक्तरीत्या परमात्मशरीरत्वात् शरीरवाचिनामपि पदानां शरीरिणि मुख्यत्वात् तद्वाचिभिश्शब्दैः परमात्मनोऽभिधानं मुख्यम्। तन्मात्रगोचरव्यवहारस्तु न मुख्यः, यववराहा– धिकरणन्यायात्। तत्र हि यवादयश्शब्दा लोकानुगुणप्रसिद्ध्यनुरोधात् दीर्घशूकसूकरादौ मुख्याः, प्रियग्वङ्गादिषु शास्त्रस्थप्रसिद्धिविषयत्वादमुख्याः। शास्त्रस्थाः शब्दार्थसबन्धा– नामविप्लवाय यतन्ते। अशास्त्रस्था अर्थप्रतीतिमात्रार्थं प्रयुञ्जते तद्विप्लवमीहन्ते। अतः शास्त्रप्रयोगानुसार्येवार्थः शब्दस्य मुख्यः। तदेतदाह शास्त्रस्था वातन्निमित्तत्वादिति शास्त्रदृष्टया तूपदेश इति च। ननु पिकनेमाधिकरणे पिकादिशब्दानामशास्त्रस्थ– व्यवहारमनुरूद्धय मुख्यत्वमनुज्ञातं, सत्यं असत्यां शास्त्रप्रसिद्धौ तद्व्यवहारादपि निर्णय उक्तः, न तु तद्विरोधे। इह तु तद्विरोधान्नान्यत्र मुख्यत्वम्।

ननु विषमोऽयं दृष्टान्तः, यत्तत्र विजातीयद्वयमुख्यत्वमनेकार्थत्व–कल्पनाप्रसङ्गादयुक्तमित्यन्यतरस्मिन्नमुख्यत्वे वाच्ये शास्त्रस्थप्रसिद्ध्यनुरोधः, इह तु शास्त्रस्थप्रयोगविषयैकदेशे कथममुख्यत्वाश्रयणमिति चेन्मैवम्। विशिष्टवाचिनामपि गवादिपदानां विशेषणभूतजात्यादिविषयप्रयोगस्य मुख्यत्वं न सर्वसम्मतम्। तदिहापि विशेषणभूतचिदचिन्मात्रविषयोऽपि प्रयोगो विशेषणमात्रगोचरत्वादमुख्य एव।

ननु शुक्लादयश्शब्दा गुणप्रवृत्तिनिमित्तका गुणिपर्यन्ता अपि गुणमात्रे मुख्या एव दृष्टाः, अङ्गीकृताश्च सिद्धान्तिनापि, तत् कथमिह विशेषणमात्रपरत्वे लाक्षणिक– तोच्यते। अथ तत्र शब्दभेदाश्रयणान्न दोष, इहापि तर्हि तथैव स्यात्। न च गवादिशब्देष्वतिप्रसङ्गः, तत्र जातिमात्रविषयकप्रयोगस्यैवाभावात्। क्वाचित्कप्रयोगसत्वेऽपि वाऽल्पतरप्रयोगस्य गङ्गापदस्येव लाक्षणिकत्वेनाप्यन्यथासिद्ध्या शक्तिकल्पनपर्यन्तसामर्थ्याभावात्। इह तु चराचरप्रयोगाणां बहुत्वात् शब्दान्तराश्रयणस्य शुक्लादिशब्देष्विवाविरोधात्, न चान्याय्य चानेकार्थकत्वमिति न्यायविरोधात् तदनङ्गीकारः। शक्त्या नानार्थमात्रोच्छेदापत्तेः। न चार्थभेदाच्छब्दभेदकल्पने लाक्षणिकमात्रोच्छेदश्शङ्क्यः। प्रचुराप्रचुरप्रयोगाभ्यां तदव्यवस्था–पनात्। इह तूभयत्र प्रचुरप्रयोगाविशेषात् शुक्लादिशब्देष्विव मुख्यत्वशब्दभेदान्यतराश्रयणमेव युक्तमिति चेत्।

स्यादेतदेवं यदि विशेषो नावधार्येत, अवधार्यते तु विशेषः, तथा हि– अनु

प्रविश्य नामरूपव्याकरणं हि नामरूपयोस्तत्पर्यन्तत्वार्थमिति व्यवस्थापितम्। रूपस्य स्वपर्यन्तता शरीरशरीरिभावेनेत्यन्तर्यामिब्राह्मणादिभिरवगम्यते। अत एव च नाम्नस्स्व-पर्यन्तता वाच्यवाचक भावेनेत्यवसीयते, तत्सृष्ट्वा, 'तदेवानुप्राविशत्', 'तदुनप्रविश्य सच्च त्यच्चाभवत्', 'निरुक्तं चानिरुक्तं च', 'निलयनं चानिलयनं च', 'विज्ञानं चाविज्ञानं च', सत्यं चानृतं च सत्यमभवत्। 'सर्वाणि रूपाणि विचित्य धीरः', 'नामानि कृत्वाऽभिवदन् यदास्ते' 'धाता पुरस्ताद्यमुदा- जहार' 'शक्रः प्रविद्वान् प्रदिशश्चतस्रः' इति तत्तद्रूपविशिष्टतया तत्तन्नाम श्रुतावेवोपपादितम्। नामानि सर्वाणि यमाविशन्ति वचसां वाच्यमुत्तमम्' सर्वे वेदा यत्पदमामनन्ति' सर्वे वेदा यत्रैकं भवन्ति वेदैश्च सर्वैरहमेव वेद्य' इति सावधारणनिर्देशाच्च तस्य वाच्यत्वमन्यत्र तथाऽवगम्यते। कारणवाक्येष्विवान्यत्र प्रसिद्धैश्शब्दैः परमात्मनोऽभिधानमत्रैवो-पष्टम्भकम्। 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमा' इत्यादयश्च तत्रैवानुकूलाः। शास्त्रस्थप्रसिद्धेः प्राबल्यं शक्तिग्राहकत्वं, तदितराप्रसिद्धेश्च दौर्बल्यं शक्तिग्राहकत्वा-भावश्च यववराहाधिकरणसिद्धम्। अतश्शास्त्रस्थप्रसिद्धिवशात् सर्वे चराचरविषया-श्शब्दाः परमात्मनि शक्ताः। तदन्यस्मिन् तद्विशेषणे प्रयुक्ता अपि यवादयः प्रियङ्ग्वादिष्विव अमुख्याः। शुक्लादयस्तु लौकिकप्रयोगमात्रोपजीविनो नैकत्रैव मुख्या इति निर्णेतुं शक्या इति। तुल्यन्यायादुभयत्रैव मुख्या इत्येतद्दर्शयितुं तद्भावभा-वित्वादित्युक्तम्। अतो न कोऽपि विरोधः। चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेश इति पदैरपि चराचरयोः परमात्मशरीरत्वात् तद्व्यपदेशः अपृथक्सिद्ध प्रकारभूतत्त-द्वस्तुव्यपाश्रयस्तत्प्रवृत्तिनिमित्तकः परमात्मव्यपदेशः तत्रैव मुख्य इत्येवमर्थस्सूचितः, तद्भावभावित्वादिति हेतुक्त्या स्पष्टीकृतः।

नन्वेवं सर्वशब्दानां भगवत्परत्वे निष्कर्षानिष्कर्षकविभागो नियतनिष्कर्षकत्वा-वान्तरवैजात्योक्तिश्च किमर्थेति चेत्। पृथिव्याद्यपेक्षया रसगन्धादिपदानां पृथिवीपर्यन्त-प्रयोगाभावार्थतया तदपृथक्सिद्धविशेषणवाचिनां तत्पर्यन्तत्वे व्यभिचारवारणार्था चेत्यवेहि। तथा च टीकाग्रन्थः- 'नियतनिष्कर्षकपदानामपि तथात्वं प्रयोगविशेषापेक्षं, न तु सार्वत्रिकम्। रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः पुण्यो गन्धः पृथिव्यां चे'ति गन्धादिशब्दानामपि परमात्मपर्यन्ततया प्रयोगात्। अतः पृथिव्याद्यपेक्षयैव गन्धादिशब्दानां नियतनिष्कर्षकत्वमिति।

ननु शरीरवाचिनां शरीरिपर्यन्तत्वमुक्तम्। न च रसादयः परमात्मशरीरभूताः, तेषामद्रव्यत्वात्। द्रव्यस्यैव हि शरीरत्वमिष्टम् , शरीरलक्षणे यस्य चेतनस्य यद्द्रव्यमिति द्रव्यपदप्रवेशात्। अत एव हि यस्य वेदाश्शरीरं, यस्य यज्ञाश्शरीरमित्यत्र वेदयज्ञशब्दा-वभिमानिदेवतापर्यन्तौ। गुणक्रियारूपतया अद्रव्यभूतयोस्तयोश्शरीरत्वायोगादित्या-चार्यैरेवोच्यते। देहधर्मभूतानां देहत्वानुपपत्तिर्लोकसिद्धा तत्कल्पनाबीजम्। तच्च रसादिष्वपि समानम्। तत्कथमयं व्यपदेश इति टीकाचार्यैरेवाभिधीयते। अत्र शरीरशरीरिभावेन तदुच्यते, अपृथक्सिद्धप्रकारवाचिनां प्रकारिपर्यन्ततानिरूपण-प्रकरणत्वात्, शरीरत्वाभिधानं त्वपृथक्सिद्धप्रकारत्वार्थतया। द्रव्याणां हि द्रव्यान्तर-प्रकारतैकस्वभावत्वमशरीरभूतेषु दण्डकुण्डलादिषु नास्ति, अस्ति तु भूतसङ्घातरूपेषु

देवमनुष्यादिशरीरेषु सर्वस्य च परमात्मापृथक्सिद्धप्रकारत्वात् परमात्मपर्यन्तता युक्ता। न च निष्कर्षकशब्दत्वान्न परमात्मपर्यन्तता। पृथिव्याद्यपेक्षया नियतनिष्कर्षकत्वेऽपि परमात्मानं प्रत्यनियतनिष्कर्षकत्वात्। तस्य च प्रयोगावसेयत्वात्। शुक्लगुणजातिरूप– शब्दादिष्वपि ह्येषैव गतिः। अतो रसगन्धपदानां पृथिव्यादिसामानाधिकरण्येनाप्रयोगात् परमात्मसामानाधिकरण्येन प्रयोगाच्च पृथिव्याद्यपेक्षया निष्कर्षकत्वनैयत्यं परमात्मानं प्रति तदभावश्च सिद्धः। एतदेव दर्शयति तत्रेवाप्सु पृथिव्यामिति तदाश्रययो– र्वैयधिकरण्येन निर्देशः। यद्यपि रसादयोऽबादिप्रकारभूताः, तथाऽपि अङ्गाङ्गानामपि प्रधानाङ्गत्ववत् चिदचिद्गता– वस्थानां परमात्मगतत्वात् परमात्मप्रकारत्वमस्तीति तदेकप्रकारत्वात् तत्पर्यन्तवाचित्वं तद्वाचिनां शब्दानां युक्तम्। तदेतत्सर्वमभिसन्धाय गीताभाष्यटीकायां तात्पर्यचन्द्रिकायामाचार्यपादैरनुगृहीतं – प्रकारवाचिनां पदानां प्रकारिपर्यन्ताभिधानस्वाभाव्यं जातिगुणादिशब्देष्वपि सामान्य– तस्सिद्धमिति दर्शयितुं प्रकारत्वोपादानम् अभिधानं=मुख्यवृत्त्या बोधनम्। यद्यपि रसादिशब्दा निष्कर्षकाः प्रयुज्यन्ते व्यधिकरणतया चापि, द्रव्योपादानं चतत्, तथापि रसादीनां परमात्म– शरीरभूतद्रव्यप्रकारत्वेन परमात्मप्रकारत्वात् रसादिशब्दानां चात्र तत्समानाधिकरणतया प्रयोगात् तत्र निष्कर्षकत्वं नास्तीत्यभ्युपगन्तव्यम्। द्रव्योपादानं तु तत्र तत्र द्रव्ये प्रध ानभूतरसगन्धादि प्रकारभूतोऽहमिति ज्ञापनार्थम्। द्रव्यप्रकाराणां च तत्प्रकारत्वं काठिन्यवान् यो बिभर्ति तस्मै भूम्यात्मने नम इत्यत्र प्रसिद्धमिति भावः।

एतेन 'अहं क्रतुः, अहं यज्ञः, वेदानां सामवेदोऽस्मि इत्यादिनिर्देशोऽपि व्याख्यातः तेषामद्रव्यत्वेप्यपृथक्सिद्धप्रकारवाचिनिष्कर्षकेतरशब्दरूपतया सामानाधिकरण्यनिर्देशा– विरोधात्। तस्मान्नामरूपसंबन्धाऽऽवेदनाद्रूपसंबन्धस्य शरीरशरीरिभावेन नामसंबन्धस्य वाच्यवाचकभावेन वक्तव्यत्वात् सर्वशब्दवाच्यत्वं परमात्मनो दुर्वारम्। प्रयोगश्च चराचरगोचरनियतनिष्कर्षकेतरशब्दाः प्रकारिपर्यन्तयुक्तिकाः अपृथक्सिद्धप्रकारविषयक– नियतनिष्कर्षकेतरशब्दत्वात् जातिगुणविषयनियत–निष्कर्षकेतरशब्दवत्। चराचरप्रकारी परमात्मा। यद्वा ब्रह्मैवेदं विश्वमित्यादिसमानाधिकरणवाक्यं विशेष्यपर्यन्तशक्तिम– द्विशेषणपदघटितं, अपृथक्सिद्धप्रकार विषयकपदघटितसमानाधिकरणवाक्यत्वात्, खण्डो गौः शुक्लो घट इतिजातिगुणविषयकपदघटितवाक्यवत्। ब्रह्म सर्वविषयक– पदाभिधेयं सर्वापृथक्सिद्धप्रकारत्वात् यो यदपृथक्सिद्धप्रकारकः स तद्वाच्य इति सामान्यतो व्याप्तौ जातिगुणप्रकारिणौ तत्पदवाच्यौ दृष्टान्तौ। अत्रापि नियतनिष्कर्ष– केतरत्वादिकं व्याप्तिशरीरे यथायथमूह्यम्।

ननु नामरूपे व्याकरवाणीति नामरूपनिर्वाहकत्वमात्रमुच्यते, न तु नामरूपाभ्यां संबन्धः, आकाशो ह वै नामरूपयोर्निर्वहिता, ते यदन्वरा इत्यत्र प्रथमेन वाक्येन नामरूपव्याकर्तृत्वमुक्त्वा द्वितीयेन वाक्येन नामरूपासंस्पर्शवचनात्। तथा च 'आकाशोऽर्थान्तरत्वादिव्यपदेशादित्यत्र श्रीमद्भाष्यं –'यस्मादयमाकाशो नामरूपे अन्तरा ताभ्यां अस्पृष्टोऽर्थान्तरभूत' इति। 'सनामरूपेण विनामरूपस्सेव्यः कथं स्यात्स सनामरूप' इति महर्षिवचनं तस्योपास्यस्य नामरूपसंबन्धविरहं कथयति। तत्पदप्रवृत्तिनिमित्ताश्रयत्वस्यैव तत्पदवाच्यताप्रयोजकत्वादिति चेन्न। तत्प्रकारवाचितायां

यत् निमित्तं तदाश्रयत्वं यदि प्रकारिवाचित्वे प्रयोजकमित्याश्रीयते तदा जातिगुणवाचिनोरप्रसिद्धं, जातिवाचितायां निमित्तस्यैवाभावात्। गुणवाचितायां निमित्तभूताया गुणगतजातेः प्रकार्यवृत्तितया तद्वाचितां प्रत्यप्रयोजकत्वात्। गुणगतजात्यनङ्गीकारेऽत्रापि तदसंभवाच्च। तद्वा ततोऽन्यद्वा यत्किंचिन्निमित्तमादाय तदाश्रयत्वं तत्पदवाच्यतानिमित्तमित्याश्रयणे तु प्रकृतेऽपि तदस्त्येवेति विरोधः। गुणजातेः गुणवाचितायां तद्रूपेणानुगतानां गुणानामेव गुणवाचितानिमित्तत्वमिव शरीरवाचित्वे निमित्तभूतदेवत्वादिनाऽनुगानां देवत्वाद्या– श्रयदेहानामेव प्रकारीभूतात्मवाचिता–निमित्तत्वमित्यङ्गीकारात्। सर्वत्र प्रकारभूतस्यैव प्रकारिवाचित्वेनानुगतत्वात्। प्रकारवृत्ति–धर्मस्तु नानुगतः, जातिशब्देष्वभावात्। क्वचित्प्रकारः क्वचित्प्रकारवृत्ति–धर्म इत्युक्तावननुगमात्, प्रकारवृत्तिधर्मस्य प्रकारिणि वृत्त्यसंप्रतिपत्तेः। साक्षात्तदाश्रयत्वं हि नास्ति प्रकारिणि, परम्परया तदाश्रयत्वं तु न प्रकारे, उभयसाधारणमाश्रयत्वमात्रं तु परम्परया लौहित्याश्रयत्वस्य स्फटिकेऽपि विद्यमानत्वाल्लोहितपदवाच्यतायाः स्फटिके अतिप्रसङ्गान्न ग्राह्यम्। परंपरया तत्र तद्वृत्तित्वानङ्गीकारे तु परंपरया लोहितः स्फटिक इति स्फटिकप्रतीते– र्विशेष्यावृत्तिप्रकारतया प्रमात्वाभावापत्तिः। एवमुष्णं जलमित्यादावप्यतिप्रसङ्गो दुर्वारः, कालान्तरे तदभावप्रतीतेः। अबाधितप्रतीतेरेव तदाश्रयताग्राहकत्वे बालयुवस्थविरादि– पदानामपि अवाचकताप्रसङ्गो दुरपह्नवः। बालत्वादेरपि कालान्तरे बाधात्। अतोऽपृथक्सिद्धप्रकारवाचित्वमेव तदाश्रयताग्राहक–मित्यन्ततो गत्वाऽऽस्थेयम्। ततस्तद्धेतोरेवेति न्यायात् तदेव प्रयोजकमित्युक्ततर्क–सहकारात् नाप्रयोजकत्वम्।

यत्तु ते यदन्तरेति नामरूपासंस्पर्शोक्तेः नामरूपव्याकरणं नामरूपनिर्वोढृत्वमात्रं विवक्षितमिति तत्तु सपर्यगाच्छुक्रमकायमव्रणं, अशरीरं शरीरेषु अशब्दस्पर्शमरूप–मव्ययमित्यादिवत् कर्मकृतनामरूपासंबन्धविषयकतया न्यायसिद्धमिति टीकायामेव व्याख्यातम्। निषेधस्य प्रापकप्रमाणपूर्वकत्वेन लौकिकनामरूपसंबन्धस्य कर्मकृतत्वेन तेनैव रूपेण निषेधप्रतियोगितया स्वेच्छाकृतनामरूपसंबन्धस्य प्रागुदाहृतानेकश्रुति–प्रतिपन्नस्यानिषेध्यत्वात्। अन्तराशब्दस्य मध्यदेशवाचितया लोके मध्यस्थस्य साक्षिणो वादिप्रतिवादिसंबन्धशून्यत्वस्येवेह नामरूपयोः कर्मकृतप्रसिद्धसंबन्धशून्यत्वस्यैव तदर्थतया श्रुतिप्रसिद्धत्वात् कर्मकृतसंबन्धानिवारकत्वात्। अतस्सर्वे शब्दास्त–त्तच्छरीरकपरमात्मवाचकाः। कथं तर्हि आकाशप्राणवैश्वानराधिकरणेषु योगमात्रा–श्रयणमिति चेत् प्रतिपत्तिलाघवात् आकाशप्राणादिप्राग्भाविपदार्थकारणत्वप्रतिपत्तये च, न तूक्तयुक्त्यभावादिति गृहाण। अत एव भाष्य एवाकाशप्राणादिशरीरकतयापि तच्छब्दवाच्यत्वं तत्रतत्रोच्यते।

ननु ब्रह्मण्येव सर्वपदानां मुख्यत्वमिति मते लोकव्यवहारास्सर्वेऽपि अमुख्यास्स्युः, शास्त्रीयाश्चिदचिद्गोचरास्सर्वे कार्यव्युत्पत्तिवादिन इव लाक्षणिका भवेयुरिति चेत्। ओमिति ब्रूमः। न्यायप्राप्तत्वाद्विशिष्टपरत्वस्य, विशेषणमात्रपरतायां लक्षणाया अपि लोकसिद्धत्वात्। शक्तिस्तावत् द्विविधा अवयवशक्तिः समुदायशक्तिश्चेति। एवं लक्षणापि द्विविधा शक्यसंबन्धरूपा, शक्यगुणसंबन्धरूपा चेति। सैव गुणसंबन्धरूपत्वात

गौणीत्युच्यते। तत्रावयवशक्तेस्समुदायशक्तिर्बलीयसी स्वविषयेऽवयवशक्तिमपहरति। लक्षणापि च गौणमिति सर्वलोकसिद्धम्। समुदायशक्तिरपि विशेषणमात्रपर्यवसायिनी विशिष्टपर्यवसायिनी च।[7] सैवापर्यवसानवृत्तिरित्युच्यते। यथा शुक्लादिपदानां तद्विशिष्टगुणिपर्यवसानं लोकात्। चिदचिद्वाचिनां च तद्विशिष्टजीवपरमात्मपर्यन्तत्वं लोकशास्त्राभ्याम्। लोकाद्धि देवदत्तादयश्शब्दाः तद्विशिष्टात्मपर्यन्तास्तत्प्रत्यायकाः। शास्त्रात्तु तद्विशिष्टपरमात्मपर्यन्ताः प्रत्यायकाः यथेन्द्रप्राणादिशब्दास्तत्तदुपासना–विषयगताः। एवं पङ्कजादिपदेषु यथा योगरूढ्योरवयवसमुदायशक्तिरूपयोरपि युगपदुपस्थितौ बोध्यबोधकभावः यथा उद्भिच्छब्दः खनित्रादौ योगेन वर्तते यागविशेषे तु रूढ्या। न तावता योगेन लोके खनित्रादौ न प्रयुज्यते, रूढिर्लब्धात्मिका योगं बाधते न त्वलब्धात्मिकेति न्यायः। एवं समुदायशक्तावन्तर्भावितायामपि अपर्यवसान–शक्तिवृत्तौ विशेष्याप्रतिपत्तिदशायां विशेषणमात्रपर्यवसायिप्रयोगो न दुष्यति। न हि लौकिकाः परमात्मशब्दस्य अपर्यवसानवृत्त्या विशेष्यपर्यन्ततां जानते न वा वेदान्तन्यायम्। यथा हि द्विरेफचरूपुण्डरीकावदातशब्दात् भृङ्गस्थालीसिताम्भोजधा–वल्यादिवस्तुपर्यायतो लाक्षणिकानपि निर्विचिकित्सं प्रयुंजते चैतावतेतरत्र शक्ता एव। अतस्तत्र तत्रानुपपत्तिप्रतिसन्धानमन्तरेण प्रयुज्यमाना न केवलं लाक्षणिका एवेति प्रतिपत्तव्याः। अतस्तत्र ते पामररूढ्या शक्तिभ्रमेण प्रयुज्यन्ते, तावता न्यायानां नाभासत्वम्। तदिहापि सर्वेषां परमात्मापृथक्सिद्धतया तद्वाचिनां परमात्मपर्यन्तत्वेऽपि तदपर्यवसानवृत्तिं चाजानद्भिः शास्त्रस्थैस्तेषु तेषु ते ते शब्दा भङ्क्त्वा प्रयुज्यमानाः पामररूढिमूलाश्शक्तिभ्रममूलाश्च निश्चीयन्ते। कुशलप्रवीणादिशब्दवन्निरूढलक्षणावन्तो वा ते भवन्ति। न तावता अन्यथाकर्तुं ते शक्याः। न चैवं जातिशक्तिवादिनोऽपि नापराध्येरन्निति शङ्क्यम्, बाधकसद्भावासद्भावाभ्यां विशेषात्। उक्तानि हि बाध–कानि तत्र। नात्र किंचिदपि बाधकम्। साधकं चास्तीत्युक्तम्। पण्डितप्रतिपत्तेः पामरप्रतिपत्तिर्हि दुर्बला, तन्मूलायास्तन्मूलापि वृत्तिर्बलीयसी स्वविशेष्यविषये। अतस्तद्विषये वैदिकीं प्रतिपत्तिमुपजीव्य प्रवर्तमाना वैदिका लौकिकाश्च व्यवहारा नापराध्यन्ति। यथा शास्त्राध्ययनपारायणादिवत्तत्कार्यवर्जितोऽपि वर्णनिर्देशो नापराध्यति। तेन विना तदनिष्पत्तेः, तद्वदिहापीति सर्वमवदातम्।।

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासतातार्यतनुजनुषा लक्ष्म्यम्बा–
गर्भशुक्तिभुक्तिफलवपुषा कौण्डिन्यश्रीनिवासदीक्षितकटाक्षवीक्षा–
संलब्धमीमांसाद्वयमतिविभवपुषा निजाग्रजाण्णयार्यदीक्षित–
परिचर्यासमासादितचतुस्तन्त्रीविनोदजुषा श्रीनिवासविदुषा
विरचितं प्रधानप्रतितन्त्रदर्पणाख्यं प्रकरणम्
समाप्तम्

।। श्रीः ।।

शाब्दापरोक्षपरिशीलनम्

महामहोपाध्यायः प्रो. एन्. एस्. रामानुजताताचार्यः
तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य
कुलपतिचरः

अद्वैतवेदान्तानुसारिषु केचिदाचार्याः शब्दादपि अपरोक्षज्ञानं भवतीति श्रुत्यादिप्रमाणेन साधयन्तः तत्त्वमस्यादिवाक्यजन्यं ब्रह्मापरोक्षज्ञानं मुक्तिहेतुः इति प्रत्यपादयन् । तदुक्तप्रमाणानां युक्तीनां च परामर्शपूर्वकं शब्दादपरोक्षज्ञानं न सम्भवतीति सर्वतन्त्रस्वतन्त्रैः श्रीमद्वेदान्तदेशिकैः शतदूषण्यां शाब्दापरोक्षभङ्गवादे निरूपितमस्ति । अतिगहनं विषयमिमं स्पष्टं सर्वान् बोधयितुं निबन्धोऽयं पूर्वपक्षसिद्धान्तरूपेण व्यरचि ।

विभूत्यंशे यस्य स्फुरति जगतामक्षमखिलं
श्रुतिर्जात्यन्धानामुपदिशति यं रूपमिव नः ।
निजाध्यक्षप्रेक्षाचुलकितसमस्तः स्वयमसौ
हृषीकेशो दिव्यं दिशतु मम चक्षुः स्वविषयम् ।।

जगतां = प्राणिनाम्, अखिलमक्षम् – सर्वाणीन्द्रियाणि, यस्य हृषीकेशस्य, विभूत्यंशे = योग्ये विभूत्येकदेशे – नियाम्यजगदेकदेशे, स्फुरति = प्रकाशम् उपजनयति । अथवा स्फुरति – भग्नं भवति । प्रथमपक्षे प्राणिनामिन्द्रियाणि योग्यानि विभूत्येकदेशभूतानि वस्तून्येव प्रकाशयितुं शक्नु-वन्तीति स्थिते कथमयोग्यं ब्रह्म प्रकाशयेयुः इति भावः । द्वितीयपक्षे प्राणिनामिन्द्रियाणि योग्यविभूत्यन्तर्गतकतिपयपदार्थानपि न प्रकाशयितुं शक्नुवन्तीति स्थिते कथमयोग्यं ब्रह्म प्रकाशयेयुरिति भावः । जात्यन्धानां = जन्मना चक्षुरिन्द्रियविकलानाम् , रूपमिव – शुक्लनीलादिरूपमिव श्रुतिः नः = अस्माकम्, यम् उपदिशति । अन्धान् प्रति इदं शुक्लम् इत्याद्युपदेशे कृते तादृशोपदेशात् जायमानमन्धानां शुक्लादिविज्ञानं यथा प्रत्यक्षरूपं न भवति तथा शब्दात्मकोपदेशजन्यं ब्रह्मज्ञानमपरोक्षं न भवनीति भावः । निजाध्यक्षप्रेक्षाचुलकितसमस्तः– स्वतस्सिद्ध सर्वसाक्षात्कारः हृषीकेशः – इन्द्रियनियन्ता स भगवान् स्वविषयकं-स्वसाक्षात्कारसमर्थम्, दिव्यम् – अप्राकृतम्, चक्षुः मम मह्यम्, दिशतु – ददातु । अनेन वादार्थः संगृहीतो भवति । न हि रूपस्य प्रत्यक्षयोग्यत्व-मस्तीत्येतावता जात्यन्धश्रुतो रूपोपदेशस्तस्य प्रत्यक्षहेतुः । करणनिरपेक्षं तु प्रत्यक्षं स्वभावतः सर्वविषयकं स्यात् यथेश्वरस्य, जन्यप्रत्यक्षं तु चक्षुरधीनमेव । अर्जुनस्य कदाचित् सर्वसाक्षात्कारस्तु भगवद्दत्तेन दिव्यचक्षुषा । यदि वाक्यमेवापरोक्षजनकं स्यात् दिव्यचक्षुर्दानमफलम् । उपदेशेनैव सर्वसाक्षात्कारसंभवादित्याशयः ।

पूर्वपक्षः

यदूचिरे अद्वैतिनः – गुरोः सकाशात् 'तत्वमसि' इत्यादिवाक्यश्रवणसमये जायमानं परोक्षं ब्रह्मात्मैक्यज्ञानं यद्यप्यविद्यां न निवर्तयति, तादृशे ज्ञाने सत्यपि अविद्यानिवृत्तेरदर्शनात् । तथापि मनननिदिध्यासनाभ्यामनुगृहीतं तदेव वाक्यमविद्यानिवर्तकमपरोक्षं ज्ञानं जनयति । न च पूर्वमेव तद्वाक्यं कुतोऽपरोक्षं नाजनयदिति वाच्यम् । असंभावना विपरीतभावनयोः प्रतिबन्धकयोः भेदवासनामूलकयोः स्थितत्वात् ।

ऐक्यविषयकमनननिदिध्यासनाभ्यां तु भेदवासनायां निवृत्तायां तन्मूलकयोः असंभावनाविपरीतभावनयोः निवृत्तौ अपरोक्षज्ञानं तस्मात् वाक्यात् जायते । न च शब्दस्य कथमपरोक्षज्ञानजनकत्वमिति वाच्यम् । इन्द्रियस्यापि कथमिति प्रसङ्गात् । इन्द्रियस्यापरोक्षज्ञान–जनकत्वदर्शनात् इन्द्रियस्यापि कथमिति न प्रसङ्ग इति चेत् – वाक्यस्यापि अपरोक्षज्ञानजनकत्वदर्शनात् कथमिति न प्रसङ्ग इति तुल्यम् । वाक्यस्यापरोक्ष ज्ञानजनकत्वदर्शनं कुत्रेति चेत् – 'संवित् स्वप्रकाशा' 'दशमस्त्वमसि' इत्यादिषु । संविद्विषयकः प्रकाशः ज्ञानं, दशमत्वविशिष्टविषयकं ज्ञानं च तादृश–वाक्याभ्यां क्रमशो जायते । तत् ज्ञानं परोक्षं न प्रत्यक्षमिति वक्तुं न शक्यते । स्वानुभवविरोधात् । प्रत्यक्षे विषये परोक्षं ज्ञानमित्यस्य विरुद्धत्वात् । अन्यथा प्रत्यक्षभूतविषयविषयकं ज्ञानं यदि परोक्षं स्यात् तदा शुक्तितत्त्वविषयकः प्रकाशोऽपि परोक्षः स्यात् । तथा च सति रजतावभासः स्यात् शुक्ततत्त्वप्रकाशे सत्यपि, अपरोक्षस्याधिष्ठानतत्त्वप्रकाशस्यैव भ्रमविरोधित्वात् ।

न च तत्वमसि इति वाक्यजन्यमपरोक्षज्ञानमिन्द्रियकरणकम्, न तु वाक्यकरणकमिति वाच्यम् । तदानीं वाक्यस्याबोधकत्वप्रसङ्गात् इन्द्रियस्य वाक्यनिरपेक्षत्वात् । न च रत्नतत्त्वज्ञानं यथा शब्द–सहितेन्द्रियजन्यं सत्यपीन्द्रियसंनिकर्षेऽनधिगतरत्नतत्त्वपरीक्षाशास्त्रः पुष्परागादिभेदं न प्रत्यक्षतः प्रतिपद्यते, अधिगतशास्त्रार्थस्तु प्रतिपद्यते इति । तथा ब्रह्मज्ञानमपीति वाच्यम् । अन्यत्रेन्द्रियवाक्ययोः पृथक् करणत्वेन क्लृप्तयोः अन्यतरेण अत्रापि कार्योपपत्तावन्यतरस्य करणत्वम् अन्यतरस्य तत्सहकारित्वमिति कल्पनायां मानाभावात् । रत्नतत्त्वे तु शब्दमात्रेण प्रत्यक्षादर्शनात् शब्द– सहकृतमिन्द्रियं हेतुः इति विशेषात् । शब्देन्द्रिययोः द्वयोरपि कार्येण ज्ञानेन साकमन्वय– व्यतिरेकयोरविशेषे सति तत् ज्ञानं शब्दसहकृतेन्द्रियजन्यं न तु इन्द्रियसहकृतशब्दजन्यमित्यत्र विनिगमकाभावाच्च । ननु रत्नतत्त्वस्थले शब्देन्द्रियसंभेदे सति इन्द्रियस्य चक्षुषः प्रत्यक्षकरणत्वं क्लृप्तमिति शब्दस्तत्र सहकारिमात्रं न तु करणम् । करणं तु चक्षुरेव । तद्वत् प्रकृते न वक्तुं शक्यम्, चक्षुरादेस्तत्रायोग्यत्वात् । तथा चेन्द्रियस्य सहकारित्वमेव न संभवतीति इन्द्रियसहकृतशब्दजन्यं वेति विपरिवर्त इत्यापादनमेव न संभवतीति चेत् – न । मनः ज्ञानकरणानां सर्वेषां सहकारिकारणमिति तद् गृहीत्वा मनस्सहकृतशब्दजन्यं वेत्यापादनसंभवात् । न च चक्षु र्विहाय मनस एव सहकारित्वं कुत इति वाच्यम् । अन्धस्यान्धतमसि स्थितस्य वा दशमस्त्वमसीति वाक्यश्रवणानन्तरं दशमोऽस्मीति प्रत्यक्षात्मकज्ञानस्योत्पत्तेः तत्र चक्षुषः कार्यकरत्वाभावेन मनस एव सहकारिताया अवश्यस्वीकार्यत्वात् । न चान्धस्य जायमानं तत् ज्ञानं परोक्षमेव, अपरोक्षत्वं तु तत्रारोपितमिति वाच्यम् । तस्यापरोक्षत्वे बाधकाभावात् ।

ननु नेदं रजतमितिवत् प्रत्यक्षबाधस्तत्र यद्यपि नास्ति । तथापि यौक्तिकबाधोऽस्त्येव । मनःशब्दरूपकरणद्वयस्य तत्र विद्यमानतया (मेलनात्) ततः परोक्षापरोक्षरूपकार्यद्वयस्यावश्यकत्वात् । अतस्तत्र दशमत्वविषये परोक्षम् – आत्मविषये प्रत्यक्षमिति ज्ञानद्वयम् । तयोर्ज्ञानयोर्भेदाग्रहात् दशमोऽहमस्मीति व्यवहारो भवति । तथा च दशमोऽस्मीति एकैवापरोक्षधीरिति बुद्धेर्भ्रमत्वमवर्जनीयमिति चेत् – न । तादृशस्थले बुद्धिभेदस्य कदाप्यननुभवात् । तथा च चक्षुरादिकरणान्तरसंनिधानस्थले धीभेदानुपलम्भेन मनसः सहकारित्ववत् शब्दरूपकरणसंनिधानस्थलेऽपि मनस्सहकृतशब्दजन्यत्वं दशमस्त्वमसीत्यादौ प्रत्यक्षस्य सिद्धमिति तत्त्वमसीत्यादिवाक्यस्यापि प्रत्यक्षज्ञानजनकत्वं सिध्यति ।

नन्वन्येषामपि वाक्यानां दशमस्त्वमसीत्यादिवाक्यजातीयत्वेन प्रत्यक्षजनकत्वमस्तु । तथा च वाक्यस्य कस्यापि परोक्षज्ञानजनकत्वं न स्यादिति चेत् – न । न हि किंचिद्वाक्यं प्रत्यक्षजनकमिति कृत्वा

वाक्यजातीयमन्यदपि प्रत्यक्षजनकं भवतु इत्यापादयितुं शक्यते । तथा सति गोः धेनुरूपायाः दुग्धदोग्धृत्वमस्तीति कृत्वा गोजातीयो वृषभोऽपि दोग्धा स्यात् । तथा च घटोऽस्तीत्यादिवाक्यमपरोक्ष-जनकं वाक्यत्वात् दशमस्त्वमसीत्यादिवाक्यवत् इति अनुमानप्रयोग इष्टश्चेत् वृषभो दोग्धा गोत्वात् धेनुवदित्यप्यनुमानप्रयोगः स्यात् । न च तत्र स्त्रीत्वविशिष्टगोत्वमुपाधिरिति वाच्यम् । अत्रापि अज्ञातस्य कस्यचित् उपाधेः संभवात् । न चाज्ञातः उपाधिः कार्योत्पत्तिप्रतिबन्धक इति वाच्यम् । अज्ञातस्यापि स्त्रीत्वविशिष्टगोत्वस्य दोहनरूपकार्योत्पत्तिप्रतिबन्धकत्वाभावात् । कार्यप्रयोजकधर्मः कार्यमुत्पादयति, न तु तज्ज्ञानम् । असतोऽपि धर्मस्य ज्ञानसंभवेन ततः कार्योत्पत्तिप्रसङ्गात् । यथाहुः –

न कारणपरिज्ञानं तत्कार्योत्पत्तिकारणम् ।
न हि बीजाद्यविज्ञानमङ्कुरोत्पत्तिवारणम् ।। इति ।

नन्वस्माभिरज्ञातत्वं यद्यपि न दोषः । तथाप्यत्यन्ताज्ञातत्वे वस्तुसत्तैव न स्यादिति चेत् – निर्णीतस्य स्वतोऽपरोक्षार्थगोचरत्वस्यैवोपाधित्वेन अत्यन्ताज्ञातत्वाभावादुपाधेरिति । स्वत एवापरोक्षः योऽर्थः (ब्रह्म) तद्विषयकत्वं वाक्यस्य प्रत्यक्षजनकत्वे प्रयोजकमिति यावत् । तथा च घटोऽस्तीत्यादिवाक्यं प्रत्यक्षजनकं वाक्यत्वात् दशमस्त्वमसीत्यादिवाक्यवत् इत्यनुमाने स्वतोऽपरोक्षार्थ- गोचरत्वमुपाधिः साध्यव्यापकत्वात् साधनाव्यापकत्वाच्चेत्युक्तं भवति ।

ननु तत्त्वमस्यादिवाक्यस्य प्रत्यक्षज्ञानजनकत्वे किं प्रमाणमिति चेत् निवर्त्यमिथ्यात्वानुपपत्तिरेव प्रमाणम् । ज्ञाननिवर्त्यः अत एव मिथ्याभूतः यः कर्तृत्वभोक्तृत्वादिप्रतिभासरूपः प्रपञ्चः तस्य मिथ्यात्वं निवर्तकस्य ज्ञानस्य साक्षात्त्वमन्तरेणानुपपद्यमानं निवर्तकस्य तत्त्वमस्यादिवाक्यजन्यज्ञानस्य साक्षात्त्वमवगमयति । तथाहि – विश्वं साक्षात्कुर्वति स्वतः शुद्धेऽपि ब्रह्मणि स्फटिकमणौ संनिहितजपाकुसुमरक्ततायाः प्रतिभासवत् कर्तृत्वादि प्रतिभासरूपा अशुद्धिः । सा तत्प्रयुक्तशोकश्च आत्मज्ञानमात्रेण निवर्तत इति 'तरति शोकमात्मवित्' इत्यादिश्रुतिशतेनावगम्यते । युक्तं च मिथ्याभूतस्य ज्ञानमात्रनिवर्त्यत्वम् । मिथ्यात्वज्ञाननिवर्त्यत्वयोः समनियतत्वात् । लोके च अपरोक्षमेव ज्ञानं निवर्तकं दृश्यते । अतः निवर्तकत्वेन श्रुतमात्मज्ञानं प्रत्यक्षात्मकमिति निर्णीयते । तत्र प्रत्यक्षात्मके आत्मज्ञाने किं करणमिति चिन्तायाम् – न तावत् इन्द्रियं करणं भवितुमर्हति । बाह्येन्द्रियस्य प्रत्यगविषयग्रहणसामर्थ्यविरहात् न बाह्येन्द्रियं करणम् । मनसोऽपि सहकारिविशेषमनासाद्य स्वातन्त्र्येण सोऽहमस्मीति ज्ञानोत्पादनसामर्थ्यं नास्ति । शब्दसहकृतस्य संस्कारादिसहकृतस्य वा मनसः करणत्वमस्त्वित्यपि नाशङ्कनीयम् । तथा सति लाघवात् शब्दस्यैव करणत्वोपपत्तेः । यद्यपि शब्दस्यापि साक्षात्कारकरणत्वमसिद्धम्, तथापि शब्दस्य तादृशज्ञानकरणत्वे न विवादः । अतस्तज्जन्यज्ञानस्य साक्षात्त्वमात्रं कल्पनीयम् । मनसस्तु तादृशज्ञानकरणत्वम्, तज्जन्यज्ञानस्य साक्षात्त्वं च कल्पनीयम् । अतो लाघवाच्छब्दस्यैव साक्षात्कारकरण-त्वकल्पनं युक्तमिति । किं च मनसः नित्यशुद्धबुद्ध-मुक्तस्वभावब्रह्मगोचरसाक्षात्कारकरणत्वस्य अदृष्टचरत्वेन शब्दः करणभूतमनस्सहकारीति कल्पन-मयुक्तम् । तथात्वे च – मनसः तादृशसाक्षात्कारजनकत्वस्य दृष्टचरत्वे श्रवणादिसापेक्ष-तयाभिमतेऽपरोक्षज्ञानेऽपि अन्यत्र क्लृप्तस्य मनस एव करणत्वसंभवेन शब्दस्य तत्र करणत्वाभावात् श्रवणादिवैयर्थ्यं स्यात् । श्रवणादिनिरपेक्षपरोक्षज्ञान एव शब्दस्य करणत्वप्राप्तेः । अतः श्रवणादिसाफल्याय शब्दस्यैव ब्रह्मापरोक्षज्ञानकरणत्वं न मनस इति सिद्धम् । न च मनसः ब्रह्मापरोक्षज्ञानकरणत्वाभावे 'न चक्षुषा गृह्यते नापि वाचा' 'मनसा तु विशुद्धेन' 'मनसैवेदमाप्तव्यम्' इत्यादिश्रुतिविरोधः इति वाच्यम् । साक्षात्कारे चित्तैकाग्र्यमपेक्षितमिति बोधने तादृशश्रुतीनां तात्पर्यात्,

मनसः करणत्वबोधने तात्पर्याभावात् । ब्रह्मणो मनोग्राह्यत्वाभावादेव 'अप्राप्य मनसा सह' इति श्रुतिरपि उपपद्यते । न च ब्रह्मापरोक्षज्ञानस्य शब्दकरणकत्वपक्षे 'न चक्षुषा गृह्यते नापि वाचा, यतो वाचो निवर्तन्ते' इति श्रुतिविरोधः तादृशश्रुतेः अखण्डार्थप्रतिपादनाक्षमवाचा न गृह्यत इत्यर्थवर्णनेन यथा परिह्रियते तया 'अप्राप्य मनसा सह' इति श्रुतिरपि अनधिकृत (अपरिशुद्ध) मनोग्राह्यत्वाभावमेव बोधयतीति न तद्विरोध इति वाच्यम् । पूर्वोक्तरीत्या मनसः करणत्वाभावस्य साधितत्वात् यथाश्रुतार्थपरित्यागायोगात् ।

ननु नैयायिकैः आत्मतत्समवेतज्ञानसुखादिप्रत्यक्षकरणत्वं मनसः स्वीकृतम् । तथा च मनसोऽपि प्रत्यक्षकरणत्वस्य क्लृप्तत्वात् ब्रह्मापरोक्ष्ये करणत्वं भवितुमर्हतीति चेन्न । वेदान्तिभिः मानसप्रत्यक्षस्यानङ्गीकारात् । आत्मनः धर्मभूतज्ञानस्य तत्परिणामसुखादेश्च स्वयंप्रकाशत्वात् न तत्प्रकाशे मनोपेक्षेति विशिष्टाद्वैतिनः । सुखादेरन्तःकरणगुणत्वात् अस्वयंप्रकाशत्वेऽपि साक्षिभास्यत्वस्वीकारान्न मनोपेक्षेति अद्वैतिनः । भावनासहकृतमनोजन्यत्वेन पराभिमतस्य साक्षात्कारस्यापि पथिकेन चिन्तितायाः प्रियतमायाः साक्षात्कारस्येव विशदावभासमात्ररूपत्वेन साक्षात्कारत्वाभावात् । तत्र साक्षात्करोमी–त्याकारायाः साक्षात्कारत्वप्रतीतेः भ्रमरूपत्वात् । भ्रान्तिरूपमपि ज्ञानं साक्षिरूपमिति न मानसम् । एतावता इन्द्रियस्य ब्रह्मापरोक्षकरणत्वं नास्तीति न्यरूपि । अनुमानादेस्तु परोक्षज्ञानजननशीलस्य अपरोक्षज्ञानविद्वेषशीलत्वात् ब्रह्मापरोक्षजनकत्वं नास्ति । न च शब्दस्यापि आपरोक्ष्यविद्वेषशीलत्व–माशङ्कनीयम् । दशमस्त्वमसीत्यादौ अपरोक्षज्ञानजनकत्वदर्शनेन आपरोक्ष्यविद्वेषशीलत्वायोगात् । अतः परिशेषात् शब्द एव ब्रह्मापरोक्षज्ञानकरणमिति स्थिते भेदपराणां वाक्यानां भेदभ्रमनिवर्तकज्ञान–जनकत्वायोगात् अभेदपराणि वाक्यान्येव अविद्यानिवर्तकमपरोक्षज्ञानं जनयन्तीति सिद्धम् ।

किं च प्रत्यक्षरूपो यः भेदविषयको भ्रमः तस्य परोक्षात् ऐक्यज्ञानात् न निवृत्तिः संभवति, परोक्षस्य न्यूनबलत्वात् । नापि ऐन्द्रियकप्रत्यक्षात् निवृत्तिर्भवितुमर्हति, द्वयोः समानत्वात् । शास्त्रजन्यं तु प्रत्यक्षं साक्षात्कारत्वाविशेषेऽपि निर्दोषहेतुकत्वात् प्रबलमिति तेनापरोक्षभ्रमस्य निवृत्तिर्भवितुमर्हति तदुक्तम् –

न्यूनत्वाच्च समत्वाच्च परोक्षं नाक्षजं क्षमम् ।
निर्दोषहेतुजन्यत्वात् प्रत्यक्षं शास्त्रजं क्षमम् ।। इति ।

न्यूनत्वात् परोक्षं न क्षमम्, समत्वात् अक्षजं च न क्षमम् । शास्त्रजं प्रत्यक्षं तु निर्दोषहेतुजन्यत्वात् प्रत्यक्षभेदभ्रमनिवर्तनक्षममित्यर्थः । न केवलं परिशेषात् साक्षात्त्वशब्दकरणकत्वयोः सिद्धिः ब्रह्मज्ञानस्य, किं तु 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्यादि श्रुत्यापि साक्षात्कारत्वसिद्धिः । 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' इत्यादिवचनैः शब्दकरणकत्वसिद्धिः । दर्शयतीत्यनेन साक्षात्कारजनकशब्दरूप उपदेशः उक्तः । 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यत्र सुपदेन प्रत्यक्षरूपता उक्ता । अनुमानप्रयोगाश्च शब्दजन्यब्रह्मज्ञानस्य साक्षात्कारत्वसाधका भवन्ति –

विगीतं ज्ञानं साक्षात्कारि तत्त्वमस्यादिवाक्यजन्यज्ञानत्वात् तादृशवाक्यस्वरूपविषयकश्रवणेन्द्रिय–जन्यज्ञानवत् । तत्त्वमस्यादिवाक्यस्वरूपविषयकं श्रावणं ज्ञानं तादृशवाक्यजन्यं प्रत्यक्षे विषयस्य कारणतया प्रत्यक्षस्य विषयजन्यत्वात्, तथा साक्षात्कारि च । तद्वत् ब्रह्मात्मैक्यज्ञानमपि तत्त्वमस्यादिवाक्यजन्यत्वात् साक्षात्कारि ।

एवं विगीतं ज्ञानं साक्षात्कारि अपरोक्षवस्तुविषयकज्ञानत्वात् सुखादिविषयकज्ञानवत् । अपरोक्षभूतं यत् सुखादि तद्विषयकं ज्ञानं यथा साक्षात्कारि तथा 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुत्या अपरोक्षत्वेन पठितं यद्ब्रह्म तद्विषयकत्वात्ब्रह्मज्ञानमप्यपरोक्षम् । एवं ज्ञानपक्षकं साक्षात्त्वसाधकमनुमानद्वयमुक्तम् । अथ

वाक्यपक्षकमनुमानद्वयमुच्यते –

तत्त्वमस्यादिवाक्यम् स्वप्रतिपाद्यविषयकसाक्षात्कारजनकम्, स्वप्रकाशार्थोपदेशरूपत्वात् स्वतोऽपरोक्षार्थविषयकत्वाद्वा, संवित् स्वप्रकाशा दशमस्त्वमसि इत्यादिवाक्यवत् । अथापरोक्षत्व-पक्षकमनुमानमुच्यते –

अपरोक्षत्वम् तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत् । यथा ज्ञानत्वम् अपरोक्षघटादिज्ञाननिष्ठात्यन्ताभावाप्रतियोगि तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति च तथा अपरोक्षत्वमपि तादृशत्वात् तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्तीति साध्यते । ननु परोक्षत्वं तत्त्वमस्यादिवाक्य-जन्यज्ञानवृत्ति परोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत् इत्यप्यनुमानसंभवात् पूर्वोक्तानुमानस्य सत्प्रतिपक्षत्वम् इति चेन्नउक्तप्रत्यनुमानेन तत्त्वमस्यादिवाक्यजन्ययत्किंचिज्ज्ञानवृत्तित्वसाधने सिद्धसाधनात् । तेषामेव वाक्यानां असंभावना विपरीतभावनाप्रतिबद्धचेतसि पुरुषे परोक्षज्ञानजनकत्वाङ्गीकारात् यत्किंचिज्ज्ञानपदेन तादृशज्ञानं गृहीत्वा तद्वृत्तित्वस्य परोक्षत्वे सिद्धत्वेन सिद्धसाधनमिति यावत् । तत्त्वमस्यादिवाक्यजन्ययावज्ज्ञानवृत्तित्वसाधने यद्यपि सिद्धसाधनं न प्रसजति । असंभावनाविपरीतभावना-भ्यामप्रतिबद्धचेतसि पुरुषे यत् तत्त्वमस्यादिवाक्यजन्यं ज्ञानं तस्यापि यावदन्तर्गततया तद्वृत्तित्वस्य परोक्षत्वेऽनुमानात्प्रागनिर्णीतत्वात् । तथापि 'तमसः पारं दर्शयति' इत्यादिपूर्वोक्तश्रुत्या तत्त्वमस्यादि-वाक्यजन्यज्ञानेऽपरोक्षत्वावगमेन परोक्षत्वाभावात् परोक्षत्वे तादृशज्ञानवृत्तित्वसाधने पक्षे साध्याभावरूपः बाधाख्यः दोषः प्रसजति ।

ननु तुल्यरीत्या अग्निहोत्रं जुहोतीत्यादिवाक्यजन्यज्ञानानामपि प्रत्यक्षत्वं सिध्येत् । अपरोक्षत्वम् अग्िहोत्रादिवाक्यजन्यज्ञानवृत्ति अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत् इत्यपि अनुमानप्रयोगसंभवात् तथा च आभाससमानयोगक्षेमता । आभासत्वेनाभिमतेदृशानुमान-समानयोगक्षेमत्वमेव पूर्वोक्तत्वदीयानुमानानामिति चेत् – न । उक्तानुमाने पक्षे हेतुरस्तु अग्निहोत्रादिवाक्यजन्यज्ञानवृत्तित्वरूपं साध्यं मास्तु इति शङ्कायां तन्निवर्तकतर्काभावात् । न हि अग्निहोत्रादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वाभावे तस्य प्रामाण्यानुपपत्तिरेवानुकूलतर्क इति वक्तुं शक्यते । अनुमित्यादेः प्रत्यक्षत्वाभावेऽपि प्रामाण्यवत् अस्यापि तदुपपत्तेः । नाप्यनुष्ठानस्यानुपपत्तिः । परोक्षनिश्चयादेव तदुपपत्तेः । नापि फलस्यानुपपत्तिः । परोक्षनिश्चयाधीनानुष्ठानादेव तस्योपपत्तेः । नापि अनेनेदं फलं मे भूयादित्याकारायाः फलकामनाया अनुपपत्तिः । परोक्षात् फलजननयोग्यता-निश्चयादेव तस्या अप्युपपत्तेः । अतएव परोक्षनिश्चया-देवाग्निहोत्राद्यनुष्ठानानुकूला कृतिरपि उपपद्यत्ते । एवं चाग्निहोत्रादिवाक्यजन्यज्ञानेऽपरोक्षत्वसाधने विपक्षे बाधकस्तर्को नास्ति । तत्त्वमस्यादि-वाक्यजन्यज्ञानस्य अपरोक्षत्वसाधकानुमाने तु विपक्षे बाधकस्तर्को वर्तते । प्रपञ्चनिवर्तकस्य तस्य ज्ञानस्यापरोक्षत्वाभावे निवर्त्यस्य मिथ्यात्वानुपपत्तिर्या पूर्वोक्ता सैव बाधकस्तर्क इति । तथा च विपक्षे बाधतर्कविरहात् अग्निहोत्रादिवाक्यजन्यज्ञानस्यापरोक्षसाधनमाभासः, तत्तुल्यता तत्त्वमस्यादि-वाक्यजन्यज्ञानस्यापरोक्षत्वसाधने नास्ति, विपक्षे बाधकसद्भावादिति । एवं विगीतं ज्ञानं साक्षात्कारि तत्त्वमस्यादिवाक्यजन्यज्ञानत्वादित्यादिषु पूर्वोक्तानुमानेष्वपि विगीतं ज्ञानं साक्षात्कारि अग्निहोत्रादि-वाक्यजन्यज्ञानत्वात् अग्निहोत्रादिवाक्यस्वरूपगोचरश्रावणज्ञानवत् इत्याभाससमानयोगक्षेमता इत्याशङ्कापि विपक्षे बाधाभावादुद्धरणीया ।

तस्मात् विपक्षे बाधकतर्कस्यैव व्याप्तिस्थापकत्वात् महाविद्याख्यानि जातिरूपाण्यनुमानान्यपि प्रत्यक्षत्वसाधकानि यथामति प्रयोक्तुं शक्यन्ते केवलान्वयिनि व्यापके प्रवर्तमानो हेतुः पक्षे व्यापक-

प्रतीत्यपर्यवसानबलात् साध्यविशेषं वाद्यभिमतं साधयन् महाविद्येत्युच्यते । तस्य च हेतोर्महाविद्यात्वं सकलदोषविरहः । उदाहरणम् अयं पर्वतः एतत्पर्वततदितरावृत्तिवह्निमद्वृत्तिधर्मवान् प्रमेयत्वात् । एतत्पर्वततदितरोभयावृत्तिधर्मः एतत्पर्वतमात्रवृत्तिः तदितरमात्रवृत्तिश्च भवति । तदितरमात्रवृत्तिधर्ममादाय पक्षे न साध्यपर्यवसानम्, बाधात् । ततश्च एतत्पर्वतमात्रवृत्तिम् एतत्पर्वतत्वादिकमादाय साध्यपर्यवसानं वक्तव्यम् । एतत्पर्वतत्वादेः वह्निमद्वृत्तित्वं च पर्वते वह्निमत्त्वं विना न संभवतीति अनुमानेनानेन पर्वते वह्निमत्त्वसिद्धिः अयं पर्वतः एतत्पर्वतातिरिक्तवह्निमदन्यान्यः प्रमेयत्वात् यथा महाह्रदः । एतत्पर्वतातिरिक्तात् वह्निमतश्चान्यो यः तदन्यत्वं साध्यम् । तच्च एतत्पर्वतातिरिक्ते वह्निमति च संभवति । एतत्पर्वतातिरिक्तत्वशून्ये एतत्पर्वते पक्षे निरूक्तान्यत्वं वह्निमत्त्वमादाय पर्यवस्यति । दृष्टान्तस्य ह्रदस्य एतत्पर्वतातिरिक्तत्वात् उदाहरणार्थमेकमनुमानमुच्यते-विगीतं तत्त्वमस्यादिवाक्यजन्यं ज्ञानं स्वस्वेतरोभयावृत्त्यपरोक्षनिष्ठधर्माधिकरणं प्रमेयत्वात् इति । अत्र अपरोक्षनिष्ठधर्मः ज्ञानत्वमपरोक्षत्वं च । तयोः ज्ञानत्वस्य स्वपदग्राह्यापरोक्षतदितरपरोक्षोभयवृत्तितया तदादाय साध्यपर्यवसानासंभवात् अपरोक्षत्वमादायैव साध्यपर्यवसानं कर्तव्यम् ।

अपरोक्षत्वं हि अपरोक्षतदितरपरोक्षोभयवृत्ति न भवतीति । ननु भवतैव महाविद्याजातय इति महाविद्यानुमानानां जातिरूपत्वोक्त्या स्वव्याघातकत्वमङ्गीकृतम् । तथा च कथं तस्य साधकत्वमिति चेत् न । अनुकूलतर्कः स्वपक्षेऽस्ति चेत् साधकत्वसंभवात् ।

ननु शब्दजन्यज्ञानस्य प्रत्यक्षत्वसाधकतयोपन्यस्ता हेतवः तर्कपराहताः । शब्दस्य प्रत्यक्षजनकत्वे प्रत्यक्षप्रमाणेऽन्तर्भावप्रसङ्गादिति चेत् – न । अप्रसङ्गात् अभ्युपगम्यते हि परेणापि योगिमनसः बाह्यविषयकापरोक्षप्रमितिकरणत्वम् । तथापि न बाह्यप्रत्यक्षान्तर्भावस्तस्याभ्युपेयते । एवं शब्दस्यापरोक्षप्रमितिजनकत्वेऽपि प्रत्यक्षान्तर्भावो न भविष्यति । अथ तत्र बाह्यप्रत्यक्षान्तर्भावे चक्षुरादिपञ्चकान्यतमत्वं योगिमनोऽन्यत्वे सति बाह्यप्रत्यक्षप्रमितिकरणत्वं वा प्रयोजकमिष्यते । हन्तेहापि तर्हि स्वतोऽपरोक्षब्रह्मात्मविषयकशब्दान्यत्वे सति अपरोक्षप्रमितिकरणत्वं प्रत्यक्षान्तर्भावे प्रयोजकमस्तु ।

किं च तत्त्वमस्यादिवाक्यस्यापरोक्षधीजनकत्वे प्रत्यक्षान्तर्भावप्रसङ्ग इत्यनेन किमिन्द्रि-यान्तर्भावप्रसङ्गो विवक्षितः, उत साक्षात्कारजनकवाक्यान्तर्भावो विवक्षितः । आद्ये मनसः प्रत्यक्षजनकत्वे चक्षुरादिवत् बाह्यत्वं स्यात् इति प्रसङ्गः उपलम्भविरोधात् यथा अशक्यः तदा शब्दस्येन्द्रि-यान्तर्भावप्रसङ्गः इन्द्रियव्यतिरिक्ततया शब्दस्योपलब्धेः तद्विरोधादेवाशक्यः । द्वितीये तु इष्टापत्तिः । ननु कथमिष्टापत्तिः, निर्विशेषं न सामान्यमिति न्यायेन चक्षुरादिविशेषानन्तर्भावे प्रत्यक्षजनक सामग्र्यन्तर्भावस्यापि बाधादिति चेन्न । सामान्यतः प्रत्यक्षान्तर्भावे सति चक्षुराद्यवान्तरभेदाश्रयणवत् शब्दरूपावान्तरभेदस्याप्यश्रयणसंभवात् । सामान्यतः प्रत्यक्षान्तर्भाव एव कथमिति चेत् – दशमस्त्वमसीत्यादौ साक्षात्कारजनकत्वदर्शनस्य समर्थितत्वात् ।

यदि वाक्यमेवापरोक्षां धियं जनयेत् तदा मननिदिध्यासनविधानवैयर्थ्यम् । श्रुतवेदान्तानां संसारानुवृत्तिदर्शनानुपपत्तिश्चेति चेन्न । असंभावनाविपरीतभावनारूपप्रतिबन्धकनिरसनद्वारा मननिदिध्यासनयोः श्रवणाङ्गतया विधानसंभवात् । श्रवणाङ्गत्वं न श्रवणस्वरूपनिष्पादकत्वम् , किं तु श्रवणस्य यत्फलं ब्रह्मात्मसाक्षात्कारः तदुत्पत्त्युपयोगित्वम् । तदपि प्रतिबन्धनिरासद्वारकम् । ईदृशमङ्गत्वं फलोपकार्य-ङ्गत्वमित्युच्यते । संसारानुवृत्तिश्च प्रतिबन्धकयुक्तपुरुषस्य श्रुतवेदान्तस्यापि तस्य साक्षात्कारानुत्पत्तेः, न तु निष्प्रतिबन्धस्य पुरुषस्य । तस्मात् बाधकरहित-अनुग्राहक-तर्कादिसहितश्रुत्यादिसिद्धं तत्त्वमस्यादि-

वाक्यस्यापरोक्षज्ञानजनकत्वमिति ।

पूर्वपक्षतया संगृहीता इमे विषयाः चित्सुखाचार्यकृतायां तत्त्वप्रदीपिकायां वर्तन्ते ।

अथ सिद्धान्तः

अत्र ब्रूमः । यत्तावदुक्तं 'संवित् स्वप्रकाशा' इत्यादिषु केषुचित् वाक्येषु अपरोक्षधीहेतुत्वदर्शनात् तद्दृष्टान्तेन 'तत्त्वमसि' इत्यादिवाक्यानामपि अपरोक्षधीहेतुत्वमुपपद्यत इति तत् नरविषाणाङ्कुरसाधनार्थं गर्दभविषाणाङ्कुरस्य दृष्टान्ततया प्रदर्शनम् इति मन्यामहे । दृष्टान्तस्यैवासिद्धेः । तथाहि –

'संवित् स्वप्रकाशा' इति वाक्यस्य संवित्त्वेन सामान्यरूपेण स्वस्वेतरसमवेताः कालत्रयसंबन्धिन्यः सर्वाः संविदः स्वप्रकाशत्ववत्यः इत्यर्थः । तादृशवाक्यप्रयोगकालिकी तादृशवाक्यजन्या या संवित् सा एका तदानीं स्वप्रकाशा । अतः सा तदानीमपरोक्षा भवितुमर्हति । तादृशवाक्यस्य योऽर्थः त्रैकालिकसर्वसंविद्गतस्वप्रकाशत्वरूपः तस्य तदानीमपरोक्षत्वाविरहात् तद्वाक्यजन्यायाः तद्वाक्यार्थविषयकसंविदः कथमपरोक्षत्वं स्यात्, भवद्भिः अपरोक्षार्थ-विषयकत्वप्रयुक्तत्वाभ्युपगमात् ज्ञानापरोक्षत्वस्य । तस्याः अपरोक्षत्वाभावे कथं वाक्यस्या-परोक्षधीहेतुत्वम् । न च सर्वासां संविदामैक्यात् वाक्यजन्यसंविदः स्वप्रकाशत्वेन स्वषियकतया तदभिन्नसर्वविषयकत्वात् अपरोक्षसंविद्विषय-कत्वेनापरोक्षत्वमिति वाच्यम् । सर्वसंविदैक्यस्य वादान्तरे दूषयिष्यमाणत्वात् । संविदामैक्येऽपि तत्तद्विषयविशिष्टवेषेण परोक्षापरोक्षभेदस्य दुस्त्यजत्वात् । किं च ज्ञानस्य स्वप्रकाशत्वेन स्वग्राह्यत्वेऽपि ज्ञानगतं यत् स्वप्रकाशत्वं तस्य ज्ञानेनाग्रहात् न तदापरोक्ष्यम् ।

ननु 'संवित् स्वप्रकाशा' इति वाक्यजन्यज्ञाने ज्ञानं संवित्स्वप्रकाशत्वमुभयं भासते । तत्र ज्ञानप्रकाशः अपरोक्षः स्वतोऽपरोक्षार्थविषयकत्वात् । अपरोक्षज्ञानप्रकाशहेतुत्वात् तस्यापरोक्षधीहेतुत्वम् । न च तत् वाक्यं संवित्स्वप्रकाशत्वरूपविषयप्रकाशांश एव हेतुः । न तु स्वजन्यज्ञानप्रकाशांशेऽपि । अतः प्रत्यक्षजनकत्वं नास्त्येवेति वाच्यम् । ज्ञानप्रकाशांशेऽपि वाक्यातिरिक्तकारणादर्शनेन तस्यैव कारणत्वात् इति चेन्न । तर्हि अनुमानादेः 'अत्र घटोऽस्तीत्यादिवाक्यान्तराणां चापरोक्षधीजनकत्वं स्यात् । तादृशानुमानादिजन्यज्ञानानामपि स्वप्रकाशत्वेनापरोक्षतया तज्जनकानामपरोक्षधीजनकत्वावश्यं-भावात् ।

ननु विषयप्रकाशाभिन्नप्रत्यक्षजनकत्वं साध्यम् । अनुमानादिषु बह्निमानिति जानामीत्यत्र वह्निमानित्यंशः विषयांशः । जानामीत्यंशः स्वप्रकाशांशः । अतस्तत्र प्रत्यक्षांशस्य विषयप्रकाशा-भिन्नत्वाभावात् नापरोक्षधीहेतुत्वापत्तिः । संवित् स्वप्रकाशेत्यत्र तु वाक्यजन्यज्ञानस्यापि संवित्त्वेन विषयान्तर्भावात् स्वप्रत्यक्षरूपस्वप्रकाशांशः विषयप्रकाशांशश्चाभिन्न इति न दोष इति चेन्न । संवित्त्वेन सामान्यरूपेण अतीतानागतस्वपरसाधारणसर्वसंविदां विषयत्वात् जानामीत्यत्र तदातनवाक्यजन्यज्ञानात्मक-व्यक्तिमात्रगोचरप्रकाशस्य विषयप्रकाशापेक्षया भिन्नत्वात् विषयप्रकाशाभिन्नप्रत्यक्षजनकत्वस्यासंभवात् । यद्यपि विषयांशेऽपि स्वस्यान्तर्भावोऽस्त्येव, तथापि विषयप्रकाशांशः संविदन्तरे इव एतत्संविद्यपि परोक्ष एव आशङ्किता तु स्वप्रकाशतया प्रत्यक्षत्वावश्यम्भावेन विषयप्रकाशांशस्यैव तत्संविदंशे प्रत्यक्षत्वमित्यभिमन्यते । तथापि विषयप्रकाशः सामान्यरूपः ज्ञानप्रकाशः विशेषरूप इति विषयप्रकाश स्वप्रकाशयोः सामान्यविशेषरूपतया भेद इति सिद्धान्ती ।

एवं दशमस्त्वमसीत्यत्र यः स्वस्य दशमत्वं पश्यति तं प्रति दशमस्त्वमसि इति वाक्यमुक्तं चेत् – तदा ज्ञातानुवादरूपं तद्वाक्यम् , यथा घटं पश्यन्तं प्रति उक्तम् अयं घट इति वाक्यं तद्वत् । तथा च प्रत्यक्षसिद्धार्थबोधकत्वमात्रेण वाक्यं प्रत्यक्षजनकमिति भ्रमः । यथा परोक्षे विषये प्रयुज्यमानं वाक्यं न

प्रत्यक्षजनकं तथा प्रत्यक्षविषयेऽर्थे प्रयुज्यमानं वाक्यमपि न प्रत्यक्षजनकम् । शब्दस्य परोक्षज्ञानजनन एव सामर्थ्यात् । यदा तु येन स्वस्य दशमत्वं न ज्ञातं तं प्रति दशमस्त्वमसीत्युच्यते, तदा वाक्यजन्यज्ञानस्य दशमत्वविशिष्टस्वात्मविषयकस्य दशमत्वांशे परोक्षत्वमविवादम् । विशेष्यभूतस्यात्मनः प्रत्यक्षत्वात् विशिष्टमपि प्रत्यक्षमिति भ्रमः स्वात्मविषयकप्रत्यक्षाव्यवहितोत्तरभवत्वात् दशमत्वविशिष्ट-स्वात्मविषयकज्ञानस्य ।

एतेन कदाचिदपि तत्र धीभेदानुपलम्भादिति पूर्ववाद्युक्तं निरस्तम्, करणान्तरसंनिधानात् प्राक् मनसा प्रत्यक्षोत्पादेन तदभेदभ्रमसंभवात् ।

न च विशेष्यस्य प्रत्यक्षत्वात् विशिष्टस्यापि प्रत्यक्षत्वमिति वाच्यम् । पर्वतो वह्निमानित्यनुमितेरपि प्रत्यक्षत्वप्रसङ्गात् । गुरुत्वाश्रयस्य विशेष्यस्य प्रत्यक्षविषयत्वेन गुरुत्वविशिष्टस्यापि प्रत्यक्षविषयत्वे सति गुरुत्वादेः अतीन्द्रियत्वभङ्गप्रसङ्गाच्च । एवं क्षत्रियस्त्वमसीत्यादावपि क्षत्रियत्वं पश्यन्तं प्रत्युक्तं चेत् सिद्धानुवादरूपता । अज्ञातक्षत्रियत्वं प्रति उक्तं चेत् क्षत्रियत्वांशे परोक्षतेति भाव्यम् । अतो न कुत्रापि वाक्यस्यापरोक्षधीहेतुत्वम् ।

यत्तु विषयस्य प्रत्यक्षत्वे सति तद्विषयकज्ञानरूपः प्रकाशोऽपि प्रत्यक्ष एव । अन्यथा शुक्तितत्त्वप्रकाशस्य परोक्षतया तस्मिन् सत्यपि रजतावभासः स्यात् न तु रजतावभासनिवृत्तिः । अपरोक्षस्यैवाधिष्ठानतत्त्वप्रकाशस्य भ्रमविरोधित्वात् इत्युक्तम् । तदप्यसत् । परोक्षत्वमपरोक्षत्वं च किं ज्ञानधर्मः ? उत विषयधर्मः । आद्ये विषयस्यैकत्वेऽपि तद्विषयकपरोक्षापरोक्षज्ञानद्वयसंभवेन ज्ञानव्यक्तिभेदेन परोक्षत्वापरोक्षत्वयोर्विरोधाभावात् । द्वितीये अपरोक्षत्वादेः विषयधर्मत्वेऽपि तद्विषयकज्ञानगते पारोक्ष्यापरोक्ष्ये न विषयगतपारोक्ष्यापरोक्ष्यप्रयुक्ते, एकस्मिन्नेव विषये जायमानेषु इन्द्रियलिङ्गादिजन्यज्ञानेषु वैलक्षण्यानुभवात् । तथा च एकस्मिन्नेव विषये करणद्वयप्रवृत्तौ परोक्षापरोक्षरूपज्ञानद्वयमविरुद्धम् । एवं चापरोक्षेऽपि विषये परोक्षः प्रकाशो भवितुमर्हति इति न परोक्षप्रकाशानुपपत्तिरिति । किं च भवद्भिरेव मननादिभिर्विपरीतवासनायामनिवृत्तायां तत्त्वमस्यादि-वाक्यात् अपरोक्षभूतात्मविषयकं परोक्षं ज्ञानं जायते, भेदवासनायां निवृत्तायामेव तद्विषयकं प्रत्यक्षं जायत इत्युक्तत्वात् अपरोक्षे विषये नास्ति परोक्षप्रकाशव्याघातः ।

यदि प्रत्यक्षे विषये परोक्षप्रकाशः स्वीक्रियते तदा शुक्तितत्त्वप्रकाशे सत्यपि रजतावभासः स्यादिति शङ्कायाः कः परिहार इति चेत् – उच्यते । प्रत्यक्षेऽपि विषये परोक्षः प्रकाशः भवितुमर्हतीत्यस्माभि-रुपपादनसंदर्भे शुक्तितत्त्वप्रकाशे सति रजतावभासप्रसञ्जनस्य का प्रसक्तिः ? आपाद्यमानस्य रजतावभासस्य परोक्षत्वे सति हि तथा आपादनं शक्यम् । रजतावभासस्य तु परोक्षत्वं नास्ति, इन्द्रियान्वयव्यतिरेका-नुविधायित्वात् । तथा च कथं परोक्षरजतावभासस्यापादनम् । ननु परोक्षत्वापरोक्षत्वविवेचनमन्तरा शुक्तित्वेनापरोक्षे विषये भासमाने रजतभ्रममापादयामः न तु परोक्षत्वविशिष्टं भ्रममिति चेन्न । तदा हि शुक्तित्वरूपविशेषाकारग्रहस्य रजतभ्रमविरोधितया नापत्तिः । यद्वा रजतभ्रमं प्रति शुक्तित्वरूपविशेषाकाराग्रहस्य कारणतया तद्घटितसामग्रीवैकल्यात् शुक्तित्वग्रहकाले न रजतभ्रमोत्पत्तिरिति । प्रकृते तु विशेषग्रहरूपप्रतिबन्धकविरहात् अप्रतिबद्धतत्त्वमस्यादिवाक्यघटित परोक्षज्ञानसामग्रीतः परोक्षात्मैक्यज्ञानोत्पत्तौ कानुपपत्तिः ? भवतापि तत्त्वमस्यादिवाक्यघटितसामग्र्याः श्रवणदशायां परोक्षज्ञानजनकत्वमङ्गीक्रियते । अत एव – अपरोक्षे विषये परोक्षप्रत्ययस्याङ्गीकारादेव एवं विधा आपत्तिः भवता न कर्तुं शक्यते तथा हि – आपत्तिस्थले आपाद्यमानस्य परानिष्टत्वम् , आपादकस्य स्वानिष्टत्वं चावश्यकम् । यथा पर्वतो वह्निमान् धूमादित्यत्र धूमोऽस्तु वह्निर्मास्तु इति पृष्टे यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादित्यापाद्यते । तत्र

वह्न्यभावः आपादकः स्वानिष्टः, धूमाभावः आपाद्यमानः परानिष्टः। यस्मात् धूमोऽस्ति तस्माद्वह्निरप्यस्ति इति आपाद्यापादकयोर्विपर्यये पर्यवसाने तु पराभीष्टः आपाद्यविपर्ययः धूमाभावाभावः स्वाभीष्टं आपादकविपर्ययं वह्न्यभावाभावं साधयति । यदा तु आपादकं स्वेष्टम्, आपाद्यं च परेष्टं स्यात् तदा विपर्यये पर्यवसाने परेष्टस्य आपाद्यस्य विपर्ययेण स्वेष्टस्य आपादकस्य विपर्ययः साधनीय इति स्वेष्टस्यासिद्धिः स्यात् स्वानिष्टस्य च सिद्धिः स्यात् । तदुक्तं श्रीपुण्डरीकाक्षाचार्यैः-

प्रसञ्जकं तु स्वानिष्टं परानिष्टं प्रसज्यते ।
विपर्यये पराभीष्टं स्वाभीष्टे पर्यवस्यति ।।
प्रसञ्जके तु स्वाभीष्टे स्वानिष्टे पर्यवस्यति ।
स्वाभीष्टस्य त्वसिद्धिः स्यात् परेष्टस्य प्रसञ्जने ।।

प्रकृते तूभयमपि विपरीतम् । आपादकस्य स्वेष्टत्वात् आपाद्यस्य परेष्टत्वात् च । तथा हि - यद्यपरोक्षे विषये परोक्षः प्रकाशः स्यात् इत्यापादकम् । तदा अपरोक्षे शुक्तित्वे रजतविषयकपरोक्षः प्रकाशः स्यात् इत्यापाद्यम् । तत्र आपादकस्य अपरोक्षार्थविषयकपरोक्षप्रकाशस्य स्वानिष्टत्वं नास्ति । स्वतः प्रत्यक्षेऽपि ब्रह्मणि श्रवणदशायां तत्त्वमस्यादिवाक्यात् परोक्षप्रकाशस्य भवद्भिः स्वीकृतत्वात् ।

न च स परोक्षप्रकाशः मिथ्या, अतः सोऽनिष्टः, सत्यस्यैवेष्टत्वादिति वाच्यम् । मनननिदिध्यासनानन्तरभाविप्रत्यक्षज्ञानस्यापि मिथ्यात्वात् तदप्यनिष्टमिति अनेन तर्केणानिष्टस्यैव सिद्धिः स्यादिति ।

एतावता प्रसञ्जकस्य स्वानिष्टत्वं नास्तीत्युपपादितम् । अथ प्रसञ्जनीयस्य परानिष्टत्वं नास्तीत्युपपाद्यते । यदि प्रत्यक्षे विषये परोक्षप्रकाशः स्यात् तदा शुक्तित्वप्रकाशेऽपि परोक्षः रजतप्रकाशः स्यादित्यत्र आपाद्यस्य परोक्षरजतप्रकाशस्य अस्मदिष्टत्वात् परानिष्टत्वं नास्ति । आप्तोपदेशादिभिः शुक्तित्वप्रकाशे सत्यपि दुष्टेन्द्रियादिना रजतभ्रमस्यानुवृत्तेः अस्मदिष्टत्वात् । भवतामपीष्टमिदं, बाधितानुवृत्तेरङ्गीकारात् ।

ननु दुष्टेन्द्रियजन्यरजतभ्रमस्यापरोक्षतया परोक्षप्रकाशरूपत्वाभावात् आपाद्यत्वमेव नास्तीति तस्य परेष्टत्वोपपादनं न प्रकृतोपयोगीतिचेत् - न । प्रत्यक्षे शुक्तितत्वे परोक्षतया प्रकाशमानेऽपि रजतावभासः स्यादित्यापादयितुर्हि शुक्तितत्त्वप्रकाशस्य रजतभ्रमनिवर्तकत्वं न स्यादित्यापादने तात्पर्यम् । तच्चापादानं परेषामस्माकमिष्टमेव ।

एतदुक्तं भवति - शुक्तितत्त्वे प्रकाशमाने रजतावभासः स्यादित्यापादयित्रा परोक्षः रजतावभासः नापादयितुं शक्यते, इन्द्रियान्वयव्यतिरेकानुविधायिनः रजतावभासस्य परोक्षत्वासंभवादिति पूर्वमेवोक्तत्वात् । रजतभ्रमोऽपि नापदयितुं शक्यते, शुक्तित्वरूपविशेषग्रहस्य तत्प्रतिबन्धकत्वात् इत्यपि पूर्वमेवोक्तम् । किं च (तु) आप्तोपदेशादिना शुक्तित्वप्रकाशे सत्यपि दुष्टेन्द्रियादिना रजतभ्रमस्यानुवर्तमानतया प्रसञ्जनीयस्य रजतावभासस्य परानिष्टत्वं नास्तीति दोषान्तरमिदानीमुच्यते । बाधितानुवृत्तिवादिनां भवतामुपदेशतस्तत्त्वज्ञाने सत्यपि भ्रमानुवृत्तेरङ्गीकारात् इष्टापत्तेः कर्तुं शक्यत्वात्।

यदि तु एवमापाद्यते - अपरोक्षेऽपि परोक्षप्रकाशोऽस्ति चेत् शुक्तित्वेनापरोक्षेऽपि रजतत्वेन परोक्षं स्यादिति तदापि दोष उच्यते । प्रत्यक्षसिद्धेऽपि शुक्तेस्तत्त्वे भ्रान्तविप्रलम्भकवाक्यादिभिः परोक्षायाः रजतबुद्धेरूदयेनेष्टापत्तिरिति ।

किं च यदि प्रत्यक्षे विषये परोक्षः प्रत्ययः न संभवति तदा पर्वतो वह्निमानित्यादिषु विशेषतोदृष्टानुमानेषु वह्न्यादेः परोक्षः प्रकाशो न स्यात् । विशेषधर्मावच्छिन्नसाध्यनिरूपितव्याप्तिमत् विशेषतोदृष्टानुमानमिति सामान्यधर्मावच्छिन्नसाध्यनिरूपितव्याप्तिमत् सामान्यतोदृष्टानुमानमिति उच्यते । प्रकृते विशेषधर्मप्रत्यक्ष-

योग्यत्वम्, तद्विशिष्टवह्निनिरूपितव्याप्तिमान् धूमः । अत्र धूमलिङ्गकानुमितिरूप–परोक्षज्ञाने विषयः वह्निः प्रत्यक्षयोग्यः । तथा च प्रत्यक्षयोग्ये वह्नौ परोक्षः अनुमितिरूपः प्रत्ययः न स्यात् । तथा 'नद्यास्तीरे पञ्च वृक्षाः सन्तीत्यादिवाक्येभ्य प्रत्यक्षयोग्यनद्यादिविषयकः परोक्षः शाब्दबोधात्मकः प्रत्ययो न स्यात्, यदि प्रत्यक्षे विषये परोक्षः प्रकाशो व्याहतः । न च तात्कालिकप्रत्यक्षविषयेऽर्थे परोक्षः प्रकाशो व्याहतः । परोक्षप्रकाशकालिकप्रत्यक्षविषयेऽर्थे परोक्षप्रकाशो व्याहत इति यावत् । वह्न्यादिस्तु अनुमितिकाले न प्रत्यक्षविषयः, अपि तु कालान्तरे । ब्रह्म तु परोक्षप्रतीतिकालेऽपि प्रत्यक्षम्, नित्यं स्वतोऽपरोक्षत्वात् । अतो न काचिदनुपपत्तिरिति वाच्यम् । यदा यस्य, पुरुषस्य वह्निरनुमितिविषयः तदा स वह्निः अन्यस्य आरण्यकस्य योगिनः ईश्वरस्य वा प्रत्यक्षविषय इति वह्नेः अनुमितिरूपपरोक्षासंभवात् । न चानुमातुः तदा न स प्रत्यक्षविषयः । तथा च परोक्षज्ञानवन्निष्ठपरोक्षज्ञानकालिकप्रत्यक्षविषयेऽर्थे एव परोक्षप्रकाशो व्याहतः । तादृश–प्रत्यक्षविषयत्वमनुमितिकाले वह्नेर्नास्तीति नानुपपत्तिर्वहन्यनुमितेरिति वाच्यम् । तथा सति दशमस्त्वमसीति वाक्यश्रवणात् पूर्वं दशमत्वं न प्रत्यक्षगोचर इति तात्कालिकप्रत्यक्षविषयत्वस्य दशमत्वेऽभावेन तस्य परोक्षप्रकाशे व्याहत्यभावेन तादृशवाक्यात् परोक्षस्यैव दशमत्वप्रत्ययस्योत्पत्तेः । तथा च न ततः साक्षात्कार इति न वाक्यस्य साक्षात्कारजनकत्वम् । न च कालविशेषमनन्त–र्भाव्यप्रत्यक्षयोग्ये परोक्षप्रकाशव्याघात इत्येवोच्यते । दशमत्वं तु स्वस्य पश्चात् प्रत्यक्षयोग्यम् । अतस्तत्र परोक्षप्रकाशः वाक्यान्न संभवतीति वाच्यम् । तर्हि वह्नेरपि पश्चात् प्रत्यक्षयोग्यतया तद्विषयानुमित्यनुपपत्तेः ।

ननु तदानीं प्रत्यक्षे विषये परोक्षव्याघात इत्येवोच्यते । यदा स्वस्य दशमत्वं प्रत्यक्षं तदैव दशमस्त्वमसीति वाक्यस्य दशमत्वविषयक प्रत्यक्षजनकत्वमस्मदिष्टमिति चेत् – तर्हि यदा कश्चित् घटं पश्यन्नस्ति, तदा तं प्रति उक्तस्य अयं घट इति वाक्यस्यापि प्रत्यक्षजनकत्वप्रसङ्गः । न चेष्टापत्तिरिति वाच्यम् । तत्त्वमस्यादिवाक्यं स्वप्रतिपाद्यगोचरसाक्षात्कारजनकम् स्वतोऽपरोक्षार्थविषयत्वात् इति अनुमानप्रयोक्तृभिः भवद्भिः हेतौ स्वत इति विशेषणेन इतरेषां वाक्यानां साक्षात्काराजनकत्व–स्यैवेष्यमाणत्वात् । इष्यतां वा इतरेषामपि तथात्वम् । तथापि 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति वाक्यप्रतिपाद्यो योऽर्थः ज्योतिष्टोमयागस्य स्वर्गसाधनत्वरूपः स योगिप्रभृतीनां प्रत्यक्षयोग्य इत्यविवादात् योगिप्रभृतीन् प्रति तन्माहात्म्यानभिज्ञेन केनचित् 'ज्योतिष्टोमेन स्वर्गकामो यजेत इत्युक्ते सति तद्वाक्यात् श्रोतुः योगिप्रभृतेः तादृशवाक्यार्थविषयकसाक्षात्कारप्रसङ्गः । तथा च सर्वमपि वाक्यं कस्यचित् स्वप्रतिपाद्यार्थविषयकसाक्षात्कारजनकमिति स्थिते केषांचित् तत्त्वमस्यादिवाक्यानामेव साक्षात्कारजनकत्वमिति भवदीयव्यवस्थायाः भङ्गः ।

ननु भवतु नाम व्यवस्थाभङ्गः, किं नश्छिन्नमिति चेत् – न । प्रत्यक्षयोग्यविषयकानुमानादितोऽपि वह्न्यादिसाक्षात्कारप्रसङ्गात् । तथा च वाक्यस्यैवापरोक्षजनकत्वमिति नियमभङ्गः स्यात् । ननु सोऽपि नियमो नेष्यत इति चेत् – तर्हि अनुमानतोऽपि ब्रह्मसाक्षात्कारसंभवेन अत्रैवर्णिकस्य वेदेऽनधिकारेऽपि अनुमानेऽधिकारस्यानपायात् आनुमानिकब्रह्मापरोक्षज्ञानवत्त्वात् अत्रैवर्णिकस्यापि ब्रह्मविद्याधिकारः स्यात् । तथा चापशूद्राधिकरणविरोधः प्रसजति । शूद्राणां ब्रह्मविद्यानधिकारस्य भवद्भिरेव तस्मिन्नधिकरणे निर्णीत–त्वात् । किं च वेदान्तवाक्यश्रवणादीनां वैयर्थ्यं च । अनुमानादेव ब्रह्मसाक्षात्कारसंभवात् ।

किं च भवन्मते सर्वस्यापि पदार्थस्य ज्ञानावच्छेदकतया वा अज्ञानावच्छेदकतया वा इममर्थं जानामि, इममर्थं न जानामीत्येवं साक्षिवेद्यत्वाभ्युपगमात् सर्वैः प्रमाणैः साक्षात्कारसंभवः सुलभः । न च साक्षिणस्तत्पुरुषीयत्वाभावात् तत्पुरुषीयापरोक्षविषयत्वं न सर्वस्येति वाच्यम् । शास्त्रार्थं न

ज्ञानामीत्याद्याकारकव्यवहारजनकस्य साक्षिणस्तत्पुरुषीयत्वावश्यंभावात् ।

यदि तु स्वतोऽपरोक्षार्थविषयकं वाक्यमेव साक्षात्कारजनकं नान्यदिति व्यवस्थाप्येत, तदा दशमस्त्वमसीति वाक्यस्य स्वतोऽपरोक्षार्थविषयकत्वाभावेन साक्षात्कारजनकत्वाभावात् तस्य दृष्टान्ततया प्रदर्शनं न घटते । न च त्वमंशस्य आत्मनः स्वतोऽपरोक्षतया तद्विषयकत्वमादाय दृष्टान्तत्वमिति वाच्यम् । दशमत्वरूपसंख्याविशिष्टाकारेण त्वमंशस्य स्वतोऽपरोक्षत्वाभावात् । अन्यथा वाक्यश्रवणात्पूर्वमपि त्वमंशभानसत्त्वेन तदानीं विशिष्टप्रकाशप्रसङ्गेन वाक्यवैयर्थ्यात् ।

ननु स्वतोऽपरोक्षार्थमात्रविषयकत्वं न हेतुः, येन स्वतोऽपरोक्षेतरदशमत्वसंख्याविषयकत्वात् तन्मात्रविषयकत्वरूपहेत्वभावात् दृष्टान्ते साधनवैकल्यमाशङ्क्येत । अपि तु मात्रपदमनन्तर्भाव्य स्वतोऽपरोक्षार्थविषयकत्वं हेतुः । स च त्वमंशात्मस्वरूपमादाय अस्त्येवेति न साधनवैकल्यमिति चेत् – अत्राहुः । किमयं हेतुः स्वतोऽपरोक्षार्थांशेऽपरोक्षजनकत्वसाधकः, उत तदर्थमात्रे । न द्वितीयः । त्वं घटश्च तिष्ठतः इत्यत्र घटांशेऽप्यपरोक्षतापत्तेः । नाद्यः । दशमस्त्वमसीत्यादिवाक्योदाहरणायोगात् ।

एवं च यथानुमानस्य साक्षात्कारहेतुत्वं क्वापि नास्ति तथा वाक्यजातीयस्य क्वचिदपि साक्षात्कारहेतुत्वं नास्तीति तद्दृष्टान्तेन तत्त्वमस्यादिवाक्यस्य साक्षात्कारहेतुत्वं न साधयितुं शक्यते, दृष्टान्तासिद्धेः । एवं तत्त्वमस्यादिवाक्यं स्वप्रतिपाद्यार्थविषयकसाक्षात्कारजनकं स्वतोऽपरोक्षार्थ-विषयकत्वात् इत्यनुमाने हेतुरस्तु साध्यं मास्तु इत्यप्रयोजकशङ्कायां तन्निवर्तकस्य तर्कस्याभावात् उक्तानुमानं न साध्यसाधकम् ।

वाक्यजातीयस्य साक्षात्कारहेतुत्वाङ्गीकारे अत्र घटोऽस्तीत्यादिवाक्यस्यापि साक्षात्कारहेतुत्वं स्यादिति शङ्का जायते । तन्निवारणाय च स्वतोऽपरोक्षार्थविषयकत्वविशिष्टं वाक्यं साक्षात्कारहेतुः । हेतुतावच्छेदकस्य स्वतोऽपरोक्षार्थविषयकत्वस्य अत्र घटोऽस्तीति वाक्येऽभावेन न तस्य साक्षात्कारहेतुत्वापत्तिरिति प्रतिपादनमपि अनावश्यकम् । वाक्यस्य कस्यापि साक्षात्कारजनकत्वाभावात् । अत्र मूले – अत एव स्वतोऽपरोक्षार्थगोचरत्वलक्षणोपाधिरपि निरस्तः' इति पङ्क्तिर्दृश्यते । तत्रो-पाधिशब्दः कारणतावच्छेदकपरः । अत एव – वाक्यस्यापरोक्षजनकत्वासिद्धेरेव, अपरोक्षार्थगोचरत्वं कारणताच्छेदकमित्यपि निरस्तमित्यर्थः इति चण्डमारुते ।

यत्तु ज्ञाननिवर्त्यस्य प्रपञ्चस्य मिथ्यात्वं निवर्तकस्य तत्त्वमस्यादिवाक्यजन्यज्ञानस्य साक्षात्कार-त्वमन्तरेणानुपपद्यमानं तस्य ज्ञानस्य साक्षात्त्वमवगमयति । तस्य च साक्षात्त्वं कारणान्तराभावात् वाक्याधीनमित्युक्तम् । तदपि असिद्ध्यन्यथासिद्धिभ्यामाक्रम्यते । तथाहि – प्रपञ्चस्य सत्यत्वात् तस्य मिथ्यात्वमसिद्धम् । तस्य सत्यत्वे वा मिथ्यात्वे वा प्रमाणबलादीश्वरसंकल्पनिवर्त्यत्वस्यावश्यकत्वात् साक्षात्त्वमन्तरेणापि प्रपञ्चनिवृत्त्युपपत्तेः अन्यथासिद्धिः ।

यत्तु 'तरति शोकमात्मवित्' इत्यादिभिः ज्ञानमात्रनिवर्त्यत्वं सिद्धम् , तेन च मिथ्यात्वं सिद्धमिति । तदपि न । 'आत्मवित्' इत्यत्र विच्छब्देनोक्तं वेदनं ध्यानरूपविशेषपर्यवसायीति तया श्रुत्या ध्याननिवर्त्यत्वस्यैव प्रपञ्चेऽवगमेन ज्ञाननिवर्त्यत्वासिद्धेः । तदुक्तम् –

''वेदनं ध्यानविश्रान्तं ध्यानं श्रान्तं ध्रुवस्मृतौ ।
सा च दृष्टित्वमभ्येति दृष्टिर्भक्तित्वमृच्छति ।।''

इति । भक्तिरूपापन्न-दर्शनसमानाकार-सतंतस्मृतिरूपं ज्ञानं वेदनशब्दवाच्यमिति तदर्थः । ननु ध्यानस्यापि ज्ञानरूपत्वात् ध्याननिवर्त्यस्य प्रपञ्चस्य ज्ञाननिवर्त्यत्वमस्त्येवेति कथं ज्ञानमात्र-निवर्त्यत्वनिरास इति चेत् – न । ध्यानादिभिन्नस्यैव परेण ज्ञानत्वाङ्गीकारात् तन्निवर्त्यत्वस्यैव तदिष्टत्वात् तस्यैवेह

निरस्तत्वाभिधानात्।

यदपि मिथ्याभूतस्य ज्ञानमात्रनिवर्त्यत्वं युक्तमिति, तदपि न । मिथ्याभूततया भवदभिमतस्य तिमिरादिदोषस्य प्रतिभटादेश्च भेषजशस्त्रादिनिवर्त्यत्वदर्शनेन ज्ञानमात्रनिवर्त्यत्वमिति व्याप्त्यभावात्। तथा च प्रपञ्चः ज्ञानमात्रनिवर्त्यः मिथ्यात्वादित्यनुमाने तिमिरादिदोषप्रतिभटादौ व्यभिचारः । किं च प्रपञ्चस्य मिथ्यात्वे हि तस्य धीमात्रनिवर्त्यत्वं युक्तम्। प्रपञ्चस्य मिथ्यात्वमेव तु नास्ति। प्रमाणाभावात्। अत्र मूले – "अस्तु च मिथ्यात्वे धीबाध्यत्वे युक्तिः" इति वाक्यम्। तस्यायमर्थः – "प्रपञ्चस्य मिथ्यात्वे सति धीबाध्यत्वे युक्तिः – ज्ञानमात्रनिवर्त्यत्वस्य युक्तता इति । न च प्रपञ्चः मिथ्या दृश्यत्वात् इत्यनुमानमेव प्रपञ्चमिथ्यात्वे प्रमाणमिति वाच्यम्। ब्रह्मणोऽपि दृश्यत्वेन हेतुना मिथ्यात्वप्रसङ्गात्। न च तात्त्विकं (पारमार्थिकं) दृश्यत्वं मिथ्यात्वसाधकम् । ब्रह्मणो दृश्यत्वं तु व्यावहारिकम् । तथा च तात्त्विकदृश्यत्वरूपहेत्वभावान्न ब्रह्मणो मिथ्यात्वमिति वाच्यम्। प्रपञ्चेऽपि भवन्मते तात्त्विकदृश्यत्वाभावेन मिथ्यात्वं न स्यादिति ।

अपि च संसारमिथ्यात्वाङ्गीकारेऽपि तस्य ज्ञानमात्रनिवर्त्यत्वं ज्ञानाधीननिवृत्तिमत्त्वरूपम् । तत्र निवृत्तिशब्देन कमर्थमभिप्रेत्य तद्धेतुतया साक्षात्कारात्मकज्ञानगवेषणं क्रियते भवद्भिः । किं १. प्रतिभासमानमिथ्याभूतार्थप्रध्वंसः निवृत्तिः, २. अथ वा मिथ्यार्थविषयकज्ञानप्रध्वंसः, ३. आहोस्वित् मिथ्यार्थविषयकज्ञानकारणप्रध्वंसः, ४. अथवा मिथ्याभूतार्थ विषयकज्ञानान्तरानुत्पादः, ५. उत तद्विपरीतविषयप्रकाशरूपः विषयापहारः, ६. तद्विषयसत्यत्वाध्यवसायशैथिल्यम् ७. अथान्यदेव वक्तुमशक्यं किंचित् इति सप्त विकल्पाः ।

तत्र मिथ्याभूतार्थप्रध्वंसो निवृत्तिरिति प्रथमः कल्पो न कल्पते। क्वचिदपि मिथ्यार्थस्य प्रध्वंसाभावात्। तथा हि मिथ्यार्थोऽस्ति वा न वा ? द्वितीयेऽसतः कथं प्रध्वंसः ? प्रध्वंसो नाम स्वरूपस्य प्रच्युतिःस्वरूपस्यासत्त्वे कस्य प्रच्युतिर्भवेत्? आद्ये सतः तस्य ज्ञानेन प्रध्वंसासंभवात्। यदि सतस्तस्य ज्ञानेन ध्वंसः, तर्हि शुक्तिरजतभ्रमवतः पुरुषस्य बाधकज्ञानोत्पत्तेः पूर्वमेव सुषुप्तौ सत्यां तत्काले शुक्तिरजतस्य सत्ता स्यात्। निवर्तकस्य ज्ञानस्यानुत्पत्तेः । न चेष्टापत्तिः । सुषुप्तिकाले मुद्गरादिना शुक्तिनिवृत्तौ यदि रजतस्यापि निवृत्तिः तदा ज्ञानानिवर्त्यत्वप्रसङ्गात्। अनिवृत्तौ निरधिष्ठानप्रातिभासिकपदार्थसत्ताप्रसङ्गात्। किं च संविदधीनसत्ताकस्य प्रातिभासिकपदार्थस्य संविन्निवृत्तिरेव निवृत्तिः। तदुक्तम् –

आरोपस्य निवृत्तिः स्यादारोप्यस्यापि संक्षयः ।
तस्य स्वरूपशून्यस्य का निवृत्तिर्हि कथ्यते ।।

आरोपस्य शुक्तिरजतादिसंविदः या निवृत्तिः सैव आरोप्यस्य शुक्तिरजतादेरपि संक्षयः– निवृत्तिः । न तु आरोप्यस्य पृथङ् निवृत्तिः । कुतः ? तस्य – आरोप्यस्य शुक्तिरजतादेः स्वरूपशून्यस्य असतः कथं निवृत्तिः कथ्येतेति तदर्थः ।

मिथ्यार्थविषयकज्ञानध्वंसो निवृत्तिरिति द्वितीयः कल्पश्च न युक्तः। मिथ्याभूतार्थविषयकज्ञानस्य नेदं रजतमित्यादिबाधकज्ञानं विनापि स्वरसतः प्रवृत्तविनाशहेतुबलादेवाशुतरविनाशात्।

तथा च बाधकज्ञानान्तराधीननिवृत्तिमत्त्वं दुर्वचम्। यदि बाधकज्ञानादेव शुक्तिरजतादि भ्रमनिवृत्तिरित्युच्यते तदा शुक्तिरजतादिभ्रमवतः अनुत्पन्नबाधकज्ञानस्य पुरुषस्य सुषुप्तिरेव न स्यात्। भ्रान्तिज्ञानेऽनुवर्तमाने ज्ञानशून्यावस्थारूपायाः सुषुप्तेः असंभवात्। तथाहुः –

न भ्रान्तिर्बाधकज्ञानात् नियमेन विनश्यति ।

न स्याद्धि भ्रान्तचित्तस्य सुषुप्तौ भ्रान्तिसंक्षयः ।। इति ।

यद्यपि उत्तरकालीनं यत् किमपि ज्ञानं पूर्वज्ञानस्य निवर्तकम्, योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वमिति नैयायिकाङ्गीकारात् । उत्तरत्र ज्ञानानुत्पत्तावपि अन्ततः संस्कारस्योत्पत्त्या तेन पूर्वज्ञाननाशात् । तथापि पूर्वोत्पन्नस्य भ्रान्तिज्ञानस्य येन केन चित् अविरुद्ध- घटादिविषयकज्ञानेनापि तत्रापि परोक्षज्ञानेनापि पूर्वज्ञाननिवृत्तेः संभवात् विरुद्धविषयकप्रत्यक्षज्ञानेनैव निवृत्तिरिति नास्ति निर्बन्धः । तथा चापरोक्षज्ञानाधीना निवृत्तिः भ्रान्तेः दुर्वचा ।

मिथ्यार्थविषयकज्ञानकारणोच्छेदः निवृत्तिरिति तृतीयः पक्षश्च न युक्तः । अस्मिन् पक्षे ज्ञाननिवर्त्यत्वं नाम तत्त्वज्ञानजन्यभ्रान्तिकारणनाशवत्त्वम् – यद्विषयकज्ञानकारणनाशः तत्त्वज्ञानजन्यः तत्त्वमिति यावत् । भ्रान्तिकारणस्य दोषस्य तत्त्वज्ञानप्रतिबन्धकत्वात् दोषे नष्टे एव तत्त्वज्ञानमुदेतीति वक्तव्यम् । तत्त्वज्ञानमपि प्रत्यक्षरूपं भवदिष्टम् । भ्रान्तिकारणस्य चन्द्रद्वित्वादिभ्रमकारणस्य अङ्गुल्यवष्टम्भादिदोषस्यानुवृत्तौ चन्द्रैकत्वप्रत्यक्षानुदयात् भ्रान्तिकारणोच्छेदे सत्येव तत्त्वप्रत्यक्षमुत्पद्यते । तथा चान्योन्याश्रयः भ्रान्तिकारणोच्छेदे सति तत्त्वज्ञानं तत्त्वज्ञाने सति तदुच्छेद इति भ्रान्तिकारणानुच्छेदेऽपि तत्त्वज्ञानसंभवे तु कारणोच्छेदकल्पनं विफलम् । तत्त्वज्ञानोत्पत्त्यर्थं हि भ्रान्तिकारणोच्छेदकल्पनम् । भ्रान्तिकारणे सत्यपि तत्त्वज्ञानोत्पत्तौ किं तदुच्छेदकल्पनेन । तत्त्व–प्रत्यक्षानुवृत्त्यर्थं भ्रान्तिकारणोच्छेदकल्पनमिति चेत् – तत्त्वप्रत्यक्षानुवृत्तिर्नाम द्वितीयादितत्त्वप्रत्यक्षोत्पत्तिः । तत्र द्वितीयादिप्रत्यक्षज्ञानोत्पत्तेः प्राक् तादृशप्रत्यक्षसामग्री अनुवर्तते न वा । आद्ये तत्त्वसाक्षात्कार–सामग्रीसत्त्वे भ्रमसामग्रीसत्त्वेऽपि प्राथमिकतत्त्वापरोक्षवत् द्वितीयादेरप्युत्पत्तिसंभवात् व्यर्थं भ्रमकारणोच्छेदकल्पनम् । द्वितीये साक्षात्कारसामग्र्यभावे भ्रमसामग्र्युच्छेदेऽपि तत्साक्षात्कारानुत्पत्तेः भ्रमकारणोच्छेदकल्पनं वृथा । दोषस्य स्वाभाविकप्रत्यक्षप्रतिबन्धकत्वात् प्रतिबन्धकाभावसंपादनार्थं तदुच्छेदकल्पनमिति चेत् – किमत्र स्वाभाविकत्वमभिप्रेतम् ? सामग्र्यां सत्यां स्वरसवाहित्वं ? अथवा नित्यस्वाभाविकत्वम् – नित्यत्वमिति यावत् । आद्ये – भ्रान्तिसामग्र्यां सत्यां कथं प्राथमिकतत्वज्ञानमुत्पन्नम् – स्वसामग्रीबलादिति चेत् – तथैव द्वितीयप्रत्यक्षमप्युत्पत्स्यते । दोषोच्छेदे सत्येव तत्त्वज्ञानमित्युक्तौ पूर्वोक्तन्योन्याश्रयः । द्वितीये नित्ये प्रतिबन्धकस्यासंभवात् तन्निवर्तकत्वं न स्वारसिकप्रत्यक्षस्य कल्प्यम् । अयमत्र पूर्वोक्तार्थानां संग्राहकश्लोकसमूहः –

भ्रान्तिकारणसद्भावे प्रत्यक्षस्य ह्यसंभवः ।
संभवे निष्फलैव स्यात् तदुच्छेदस्य कल्पना ।।
स्वानुवृत्त्यर्थमुच्छेदः सामग्र्यैवानुवर्तनात् ।
प्रतिबन्धनिवृत्त्यर्थमुच्छेदे प्रथमं कथम् ।।
प्रत्यक्षं कारणोच्छेदे तदुच्छेदस्ततोऽपि चेत् ।
अन्योन्याश्रयणं तु स्यात् प्रतिबन्धो न चात्मनि ।।

नित्यस्वाभाविकप्रत्यक्षं हि नाम आत्मैव । नित्ये च तस्मिन् कथं प्रतिबन्धकसंभावनेत्यर्थः ।

ननु भ्रान्तेः पुनरप्यनुत्पादार्थं तत्सामग्र्युच्छेदकत्वं प्राथमिकप्रत्यक्षस्य कल्पनीयमिति चेत् – न । सामग्र्याः मिथ्यात्वे तस्या अपि स्वरूपतः सत्त्वाभावेन प्रच्युत्यसंभवात् तस्या अपि निवृत्तिः तद्भ्रान्तिकारणनिवृत्तिरित्येव वाच्यम् । तत्राप्येवमित्यनवस्था । सत्यत्वे नापरोक्षज्ञाननिवर्त्यत्वं तवेष्टमिति चण्डमारुतोक्तमप्यत्र अनुसन्धेयम् ।

मिथ्याभूतार्थविषयकज्ञानान्तरानुत्पादो निवृत्तिरिति चतुर्थोऽपि पक्षो न युज्यते । अनुत्पादस्य

प्रागभावरूपतया तस्याजन्यत्वेन तत्त्वज्ञानसाध्यत्वाभावात् । न च तादृशज्ञानान्तरप्रागभावस्यानुवर्तनं तत्त्वज्ञानसाध्यमिति वाच्यम् । तदनुवर्तनस्यापि सत्यां सामग्र्यां कार्यविलम्बायोगात् प्रागभावप्रतियोगिज्ञानान्तरस्य यत्कारणं तद्विघटनेनैव वाच्यतया तत्पक्षस्य तृतीयकल्पनिरसनेनैव निरस्तत्वात् ।

नापि पञ्चमषष्ठपक्षौ युक्तौ । तद्विपरीतविषयप्रकाशरूपस्य विषयापहारस्य तद्विषयाध्यवसाय-शैथिल्यस्य च परोक्षादपि तत्त्वज्ञानात् सिद्धेः । प्रत्यक्षात्मकमपि हि द्विचन्द्रभ्रमरूपं ज्ञानमनुवर्तमानं परोक्षेण चन्द्रैकत्वानुमित्या आप्तोपदेशजन्येन चन्द्रैकत्वज्ञानेन च निवर्त्यते । तावतैव चन्द्रद्वित्वाध्यवसायशैथिल्यं च जायते । अन्यथा प्रत्यक्षात्मकदेहात्मभ्रमवतामनुमानेनागमजन्यज्ञानेन वा परोक्षेण देहातिरिक्तात्मनि विश्वासो न स्यात् ।

न च भ्रमाननुवृत्तिरेव सत्यत्वाध्यवसायशैथिल्यम् , तच्च परोक्षज्ञानान्न भवतीति वाच्यम् । प्रत्यक्षसिद्धेऽपि शुक्तेस्तत्त्वे विप्रलम्भकवाक्याद्रजतधीरुदेतीति पूर्वमेवोक्तत्वात् । तथाहि –

संजातेऽप्यपरोक्षेऽपि वाचे कारणसंभवात् ।
अङ्गुल्याद्यैर्भवेत् भ्रान्तिरुपष्टम्भनहेतुभिः ।।

अपरोक्षात्मकबाधज्ञाने संजातेऽपि उपष्टम्भनहेतुभिः अङ्गुल्यादिभिः भ्रान्तिकारणस्योत्पत्त्या भ्रान्तिरपि भवेदित्यर्थः । संजातेऽपीति अपिशब्दसत्त्वात् द्वितीयः अपिशब्दः भ्रान्तिरित्यनेन योजनीयः । यद्वा न केवलं परोक्षे, अपि तु अपरोक्षेऽपि बाधज्ञाने इति विशेषप्रदर्शकतया यथास्थितमेवास्तु इत्याहुः ।

नापि अन्यदेव वक्तुमशक्यं किंचिदिति सप्तमः पक्षः । तस्य वक्तुमशक्यत्वादेव एतदर्थस्य अपरोक्षज्ञानद्वारा संसारनिवृत्तिफलकस्य श्रवणाद्युपायस्योपदेशायोगात् । अपरोक्षज्ञाने सत्येव भ्रमनिवृत्तिः तदभावे तदभाव इत्यन्वयव्यतिरेकसहचारविरहात् अपरोक्षज्ञानस्य भ्रमनिवृत्तिसाधनत्वाभावाच्च ।

एवं च सामान्यतः भ्रमनिवृत्तौ अपरोक्षज्ञानस्यानपेक्षणात् अपरोक्षात्मैक्यज्ञानस्य तत्त्वमस्यादि-वाक्यरूपकारणविशेषचिन्ताया अनावश्यकतया शब्दजन्यप्रत्यक्षवादस्य नास्त्युत्थानमिति तात्पर्येण भाष्यकारैर्नातीव तन्निरसने प्रयासः कृतः – "सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः" इत्यादिना । भाष्यकारैः द्रष्टव्य इत्यादेः दर्शनसमानाकारत्वविधौ तात्पर्यमित्युक्त्या च शब्दजन्यप्रत्यक्षवादः भाष्यकारासंमत इति ज्ञायते । समन्वयाधिकरणपूर्वपक्षे च परोक्त्यैव दूषयिष्यति – "न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं शक्यम् , तस्यानिन्द्रियत्वात्" इत्यादिना ।

अस्तु वा प्रत्यक्षमेव तत्त्वज्ञानं मिथ्याभूतप्रपञ्चनिवर्तकम् । तथापि वाक्यस्य प्रत्यक्षकारणत्वं न संभवति । यथा हीन्द्रियं प्रत्यक्पराङ्मुखत्वात् ब्रह्मसाक्षात्कारजनकं न भवति, तथा वाक्यमपि प्रत्यक्षजननसामर्थ्यविरहात् प्रत्यक्षज्ञानं न जनयतीति ।

"पराञ्चिखानि व्यतृणत् स्वयंभूः तस्मात् पराङ्पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन् ।।"

इति श्रुत्युक्तप्रकारेण बहिर्विषयकप्रवृत्तिकतया इन्द्रियस्य प्रत्यगर्थाग्राहकतया यत्र यत्रेन्द्रियत्वं तत्र तत्र प्रत्यगर्थाग्राहकत्वमिति व्याप्तिः । तथा यत्र यत्र वाक्यत्वं तत्र तत्र परोक्षजनकत्वमिति व्याप्तिः । तथा च तत्त्वमादिवाक्यं प्रत्यक्षाजनकं अथवा परोक्षजनकं वाक्यत्वात् नद्यास्तीरे वृक्षाः सन्तीत्यादिवाक्यवत् । अस्य दृष्टान्तरूपमनुमानं तु इन्द्रियं प्रत्यगर्थाग्राहकम् इन्द्रियत्वादिति ।

ननु वाक्यस्य 'दशमस्त्वमसि' इत्यादेः प्रत्यक्षजनकत्वं दृश्यते, इन्द्रियस्य तु प्रत्यगात्मविषयक-प्रत्यक्षजनकत्वं कस्यापि न दृश्यत इति विशेषोऽस्ति । अतस्तत्त्वमस्मादिवाक्यस्यापरोक्षज्ञानजनकत्वं

दशमस्त्वमसीति वाक्यदृष्टान्तेन साधयितुं शक्यते । इन्द्रियस्य तु प्रत्यगात्मविषयकप्रत्यक्षजनकत्वं न साधयितुं शक्यते, कस्यापीन्द्रियस्य तज्जनकत्वाभावात्इति चेन्न । दशमस्त्वमसीत्यादि वाक्यस्यापरोक्षजनकत्वासिद्धेः । न च तत्रापरोक्षजनकत्वसंदेहात् वाक्यत्वे अपरोक्षाजनकत्वव्याप्ति-निर्णयो न संभवतीति वाच्यम्, इन्द्रियविशेषे मनसि प्रत्यक्पराङ्मुखत्वसंदेहात् इन्द्रियत्वेऽपि प्रत्यक्पराङ्मुखत्वव्याप्तिनिश्चयासंभवात् ।

ननु वाक्यत्वे अपरोक्षाजनकत्वव्याप्तौ सत्यामपि वाक्यातिरिक्तस्यापरोक्षसाधनस्याभावात् तादृश-व्याप्त्यनादरेण तत्त्वमस्यादिवाक्यस्यापरोक्षधीहेतुत्वं कल्प्यत इति चेत् - हन्त तर्हि इन्द्रिये अपरोक्षधीजननसामर्थ्यस्य क्लृप्तत्वात् प्रत्यगर्थाग्राहकत्वव्याप्त्यनादरेण इन्द्रियेष्वेव प्रत्यगर्थ-विषयकसाक्षात्कारजनकत्वं कल्प्यताम् । तथा च सिद्धे गत्यन्तरे साक्षात्कारकारणे इन्द्रिये किं वाक्येन ? अयमत्र निर्णयः -

विरुद्धव्याप्तिसद्भावे वाक्यस्यापि तथा भवेत् ।
असद्भावो यदि भवेत् सम एव द्वयोरपि ।।
दशमस्त्वमसीत्यादौ भवेद्वाक्यात् परोक्षधीः ।
सामग्र्युत्थापनात् पश्चात् प्रत्यक्षादपरोक्षधीः ।।

प्रत्यगर्थग्राहकत्वविरुद्धं यत् प्रत्यगर्थाग्राहकत्वं तेन सह व्याप्तिरिन्द्रियस्यास्ति चेत् वाक्यस्यापि अपरोक्षजनकत्वविरुद्धं यत् परोक्षजनकत्वं तेन व्याप्तिर्भवेत् । यदि वाक्यस्य विरुद्धव्याप्तेरसत्त्वम्, तदा इन्द्रियस्यापि विरुद्धव्यप्त्यसद्भावो भवेत् । दशमस्त्वमसीत्यादौ तु शब्देन दशमत्वे ज्ञाते सति पश्चात् तद्विशेषणकत्वमर्थविशेष्यकं प्रत्यक्षं मनसा जायते । अयमाशयः- दशमोऽहमस्मीति मानसं प्रत्यक्षं भवति । तत्र विशेष्यांशस्यात्मनः भानं मनस्संनिकर्षात् । विशेषणभूतदशमत्वसंख्यायाः भानं तु दशमस्त्वमसीति वाक्यजन्यदशमत्वविषयकशाब्दपरोक्षात्मकज्ञानलक्षणप्रत्यासत्त्या भवति । ज्ञान-लक्षणप्रत्यासत्तिसंपादन एव वाक्यस्योपयोगः न तु दशमत्वापरोक्षजनने । तथा च दशमत्वविषयकं यत् मानसं प्रत्यक्षं तस्य या सामग्री हेतुः ज्ञानलक्षणाप्रत्यासत्तिः तस्योत्पादनं दशमस्त्वमसीति वाक्येन क्रियते । ततः प्रत्यक्षादपरोक्षधीः - मनोरूपेन्द्रियात् अपरोक्षधीरिति । अत्र 'शब्दोपनीतं दशमत्वं मनसैव गृह्यत इति भावः' इति चण्डमारुतसूक्तिरपि भाव्या । न च इन्दियजन्यप्रत्यक्षस्यात्मैक्य-विषयकत्वं न सम्भवतीति वाच्यम् । भवदभिमतवञ्चकयुक्तिभिः वाक्यस्येव इन्द्रियाणामपि आत्माद्वैतविषयक-प्रत्यक्षजनकत्वस्य स्थापयितुं शक्यतया इन्द्रियजन्यप्रत्यक्षस्याप्यात्मैक्यविषयकत्वसंभवात् । यथा भेदवासनानिरासे वाक्यस्यापरोक्षज्ञानजनकत्वं कल्प्यते तथा इन्द्रियस्यापि तत्कल्पनसंभवात् ।

यत्तु प्रत्यक्षस्य परोक्षात् बाधो न भवतीत्युक्तम् , तदपि सैवेयं दीपज्वालेति ज्वालैक्यप्रत्यक्षस्य ज्वालाभेदविषयकानुमानिकपरोक्षज्ञानेन बाधदर्शनात् परास्तम् । इयं दीपज्वाला पूर्वज्वालातः भिन्ना तद्धेतुभूतवर्त्यादिभिन्नवर्त्यादिजन्यत्वादित्यनुमानम् । किं च बाधो नाम नार्थनिवृत्तिः । नापि प्रतीतिनिवृत्तिः अपि तु अप्रामाण्यबुद्धिः । प्रकृते ज्वालाभेदानुमानेन ऐक्यप्रतीतेरप्रामाण्यबुद्धिरस्त्येव ।

यदपि ऐन्द्रियकप्रत्यक्षात् शास्त्रजन्यप्रत्यक्षस्य प्राबल्यमुक्तम् । तदप्यसत् । उभयोरपि प्रत्यक्षयोरविद्यारूपैकदोषमूलकत्वस्य वक्ष्यमाणतया तारतम्याभावात् । किं च -

प्रत्यक्षं ब्रह्म गृह्णाति यदि च ब्रह्मदृश्यता ।
अब्रह्मालम्बनत्वे तु कथं नु बलवत्तरम् ।।

अयमर्थः – ब्रह्मप्रत्यक्षं प्रपञ्चनिवर्तकमिति वदद्भिर्भवद्भिः ब्रह्मणः प्रत्यक्षविषयत्वरूपं दृश्यत्वमङ्गीकृतं भवति । तथा सति ब्रह्मणः मिथ्यात्वं स्यात्, दृश्यत्वात् प्रपञ्चवत् । यदि वाक्यजन्यप्रत्यक्षं ब्रह्माविषयकं तदा तस्य कथं बलवत्तरत्वम् ? ब्रह्माविषयकस्य तस्य द्वैतविषयकत्वावश्यंभावात् द्वैतविषयकभ्रमेण सह विरोधाभावात् बाधकत्वस्याभावात् बलाबलचिन्ताया एवाभावात् । प्रत्यक्षं यदि ब्रह्म गृह्णाति तदा ब्रह्मणः दृश्यता स्यादित्यन्वयः ।

यत्तु अपरोक्षस्यात्मज्ञानस्य मोक्षहेतुत्वं श्रुतिसिद्धम् इत्युक्तम् । तत्र नास्माकं काचित् क्षतिः। शाब्दापरोक्षस्यैव निरासात् ।

यत्तु शब्दादेव शब्दस्यापरोक्षधीहेतुत्वमवगम्यत इत्युक्तम् । तत्र "निचाय्य तं मृत्युमुखात् प्रमुच्यते" "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" "तमसः पारं दर्शयति" इत्यादिशब्दानां शाब्दापरोक्षज्ञान-बोधकत्वेन भवदुदाहृतानां शब्दानामन्यपरत्वात् । साक्षात्कारहेतोर्मनसः सहायतामात्रेण शब्दस्य निर्देशात् दृढाध्यवसायहेतुतामात्रेण वा तन्निर्देशाच्च । यथाश्रुतार्थग्रहणे 'स्वाध्यायश्चक्षुः' इति भवदुदाहृतश्रुत्यनुसारेण साक्षात्कारहेतुत्वेनाभिमते शब्दे चक्षुष्ट्वादेरपि स्वीकारापत्तेः ।

''श्रुतिस्मृती हि विप्राणां नयने द्वे' इति हि श्रूयते ।

''पितृदेवमनुष्याणां वेदश्चक्षुस्सनातनम्' इति च स्मर्यते ।

"वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यत्रापि परोक्षव्यवसायमात्रमेवोच्यते । न च व्यवसायस्य निश्चितपदेनैव लाभात् प्रत्यक्षत्वरूपविशेषवत्त्वबोधनायैव सुपदम्, अन्यस्य विशेषस्य विज्ञानमित्यत्र विपदेनैव लाभात् इति वाच्यम् । व्यवसाये अकम्पनीयत्वविवक्षया सुशब्दप्रयोगात् ।

यत् पुनः विगीतं ज्ञानं साक्षात्कारि तत्त्वमस्यादिवाक्यजन्यज्ञानत्वात् तादृशवाक्यस्वरूपविषयक-श्रावणप्रत्यक्षवत् इत्यनुमानमुक्तम् तत् तत्त्वमस्यादिवाक्यजन्यप्राथमिकतादृशवाक्यार्थविषयकपरोक्षज्ञाने व्यभिचरितम् । तत्र साक्षात्कारित्वरूपसाध्याभावात् तत्त्वमस्यादिवाक्यजन्यज्ञानत्वरूपहेतुसत्त्वाच्च । अतिप्रसङ्गश्च–परोक्षत्वेन संमतेष्वपि ज्ञानेषु तुल्ययुक्त्या अपरोक्षत्वस्य साधयितुं शक्यत्वात्, अग्निहोत्रादिवाक्यजन्यं ज्ञानं साक्षात्कारि अग्निहोत्रादिवाक्यजन्यज्ञानत्वात् तादृशवाक्यस्वरूप-विषयकज्ञानवत् इति । न चानुकूलतर्कविरहात् अग्निहोत्रादिवाक्यजन्यज्ञाने साक्षारित्वसाधकानुमानम-प्रयोजकमिति वाच्यम् । तत्त्वमस्यादिवाक्यजन्यज्ञानेऽपि अप्रयोजकत्वस्य तुल्यत्वात् ।

किं च भवदीयानुमाने विषयजन्यत्वमुपाधिः । यत्र यत्र साक्षात्कारित्वं तत्र विषयजन्यत्वसत्त्वेन पक्षे तदसत्त्वेन च साध्यव्यापकत्वे सति साधनाव्यापकत्वात् । न च पक्षे विषयजन्यत्वं कुतो नास्तीति वाच्यम् । विषयजन्यत्वस्य ऐन्द्रियकप्रत्यक्षत्वव्याप्यतया व्यापकस्य ऐन्द्रियकप्रत्यक्षत्वस्य पक्षेऽभावेन व्याप्यस्य विषयजन्यत्वस्याप्यभावात् । न चेश्वरीयज्ञाने योगिनां ज्ञाने च साक्षात्कारित्व-सत्त्वेऽपि विषयजन्यत्वविरहात् साध्यव्यापकत्वाभावात् कथं विषयजन्यत्वमुपाधिरिति वाच्यम् । योगजधर्माद्यजन्यजन्यत्वावच्छिन्नसाक्षात्कारित्वव्यापकस्य विषयजन्यत्वस्योपाधित्वात् । तथा च पक्षधर्मावच्छिन्नसाध्यव्यापकोऽयमुपाधिरिति । 'विषयजन्येषु च व्याप्तेः संकोचात्' इति मूलम् । तेन विषयजन्यत्वे एव साक्षात्कारित्वरूपसाध्यनिरूपिता व्याप्तिरस्ति, न तु तत्त्वमस्यादिवाक्य-जन्यज्ञानत्वरूपभवदुक्तहेताविति विवक्षितम् । तत् कारिकया स्पष्टीकरोति –

न वाक्यजन्यता हेतुः प्रत्यक्षत्वे तु, किं पुनः ।

अर्थजन्यत्वमेव स्यात् ततः सोपाधिकस्त्वयम् ।।

प्रत्यक्षत्वे न वाक्यजन्यत्वं प्रयोजकम् , किं तु विषयजन्यत्वम् । तस्मात् अयं भवदीयो हेतुः सोपाधिकः विषयजन्यत्वरूपोपाधिमान् । अतो न साक्षात्कारित्वसाधक इति भावः । न च तत्त्वमस्यादिवाक्यस्वरूपविषयकश्रावणज्ञाने वाक्यजन्यत्वसत्त्वेऽपि विषयजन्यत्वविरहात् कथं साध्यव्यापकत्वमुपाधेरिति वाच्यम् । वाक्यविषयकप्रत्यक्षे वाक्यस्यैव विषयत्वेन विषयजन्यत्वस्याक्षतेः ।

यश्च तत्त्वमस्यादिवाक्यम् स्वप्रतिपाद्यविषयकसाक्षात्कारजनकं स्वप्रकाशार्थोपदेशरूपत्वात्, स्वतोऽपरोक्षार्थविषयकत्वाद्वा इत्यादिरनुमानप्रयोगः तत्र ब्रूमः । किं यावत्तत्त्वमस्यादिवाक्यव्यक्तयः पक्षः, उत श्रवणमननाद्यनन्तरभाविव्यक्तिमात्रम् । आद्ये श्रवणादिप्राक्कालिकव्यक्तौ साक्षात्कारजनकत्वविरहेण अंशतो बाधः । द्वितीये तत्रैव साध्याभाववति हेतुसत्त्वात् व्यभिचारः । दृष्टान्तश्च साध्यविकलः । दृष्टान्तेषु 'संवित् स्वप्रकाशा' 'दशमस्त्वमसि' इत्यादिवाक्येषु च साधनवैकल्यं दोषः । स्वप्रकाशत्वस्य अस्वप्रकाशतया संवित् स्वप्रकाशेति वाक्यस्य स्वप्रकाशा-र्थोपदेशरूपत्वाभावात्, दशमत्वस्य स्वतोऽपरोक्षत्वविरहेण दशमस्त्वमसि इति वाक्यस्य स्वतोऽपरोक्षार्थविषयकत्वाभावाच्च । साध्यवैकल्यमिति पाठे साध्यसाधकयोरुक्तहेत्वोरभावात् साध्यवैकल्यमिति भावो वर्णनीयः ।

भवदुक्तानुमानानां सत्प्रतिपक्षरूपाण्यनुमानानि च भवन्ति । तथा हि – तत्त्वमस्यादिवाक्यं न स्वप्रतिपाद्यार्थविषयकप्रत्यक्षज्ञानजनकं वाक्यत्वात् ज्योतिष्टोमादिवाक्यवत् । तथा तत्त्वमस्यादि-वाक्यजन्या धीः न स्वविषये प्रत्यक्षा वाक्यजन्यत्वे सति वाक्येतरविषयकत्वात् 'यजेत स्वर्गकामः' इत्यादिवाक्यजन्यस्वर्गयागादिसम्बन्धबुद्धिवत् । यथा यजेत स्वर्गकामः इति वाक्यजन्या "यागः स्वर्गसाधनमि"त्याकारिका यागस्वर्गयोः साध्यसाधनभावरूपसम्बन्धविषयिणी बुद्धिः न स्वविषयविषयक-प्रत्यक्षरूपा तद्वत् तत्त्वमस्यादिवाक्यजन्या बुद्धिरपि न स्वविषयविषयकप्रत्यक्षरूपा । तत्त्वमस्यादि-वाक्यजन्यबुद्धेः स्वप्रकाशतया स्वांशे प्रत्यक्षत्वात् बाधवारणाय साध्ये स्वविषयविषयकेत्युक्तम् । घटप्रत्यक्षे व्यभिचारवारणाय हेतौ वाक्यजन्यत्वे सतीति विशेषणम् । वाक्यविषयकश्रावणप्रत्यक्षे व्यभिचारवारणाय वाक्येतरविषयकत्वादिति विशेष्यम् । वाक्येतरपदं वाक्येतरमात्रपरम् । वाक्येतरमात्रविषयकत्वं च वाक्याविषयकत्वे सति वाक्येतरविषयकत्वम् । तत्र वाक्येतरविषयकत्वनिवेशे प्रयोजनविरहात् वाक्याविषयकत्वमात्रं विवक्षितम् । तथा च वाक्यजन्यत्वे सति वाक्याविषयकत्वं हेतुः पर्यवस्यति । न चोक्तानुमानस्य श्रुतिविरुद्धता, तमसः पारं दर्शयति, वेदान्तविज्ञानसुनिश्चितार्थाः इत्यादीनामन्यपरतायाः पूर्वमुक्तत्वात् ।

न च प्रथमानुमानस्य दशमस्त्वमसीत्यादिवाक्ये, द्वितीयानुमानस्य च तज्जन्यज्ञाने व्यभिचारः इति वाच्यम् । तादृशवाक्यात् साक्षात्कारप्रसक्तिरेव नास्तीति पूर्वमुपपादितत्त्वात् । न च पूर्वपक्षोक्तैरनुमानैः एतादृशानामनुमानानां सत्प्रतिपक्षत्वमिति वाच्यम् । एतादृशानामनुमानानां अतिप्रसङ्गानापादकव्याप्तिमूलकत्वेन प्रबलत्वात् । यथा तत्त्वमस्यादिवाक्यजन्यज्ञानत्वेनापरोक्षत्वसाधने तन्न्यायेन ज्योतिष्टोमादिवाक्य-जन्यज्ञानेऽप्यपरोक्षत्वप्रसङ्गः भवति भवदीयव्याप्तौ । अस्मदीयव्याप्तौ तु न तादृशोऽतिप्रसङ्गोऽस्ति । दर्शनानुसारित्वात् । हेतुप्रतिहेत्वोरुभयोः समबलत्वासंभवात् कतरस्य प्राबल्यमिति विमर्शे परोक्षहेतुत्वेन प्रसिद्धेष्वपि अपरोक्षहेतुत्वापत्तिरूपातिप्रसङ्गकरत्वात् त्वदनुमानं दुर्बलम् । अस्मदीयं त्वतादृशत्वात् प्रबलमिति अनेनानुमानेन भवदीयसाध्यबाधः । उभयोरनुमानयोः प्राबल्यदौर्बल्यानिश्चयदशायां साम्येऽपि रत्नकोशकारोक्तरीत्या साध्यतदभावसन्देह एवेति न त्वत्पक्षसिद्धिः । न च भवदीयानुमानस्य विपक्षे बाधकविरहात् अप्रयोजकत्वमिति वाच्यम् । त्वदीयानुमानस्यापि तथात्वात् । ज्योतिष्टोयादिवाक्यव्यावृत्तस्य

विशेषस्य तत्त्वमस्यादिवाक्येऽभावात्। न च तत्त्वमस्यादिवाक्ये प्रत्यक्षार्थविषयकत्वं विशेषः। ज्योतिष्टोमादिवाक्ये तु तदभावान्नातिप्रसङ्ग इति वाच्यम्। तथापि 'अयं घटः' 'दशमोऽहम्' इत्यादिवाक्यानां प्रत्यक्षार्थविषयकत्वेन प्रत्यक्षजनकत्वप्रसङ्गात्। न हि भवतापि तादृशवाक्यानां प्रत्यक्षहेतुत्वमिष्यत इति नेष्टापत्तिः। इष्यतां वा अयं घट इत्यादिवाक्यानां प्रत्यक्षजनकत्वम्। तथापि ज्योतिष्टोमादिवाक्यस्य प्रत्यक्षजनकत्वं दुर्वारम्। न च प्रत्यक्षजनकत्वप्रयोजकस्य प्रत्यक्षार्थविषयकत्वस्य तत्राभावात् कथं प्रत्यक्षजनकत्वप्रसङ्ग इति वाच्यम्। तत्रापि मनस्सहकृतेन शब्देनैव प्रत्यक्षज्ञानं जायत इति साहसस्य सुशकत्वात्। एतदुक्तं भवति अपरोक्षार्थविषयत्वं हि अपरोक्षज्ञानविषयार्थविषयत्वम्। तथा चापरोक्षज्ञाने आपाद्यमानेऽपरोक्षार्थविषयत्वमपि सहैवापादितं भवतीति नावान्तरविशेषोऽस्तीति। तथा च द्वयोरप्यनुमानयोर्विपक्षे बाधकविरहात् पूर्ववत् उभयोः सत्प्रतिपक्षत्वात् साध्यसंदेह एव स्यान्न निर्णय इति।

ननु तत्त्वमस्यादिवाक्यजन्यज्ञाने साक्षात्कारत्वसाधकपूर्वोक्तानुमाने विपक्षे बाधकस्तर्को वर्तते। तथाहि – आत्मविज्ञानस्य मोक्षसाधनत्वप्रतिपादकश्रुतेः तस्य विज्ञानस्य साक्षात्कारत्वाभावेऽनुपपत्तिः विपक्षे बाधकस्तर्कः। 'तरति शोकमात्मवित्' इत्यादिश्रुत्या मिथ्याभूतस्यार्थस्य ज्ञानेनैव निवृत्तिरिति युक्त्या च ब्रह्मज्ञानादेव अविद्यादिप्रपञ्चभ्रमनिवृत्तिः इति स्थिते प्रत्यक्षरूपस्य भ्रमस्य परोक्षज्ञानेन बाध्यत्वायोगात् प्रत्यक्षमेव बाधकमिति परिशेषे, सकलेन्द्रियागोचरे ब्रह्मणि ऐन्द्रियकप्रत्यक्षासंभवात् आनुमानिकज्ञानस्य परोक्षत्वनियमात् वाक्यजन्यमेव ब्रह्मप्रत्यक्षं प्रत्यक्षभ्रमनिवर्तकं वाच्यम्। वाक्यादप्यपरोक्षज्ञानानुत्पत्तौ प्रपञ्चभ्रमनिवृत्तिरूपो मोक्षोऽपि न स्यात् इति।

इदमपि दण्डताडनेन पीडितस्य सर्पस्य नर्तनम्। अस्याः परिपाट्याः आरम्भ एव निराकृतत्वात् – 'सत्यमेव हि संसारमुपासनप्रीणितेश्वरसंकल्पविशेषनिवर्त्यं साधयिष्यामः' इत्यादिना।

यः पुनरसावूहः (अनुमानम्) अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति अपरोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत् इति। तत्र सिद्धसाधनं दोषः। तत्त्वमस्यादिवाक्यजन्ये तद्वाक्यस्वरूपविषयज्ञाने अपरोक्षत्वमस्तीति निर्विवादतया अनुमानात् प्रागेव अपरोक्षत्वे तत्त्वमस्यादिवाक्यजन्यतत्स्वरूपविषयकश्रावणप्रत्यक्षात्मकज्ञानवृत्तित्वं सिद्धमिति। न च प्रत्यक्षे विषयस्य कारणत्वाभावात् वाक्यविषयकश्रावणप्रत्यक्षस्य वाक्यजन्यत्वाभावान्न सिद्धसाधनमिति वाच्यम्। तथा सति इन्द्रियस्यापि कारणत्वाभावात्। न चेन्द्रियसंनिकर्षः प्रत्यक्षकारणमिति अवश्यं वक्तव्यम्, अन्यथा अतीतानागतानामपि प्रत्यक्षप्रसङ्गात्। संनिकर्षस्य चेन्द्रियजन्यत्वात् इन्द्रियं प्रत्यक्षकरणमिति वाच्यम्। अर्थेन सहेन्द्रियसंनिकर्षस्यैव प्रत्यक्षहेतुत्वात् संनिकर्षस्यार्थेन्द्रियोभयहेतुकत्वात् अर्थस्य प्रत्यक्षकरणताया आवश्यकत्वात्।

अथापरोक्षत्वे तत्त्वमस्यादिवाक्यजन्यतदर्थविषयकज्ञानवृत्तित्वं साध्यम्। तत्त्वमस्यादिवाक्यस्वरूपविषयकज्ञाने तादृशवाक्यार्थविषयकत्वाभावात् न सिद्धसाधनमिति चेत् – न। तथापि परोक्षे तत्त्वमस्यादिवाक्यार्थविषयकशाब्दबोधात्मकानुभवे जाते एतदर्थप्रतिपादकमिदं वाक्यमिति परोक्षज्ञाने च सति तज्जन्ये उद्बुद्धे संस्कारे वर्तमाने यत् श्रोत्रेन्द्रियजन्यं तादृशवाक्यस्वरूपप्रत्यक्षं तत् एतदर्थप्रतिपादकत्वविशिष्टवाक्यविषयकं सत् सोऽयं देवदत्त इति प्रत्यक्षं संस्कारसहकारात् तत्तामिव अर्थप्रतिपादकत्वमपि विशेषणतया विषयीकरोति। अतस्तस्मिन् प्रत्यक्षे सिद्धसाधनम्। तस्य वाक्यजन्यत्वात् वाक्यार्थविषयकत्वाच्च। तस्मिन् प्रत्यक्षे विशेष्यतया वाक्यस्य विशेषणतया अर्थस्य च विषयत्वात्।

न च तत्त्वमस्यादिवाक्यार्थमात्रविषयकज्ञानवृत्तित्वं साध्यम्। पूर्वोक्तश्रावणप्रत्यक्षस्य वाक्यतदर्थोभयविषयकत्वेन न तद्वृत्तित्वमादाय सिद्धसाधनमिति वाच्यम्। एवमपि ब्रह्मेतरविषयकत्वरूपे धर्मे व्यभिचारः।

तत्त्वमस्यादिवाक्यजन्यतदर्थमात्रविषयकज्ञाने ब्रह्मविषयकत्वमेवास्ति, न तु ब्रह्मेतरविषयकत्वम् । अतः ब्रह्मेतरविषयकत्वे तत्त्वमस्यादिवाक्यार्थमात्रविषयकज्ञानवृत्तित्वरूपं साध्यं नास्ति । अपरोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वरूपो हेतुश्च वर्तते । अपरोक्षत्वेन संप्रतिपन्नेषु सर्वेष्वपि ज्ञानेषु ब्रह्मेतरविषयकत्वस्य सत्त्वात् तदत्यन्ताभावस्यासत्त्वात् । प्रत्यक्षेषु ज्ञानेषु संशयत्वविपर्ययत्व- चाक्षुषत्वादीनामत्यन्ताभावो भवति, ब्रह्मेतरविषयकत्वात्यन्ताभावस्तु नास्ति । मूले 'तत्खलु' इत्यादिना 'निवर्तते' इत्यन्तेन हेतुसत्त्वमुपपादितम् । तत्त्वमस्यादिवाक्यजन्ये तु ज्ञाने नैव वर्तते' इत्यनेन साध्यासत्त्वमुपपादितम् ।

ननु तत्त्वमस्यादिवाक्यातिरिक्तजन्यस्यापि ब्रह्मसाक्षात्कारस्य सत्त्वात् ब्रह्मेतरविषयकत्वस्य च तत्राभावात् अपरोक्षनिष्ठात्यन्ताभावप्रतियोगित्वमेव ब्रह्मेतरविषयकत्वेऽस्ति, न तन्निष्ठात्यन्ताभावाप्रतियोगित्वमिति हेत्वभावादेव न व्यभिचार इति चेत् – तर्हि ब्रह्मसाक्षात्कारस्य वाक्यैकजन्यत्वसाधनप्रयासमितः पूर्वं कृतं व्यस्मार्षीः । किं च वाक्यजन्यसाक्षात्कारस्यानुभवानारूढस्य कल्पनं व्यर्थं च । वाक्यातिरिक्तजन्येन ब्रह्मसाक्षात्कारेणैव प्रपञ्चभ्रमनिवृत्तिरूपकार्यसिद्धेः । एवम् अत्रानुमाने अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानावृत्ति, ज्ञानाकरणज्ञानत्वरूपत्वात् इत्यनेन सत्प्रतिपक्षितत्वमपि भाव्यम् । वाक्यजन्यार्थज्ञानस्यानुमित्यादेरिव ज्ञानकरणकत्वनियमात् । एवं श्रुत्यापि बाध्यमिदमनुमानम् । 'न चक्षुषा गृह्यते नापि वाचा, मनसा तु विशुद्धेन' इति श्रुतिर्हि नीरूपब्रह्मप्रत्यक्षं प्रति करणत्वस्य यत्र क्वापि कल्प्यत्वेऽपि, न चक्षुषः नापि वाचस्तत्, तदभावकालेऽपि प्रत्यक्षोदयात्, अतो मनस एवेति वाक्यजं प्रत्यक्षं निषेधति ।

यत्तु परोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, परोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत् इति प्रत्यनुमाने सिद्धसाधनत्वमुक्तम् । तत्र यद्यपि तत्त्वमस्यादिवाक्यजन्ययत्किंचिज्ज्ञानवृत्तित्वसाधने सिद्धसाधनं भवति, तथापि तत्त्वमस्यादिवाक्यजन्ययावज्ज्ञानवृत्तित्वसाधने न सिद्धसाधनमिति पूर्वमेवोक्तम् । तत्रापि यदुक्तं 'तमसः पारं दर्शयति' इत्यादिश्रुतिविरोधात् प्रत्यनुमाने बाध इति, तदपि तादृशश्रुतीनामन्यपरत्वव्यवस्थापनेन समाहितम् ।

यत्तु अपरोक्षत्वं ज्योतिष्टोमादिवाक्यजन्यज्ञानवृत्तीति प्रतिबन्द्यनुमाने विपक्षे बाधकाभावात् वैषम्यमुक्तम् – तदपि न । भवदीयानुमानेऽपि विपक्षे बाधकाभावात् । न च प्रपञ्चनिवर्तक- ज्ञानस्यापरोक्षत्वाभावे निवर्त्यस्य मिथ्यात्वानुपपत्तिः प्रपञ्चनिवृत्त्यनुपपत्तिश्च विपक्षे बाधकस्तर्क इति वाच्यम् । निवर्त्यस्य मिथ्यात्वाभावात् कल्पकासिद्धेः । निवर्त्यमिथ्यात्वं हि कल्पकम्, निवर्तकज्ञानस्य प्रत्यक्षत्वं कल्प्यम् । किं च निवर्त्यस्य मिथ्यात्वेऽपि परोक्षज्ञानादपि प्रत्यक्षभ्रमनिवृत्तेः पूर्वं समर्थितत्वात् अन्यथानुपपत्त्यभावात् नार्थापत्तेरवसरः । प्रत्यक्षेणैव प्रत्यक्षभ्रमनिवृत्तिरिति स्वीकारेऽपि तत्त्वमस्यादिवाक्यव्यतिरक्तिजन्येनापि आत्मप्रत्यक्षेण प्रात्यक्षिकप्रपञ्चबाधस्योपपत्तेः अन्यथासिद्धिरेव । अस्ति हि योगिनां प्रत्यक्षमदृष्टविशेषसहकृतान्तःकरणजन्यं श्रुतिस्मृत्याद्यागमप्रमाणसिद्धम् । श्रूयते हि रामायणे –

रहस्यं च प्रकाशँ च यद्वृत्तं तस्य धीमतः ।
तत्सर्वं धर्मवीर्येण यथावत् संप्रपश्यति ।। इति ।

यत्तु श्रीभाष्ये द्रष्टव्य इत्यादेः दर्शनसमानाकारत्वपरत्वमुक्तम् । तत् मोक्षसाधनभूतस्मृतेरेव दर्शनसमानाकारत्वाभिप्रायकम् । तावता धर्मवीर्यफलभूतं योगिप्रत्यक्षं निषिद्धमिति न मन्तव्यम् । योगिप्रत्यक्षस्यापि आगमसिद्धत्वात् । त्वदभिमतं वाक्यजन्यप्रत्यक्षस्य श्रुतिप्रमाणकत्वं पूर्वमेव निरस्तम् ।

ननु त्वन्मते फलभूतस्य योगिप्रत्यक्षस्य बन्धनिवर्तकत्वाभावात् कथं तेनान्यथासिद्धिरिति चेन्न ।

अद्वैतिमते मिथ्याभूतस्य बन्धस्यापरोक्षज्ञाननिवर्त्यत्वात् योगिप्रत्यक्षमादाय वाक्यपरिशेषासिद्धेः अन्यथासिद्धेश्चोपन्यासे बाधकविरहात् । 'क्लृप्तकल्प्यविरोधे तु युक्तः क्लृप्तपरिग्रहः' इति न्यायात् । योगिप्रत्यक्षं क्लृप्तम् । वाक्यजन्यप्रत्यक्षं कल्प्यम् । यदि च विशिष्य विपक्षे बाधकस्य वक्तुमशक्यत्वेऽपि यत्किंचित् विपक्षे बाधकमस्तीति सामान्यतोऽभिमानेन अनुमानप्रयोगं करोषि तदा ज्योतिष्टोमादिवाक्येऽपि भवादृशः कश्चित् तादृशाभिमानेन प्रत्यक्षत्वसाधनायानुमानं प्रयुञ्ज्यात् ।

एतावता प्रबन्धेन त्वदुक्तानुमानानां सिद्धसाधनत्वम् अनैकान्तिकत्वम् अतिप्रसञ्जकत्वम् आभाससमान-योगक्षेमत्वम् अन्यथासिद्धत्वम् इत्यादिदोषैर्दूषितत्वात् अन्यस्य कस्यचिदनुमानविशेषस्योत्प्रेक्षणं निपुणधियामस्माकं सिषाधयिषितं यत् तत् प्रामाणिकमिति तव हृदये जायमानामनुमितिम् अथवा अनुमतिं सूचयति । पूर्वोक्तदोषसत्त्वादेव शाब्दापरोक्षसाधकतयोपन्यस्तानि महाविद्याद्यनुमानान्यपि भग्नानि ।

यत्तु शब्दस्य प्रत्यक्षजनकत्वे तस्य प्रत्यक्षप्रमाणेऽन्तर्भावः स्यादिति अस्माभिः प्रसञ्जिते सति भवद्भिरुक्तम् स्वतोऽपरोक्षब्रह्मात्मविषयशब्दान्यत्वे सति अपरोक्षप्रमितिकारणत्वं प्रत्यक्षान्तर्भाव-प्रयोजकमिति । तत् तत्त्वमस्यादिवाक्यस्यापरोक्षधीजनकत्वे सिद्धे सति वक्तव्यम्, तत्तु नाद्यापि सिध्यतीति प्रत्यक्षान्तर्भावप्रसङ्गो दुर्वारः ।

तस्मात् वाक्यजन्यसाक्षात्कारस्यासिद्धेः परिशेषात् जगद्बाधकस्यान्यस्याभावात् वाक्यजन्यपरोक्ष-ज्ञानेनैव अप्रतिबद्धसामग्र्या समुत्पन्नेन बाधस्त्वया वक्तव्य इति स्थितौ श्रवणादिविधीनां वैयर्थ्यं भवन्मते प्रागुपपादितं सुस्थम् । न च वाक्यजन्यपरोक्षेणैव जगद्बाधोऽस्त्विति वाच्यम् । तथा सति श्रुतवेदान्तानां संसारबाधस्यावश्यकतया तदनुवृत्तेरनुपपत्तेः । बाधितानुवृत्तिपक्षस्तु पूर्वमेव 'पृथग्वादे निरस्तः, जीवन्मुक्तिपक्षश्च पृथङ् निरसिष्यते ।

तदेवं शाब्दापरोक्षसाधकतयाभिमतानामनुमानागमार्थापत्तीनां दूषितत्वात् प्रत्यक्षोपमानादेश्च तस्मिन् विषये प्रवृत्त्यसंभवात् तत्त्वमस्यादिवाक्यस्य साक्षात्कारजनकत्वं निष्प्रमाणकमिति स्थिते प्राचीनानामद्वैतिनां स्वग्रन्थेषु तत्त्वमस्यादेः साक्षात्कारजनकत्वकथनं आचार्यवन्दकानां तेषां प्रलोभनमात्रमिति सिद्धम् । प्राचीनानाम् इत्यनेन नवीना अद्वैतिनः शाब्दापरोक्षजीवन्मुक्त्यादिकं नाङ्गीकुर्वन्तीति सूचितम् ।

इति महामहोपाध्यायेन एन. एस. रामानुजताताचार्येण
विरचितः शाब्दापरोक्षपरिशीलनात्मकः
लघुनिबन्धः

काव्यनिष्पत्तिप्रक्रिया

महामहोपाध्यायः काश्यपो
द्विवेदी रेवाप्रसादः सनातनः
सङ्कायप्रमुखचरः, संस्कृतसङ्कायस्य
का.हि.वि.वि.

भारतीयायां वसुमत्यां नाट्यशास्त्रस्य विधातारं भरतमुनिमारभ्य साम्प्रतं यावद् यावन्तः कालपर्ययाः परिपूर्त्तिमिताः काव्यलक्षणे तेषां या प्रतिपत्तिस्तामिमां काव्यनिष्पत्तिप्रक्रियात्मना प्रत्यभिजिज्ञासामहे। पुरुषनिष्पत्तिरिव काव्यनिष्पत्तिरपि स्वनिष्ठायां विशेष्यतायामवच्छेदीकुरुते पूर्णत्वमेव। तथाहि सद्योजातं शिशुशरीरं नेत्रद्वयम्, कर्णद्वयम्, हस्तपादद्वयम्, इत्यादिक्रमेण पूर्णत्वावच्छिन्नमेव निष्पत्तिं लभते, न पुनरेकैकमङ्गं परिहाय। सेयं पूर्णता प्राचीनैराचार्यैर्दोषाभाव इति पर्यभाषि। दोषो नामापूर्णता तदभावश्च पूर्णता। दोषाभावोऽयं गुणपदेनापि प्रतिपाद्यते भरतेन[१]। वामनेन पुनर्गुणाभावो दोषतया[२]। अनयोर्भरतो वर्धमानत्वे दत्तदृष्टिः कुहूतः प्रस्थाय पूर्णिमां प्राप्नोति यत्र कलावृद्धिश्चन्द्रबिम्बस्य। वामनः पुनः पूर्णिमामास्थाय प्रतिप्रतिष्ठते कुहूं यावत् लक्षयते च कलाहानिं चन्द्रबिम्बस्य। सिंहवीक्षणमेतदिति प्रतिपाद्यं भवति[३]।

तदियं काव्यनिष्पत्तेः प्रथमा भूमिः। अत्राचार्या भरतमुनिप्रभृतयः। एतत्संप्रदायेऽनुयायिनो दण्डिप्रमुखा आचार्याः। एतेषां महावाक्यं गुणाः खलु काव्यस्यात्मेति। गुणाश्च दोषविपर्य्यासात्मान इति संख्यया दशैव भरत इव दण्डिन्यपि। उद्दिश्य निदर्शिताश्चैते काव्यलक्षणनाम्नि स्वकीये काव्यशास्त्रग्रन्थे काव्यादर्श इति प्रसिद्धे दण्डिना एवम् –

(१) श्लेषः (२) प्रसादः (३) समता (४) माधुर्यम् (५) सुकुमारता।
(६) अर्थव्यक्ति (७) रुदारत्व (८) मोजः (९) कान्ति (१०) समाधय (१.४१)इति।
उक्तञ्चानन्तर्येण –
इति वैदर्भमार्गस्य दश प्राणा गुणाः स्मृताः।
एषां विपर्य्ययः प्रायो दृश्यते गौणवर्त्मनी ।।(१.४२)-ति।
सोऽयं सम्प्रदायो नाट्यशास्त्रकृतो मुनेर्भरतस्य। यदुक्तमेतेन षोडशेऽध्याये –
एते दोषास्तु नाट्यस्य/काव्यस्य मया सम्यक् प्रकीर्त्तिताः।
गुणा विपर्य्ययादेषां माधुर्यौदार्यलक्षणाः ।। ना.शा. १६.९५।
श्लेषः प्रसादः समता समाधि-र्माधुर्यमोजः पदसौकुमार्यम्।

---

१. एते दोषास्तु विज्ञेयाः सूरिभिर्नाट्यसंश्रयाः, एत एव विपर्यस्ता गुणाः काव्येषु कीर्त्तिताः ।। नाट्यशास्त्रे १६-९५
२. 'गुणविपर्य्ययात्मानो दोषाः' वामनस्य काव्यालङ्कारसूत्रम् २-९-१
३. अपूर्णतैव दोषस्तद् दोषाभावश्च पूर्णता। काव्यालङ्कारकारिका १४८।
या चैषा पूर्णता सैव गुणत्वेन मुनेर्मता, गुणाभावे च दोषत्वं वामनेन निरीक्ष्यते।
पूर्णताभूमिकां रूढस्यास्य तत् सिंहवीक्षणम्, राकेन्दौ दत्तदृष्टेर्नु कुहूं यावन्निरीक्षणम् ।। – कारिका १५०

अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यस्य गुणा दशैते ।। इति ना.शा.१६.९६ ।

अत्रेदं स्पष्टं यद् दोषाभावगतं दशसंख्यावत्त्वमेव गुणगतस्य दशसंख्यावत्त्वस्य नियामकम् । तदिदमाद्यमधिकरणं काव्यशारीरके ।

भामहोऽत्र प्रतीयायते । स हि गुणनामकं तत्त्वं स्वीकर्त्तुं विचिकित्सते, प्रस्तौति च सहसैव प्रसादो माधुर्यं चेति द्वितयमेव लक्षणोदाहरणाभ्यां भामहालङ्कारनामके काव्यालङ्कार-नाम्ना प्रसिद्धिमापिते स्वकीये काव्यलक्षणग्रन्थे । अन्ते च 'ओजो'-पि समुद्दिशति किन्त्वलक्षयित्वाऽनुदाहृत्य च । मार्गोऽयमेतदीयो वामनेन परामृश्यते – 'नाऽसन्तः सद् वेद्यत्वात् । न भ्रान्ताः, निष्कम्पत्वात्, न पाठधर्माः, सर्वत्राऽदृष्टेः ।। (काव्यालङ्कारसूत्राणि ३.१५.२५-२७)

प्रसादस्य माधुर्यस्य च गुणत्वाय प्रकल्पते तयोः संप्लव ओजसा । तथोक्तमेतेन 'प्रसादो द्विविधः गाढबन्धः शिथिलबन्धश्चे'ति । अनयोः प्रथम ओजः, द्वितीयश्च माधुर्यम् । अनयोर्दोषाभावत्वेऽपि गुणत्वं कुत इति प्रश्ने वामनस्योत्तरसूत्रम् – 'गुणः संप्लवात्' । अत्र वृत्तिः गुणः प्रसादः, ओजसा सह संप्लवात्, स शुद्धस्तु दोष एवेती'-ति (३.१.७)। संप्लवे पुनरनुभवं प्रमाणयति – 'सत्वनुभवसिद्धः (३.१.८)। अत्र वृत्तिः 'स तु संप्लवोऽनुभवसिद्धः, तद्विदाम्, रत्नादिविशेषवत्' इति । अत्र श्लोकः –

करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः ।
यथाऽनुभवतः सिद्धस्तथैवौजः प्रसादयोः ।। इति

केवलस्यौजसो गुणत्वाभावोत्प्रेक्षामिमां स्फोटयति कुन्तकाचार्यो यो हि वक्रोक्तिजीविते तमेतं गुणं न गणयति । वामने पुनः प्रसादस्यापि स्वातन्त्र्येण गुणत्वे प्रश्नः । माधुर्यस्य पुनरुभयोरप्यनयो-राचार्ययोः समः समादरः ।

भरतसंप्रदाये यदि न्यूनत्वमप्याद्रियते तर्हि समधिकत्वमपि कल्पयितुं शक्यत एव । तदपि च राजशेखरकुन्तकयोरालोक्यते । राजशेखरः काव्यमीमांसायां गुणाँस्त्यजति । कुन्तकः पुनः सामान्य-विशेषाभ्यां गुणान् राशिद्वये विभज्य सामान्यत्वेन (१) औचित्यम् (२) सौभाग्यं चेति गुणद्वयं कल्पयति, विशेषत्वेन पुनः माधुर्यम्, प्रसादश्चेति प्राचीनौ द्वौ नवीनौ च लावण्यम् आभिजात्यञ्चेति । माधुर्यप्रसादयोरपि मार्गत्रयगतत्वेन प्रायशोऽभिनवत्वमेव । सेयं स्वैरताया अनुज्ञा । प्रभव एतस्या भामह एव ।

मध्ये वामनाचार्योऽपि स्वातन्त्र्यमधिश्रयते । स हि 'श्लेषप्रासादीने'व पृथगर्थगुणत्वेन परिकल्प्य गुणानां विंशतिसंख्याकत्वमुपपादयते । आनन्दवर्धनाचार्यो माधुर्यम् ओजः प्रसादश्चेति त्रीनेव गुणानाद्रियते, अन्येषां त्यागे मौनमाश्रयाणस्तेषामेषां नियमने रसानभिषिञ्चति । वस्तुतस्त्रितयेऽपि गुणास्तन्मतेन रसनिष्ठा एव,ताननुसृत्य क्रियमाणाः शब्दार्थबन्धा अपि मधुरादिपदव्यवदेश्या इति समेषामेव ध्वनिमार्गिणां संस्कारः । काव्यप्रकाशकारः श्रीमम्मटोऽप्यभिनवगुप्त इवैवानन्द-वर्धनमनुसरति । मम्मटः पुनरन्येषां त्यागे हेतुत्रयमुपष्टम्भयति –

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दशे ।।-ति ।

तदिदं द्वितीयमधिकरणं काव्यशारीरके । अत्र प्रमुखं प्रतिपाद्यं गुणः । अत्राचार्या भरतमारभ्य वामनं यावज्जाता मनीषिणः । एतस्मिन्नेवावधौ रुद्रटस्यापि गणना, किन्त्वसावपि राजशेखरवन्नैव स्पृशति गुणान् ।

एतेषां महावाक्यं भवति 'गुणाः खलु काव्यात्मे'-ति । उक्तमेव हि वामनेन-रीतिरात्मा काव्यस्ये'-ति (१.२.६)। अत्र विशिष्टा पदरचना रीतिरिति, विशेषो गुणात्मेति[1] परवर्त्तिभ्यां सूत्राभ्यां 'गुणविशिष्टा पदरचना 'रीति'-रिति फलितार्थे विशेष्यतावच्छेदक-पदं गुण एव सिद्धं भवतीति ।

वस्तुतस्तु वामनस्य मते रसरूपं सौन्दर्यमेव काव्यात्मपदं भजते, तस्यैवैकस्य साध्यत्वात् । सति च साध्ये साधनस्यात्मत्वमुपचारैकसाध्यम् । उक्तमिदमस्माभिर्द्वाविंशत्या कारिकाभिः काव्यालङ्कारकारिकाग्रन्थपरिशेषभूताभिः । तथाहि -

ततश्च वामनाचार्यो रीतिरात्मेति सूत्रयन् ।
सौन्दर्यमात्मा काव्यस्येत्येव सूत्रयतेऽस्फुटम् ।।१२।।
वामनाचार्यसिद्धान्तस्तर्कैरुक्तैस्ततो भवेत् ।
'सौन्दर्यवाद'-नाम्नैव व्यवहाराय युक्तिभाक् ।।१३।।
वामनाचार्यसिद्धान्ते न रीतिर् न गुणः, परम् ।
सौन्दर्यमेव काव्यात्मा यद्वाऽलङ्कार एव स ।।२२।। इति

सौन्दर्यमपीदं यथावल्लक्षितमस्माभिरेव 'वस्तुनिष्ठं करणप्रत्याहारजनकत्वं सौन्दर्यम्' इति । ततश्च चित्रमूर्तिगीतिकाव्यार्थगता य सहृदयप्रत्याहारजनकता तदवच्छेदकत्वं सौन्दर्यमि'ति फलितोऽर्थः प्रत्यपाद्यस्माभिः कलासमाधि'रिति ग्रन्थे नाट्यानुशासनस्य चतुर्थाध्यायरूपे ।

तदिदं द्वितीयमधिकरणं काव्यनिष्पत्तिप्रक्रियायाम्, यत्र प्राधान्यमभजद् गुणतत्त्वमेव काव्यशरीरगतम् । अथ तृतीयमधिकरणम् ।

अलंभावः

'काव्यं ग्राह्यमलङ्कारादि'ति वामनोक्तौ अलमित्येकं पदम्, 'कार' इति च द्वितीयम् । अनयोः प्रथमम् अलेत्यजन्तमपि 'अलि'ति च हलन्तमपि भवति । प्रकृतिभूतो धातुरत्र 'अल' इति 'अलम्'इति वा । अर्थश्चास्य भूषण-पर्याप्ति-वारणानि । एतेषु पर्याप्तिरेव प्रमुखा भूषणवारणयोस्तत्कार्यत्वेन प्रसिद्धत्वात् । यो हि तृप्तिं भजते स खलु नाधिकं जिघृक्षति, दीयमानञ्च 'अलमलमि'ति निवारयति, यश्च भूषितो भवति स खलु अलङ्कृत इत्युच्यते वरप्रभृतिः । कियन्मात्रं वालङ्करणं वरादीनामङ्गेष्वपेक्ष्यत इति जिज्ञासिते समीचीनमुत्तरमेकमेव 'यतोऽधिक उद्वेजको माभूदि'ति । तदिदं तृप्तिमूलकमेव । पर्याप्तिमूलां च पश्यामस्तृप्तिम् । एवं पर्याप्तिरेव 'अल'धातोः प्रमुखोऽर्थः । अनेनार्थेन क्रोडीकृतं समग्रमपि विश्वम् । य एषोऽस्य सर्गः, यो वा अस्य विसर्गः, यश्चापि ऋतुचक्रात्मा परिणामोऽस्य, तत् सर्वमप्यत्रार्थरूपेण गृह्यते । अत एवाग्नेये महापुराणेऽलमिति ब्रह्मेति च पर्यायतयैवोपस्थाप्यते । तथा हि वचनम् -

अक्षरं परमं ब्रह्म सनातनमलं विभुम् ।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ।। (अध्यायः ३३९.१)

वैदिकीयं परिभाषा, तत्र 'अरम्' इति श्रुतिः । रस्य लत्वे तु 'अलमि'ति ।[2] प्रसिद्ध - 'अलि'ति यद्धलन्तं पदं तेन सुशकमेव अपौरुषेये माहेश्वरे वर्णसमाम्नाये यः खल्वल्प्रत्याहारस्तस्य ग्रहणम् । स च 'अइउण्' इति सूत्रत आरभ्यते समाप्यते च 'हल्' इत्यनेन सूत्रेण । सोऽयं समग्रोऽपि वर्णसमाम्ना-

---

१. १.२.७, १.२.८ काव्यालङ्कारसूत्राभ्याम् ।
२. ऐतरेय आरण्यके ।

योऽपौरुषेयः । अलेनार्थजातमिवाऽलाऽनेन सम्पूर्णमेवाक्षरजातं संकेत्यते । ताविमौ शब्दार्थौ । अलिति शब्दः, अल इति चार्थः । उभयत्राऽपि पर्याप्तिरेव भगवती परमा ।

अथ यत् 'कास्'पदं तस्यापि नैकधा भवति व्युत्पादनम् । यथा चैतत् तत् पाणिनेर्भगवतोऽष्टाध्याय्यास्तृतीयस्याध्यायस्य द्वितीयतृतीयपादगतघञ्विधायकैः सूत्रैरवगन्तुं शक्यते । भवन्ति हि तत्र सूत्राणि यैर्विधीयते घञ्प्रत्ययः कर्त्रर्थेऽपि । कर्मण्यणि (३.२.१)ति कर्मण्युपपदे विद्यमाने करोतेः कर्त्रर्थ एव घञ् विधीयते । कुम्भकार इति चाऽत्रोदाहरणम् । प्रकृतेऽपि 'अल'पदस्य द्वितीयान्तं रूपं कर्मण्यादाय शक्यत एव व्युत्पादयितुं घञा 'कार' शब्दः । तथा चालं पर्याप्तं करोतीत्यलङ्कार इत्यपि स्वीकर्त्तुं शक्यतेऽलङ्कारशब्दस्य कर्त्तृव्युत्पत्तिः । 'वर्णात्कार' इत्यनेनापि पथा कारपदं स्वरूपेऽर्थे शक्यस्वीकारः ततश्चालमेवालङ्कार इति स्वीकर्त्तुं शक्योऽर्थोऽत्र । भावेऽपि घञः प्रयोगं पश्यामः । एवं चालम्भाव एवाऽत्रालङ्कारपदप्रतिपाद्यो भवेदेव । उक्तं चैतदस्माभिरेव –

अलंभावो ह्यलङ्कारः स च सौन्दर्य–तत्कृतोः ।
विभक्तात्मा विभुर्जीवब्रह्मणोश्चिद्घनो यथे ।। – ति ।

एष चालंभावः शब्दगतेष्वनुप्रासादिषु लक्ष्यते, अर्थगतेषु च रूपकोपमादिषु । य एष रस इति सर्वातिशायी धर्मः स द्विधोऽपलभ्यते इक्षुरस इत्यादिष्वास्वाद्यात्मतया, आस्वादतया च रसस्य तृप्तः इत्यादिषु प्रयोगेषु । काव्ये नाट्ये कलासु च सुलभ एषः । रत्याद्युपसृष्ट एष ताँस्तानभिधान–विशेषानादत्ते शृङ्गार इति हास इति वीर इति करुण इति वा । योऽयमास्वादः अत्रहि विषयोपहितं प्रत्यक्चैतन्यमेव विषयः, तदेकमेव च विषयि । तच्चोच्यते 'स्वाकार इवाऽभिन्नोऽपि गोचरीकृत' इति । अयमास्वाद एव रसः, असावेव सौन्दर्यरूपो हृदयहारी विषयगतो विशेषः । प्रत्यक्चैतन्यस्य ब्रह्मरूपत्वेन स्वीकृतावियमेव तृप्तिप्रसूतिः पर्याप्तिः । एवं चालंभावार्थकेनालङ्कारपदेन आब्रह्म स्तम्बान्ताः सर्वेऽपि विसीयन्ते पदार्थाः, विसीयन्ते च तत्प्रतिपादनपरायणाः सर्वेऽपि वाचकाः स्फोटरूपाश्चैतन्यमूर्त्तयः शब्दा अला प्रत्याह्रियमाणस्वरूपाः । उपलब्धिरियमुपस्थाप्यते काव्यालङ्कारकारिकाया द्वितीयस्य संस्करणस्योपसंहारे–

प्रत्यक्चैतन्यमात्मा चेद् ब्रह्माऽभेदेन रस्यते ।
अलम्भावोऽप्यलङ्काररूपो ब्रह्मेति रस्यताम् ।। इति ।

एवं चेयमेव काव्यनिष्पत्तेः प्रक्रिया यत् पूर्वं प्रतिभायां दोषाभावरूपा पूर्णता, ततस्तस्यां गुणा यौवनादयः, तेषां चालाम्भावो रसपर्यवसानक इति ।

श्रीः

अर्थवादप्रामाण्यम्

– प्रो. एन्. आर्. श्रीनिवासन्
अध्यक्षः, मीमांसाधर्मशास्त्रविभागस्य,
संस्कृतविद्याधर्मविज्ञानसंकायस्य च,
काशीहिन्दूविश्वविद्यालये

(विषयसंशयसङ्गतयः)

पूर्वमीमांसायां प्रथमाध्यायद्वितीयपादप्रथमाधिकरणे धर्माधर्मयोरर्थवादानां प्रामाण्यं निरूपितम् । अस्मिन्नधिकरणे "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्र्वशीयत तद्रजतं हिरण्यमभवत् ....अश्रुजं हि यो बर्हिषि ददाति पुराऽस्य संवत्सराद्गृहे रुदन्ति" इत्यादीनामर्थवादानां "वायव्यं श्वेतमालभेत" "तस्माद्रजतं हिरण्यमदक्षिण्यम्, तस्माद्बर्हिषि न देयमि"त्यादिविधिशेषभूतानां धर्माधर्मविषयकप्रमाजनकत्वरूपं प्रामाण्यमस्ति न वेति संशयः ।

प्रथमाध्यायस्य धर्माधर्मप्रमाणनिरूपणपरत्वात् अस्याप्यधिकरणस्य अध्यायार्थभूतधर्माधर्म-प्रमाणप्रतिपादकत्वेन अध्यायसङ्गतिः सुलभा । पूर्वस्मिन्नधिकरणे वेदापौरुषेयत्वे उपपादिते अर्थवादनामपि विधिप्रतिषेधानामिव वेदत्वाविशेषेण अपौरुषेयत्वात् विधिप्रति-षेधवद्धर्माधर्मप्रमितिजनकत्वमस्ति न वेति विचारः वेदापौरुषेयत्वाधिकरणानन्तरं सङ्गतः ।

(पूर्वपक्षः)

विधिवाक्येन साध्यसाधनेतिकर्तव्यताविशिष्टा भावना (कृतिः) विधीयते । विधिवाक्येषु लिङो लेटो वा श्रवणेन तेषां प्रवर्त्तकत्वावगतेः प्रवृत्तेश्च इष्टसाधनत्वज्ञानं विना अनुत्पत्तेः विधीनां प्रवर्तकत्वनिर्वाहार्थं प्रवृत्तिविषयीभूतयागादेरिष्टसाधनत्वमाक्षिप्यते । एवञ्च यागादीनां वेदबोधितेष्टसाधनताकत्वरूपधर्मत्वात् विधिवाक्यानाञ्च तद्बोधकत्वेन भवति धर्मे प्रामाण्यम् । एवं निषेधवाक्यानां साध्यसाधनेतिकर्तव्यताविशिष्ट-भावनानिषेधकत्वेन निवर्तकत्वप्रतीतेः, अनिष्टसाधत्वज्ञानं विना च निवृत्त्यनुत्पत्तेः निषेधविषयीभूतरजत-दानादेरनिष्टसाधनत्वमाक्षिप्यते । वेदबोधितानिष्टसाधनताकत्वरूपाधर्मत्ववद्रजतदानादिप्रमापकत्वेन च निषेधवाक्यानामधर्मे प्रामाण्यम् । नेदमर्थवादेषु संभवति । तेषां सिद्धार्थबोधकत्वेन कार्यार्थाबोधकत्वेन प्रवर्तकनिवर्तकत्वे न स्तः । एवञ्च तच्छक्यार्थे प्रवृत्तेर्निवृत्तेर्वा असंभवेन न तस्य इष्टानिष्टसाधनात्वाक्षेपः सम्भवतीति तस्य धर्माधर्मत्वाभावात् तद्वाचकार्थवादस्यापि न धर्माधर्मयोः प्रामाण्यम् । किञ्च अर्थवादेषु केचन वायुशीघ्रगामित्वादिकं सन्तमर्थं प्रतिपादयन्ति केचन तु 'ग्रावाणः प्लवन्ते' इत्यादयः असन्तमप्यर्थं बोधयन्तीति तेषां कस्मिन्नप्यर्थे याथार्थ्यलक्षणमपि प्रामाण्यं नास्ति, किमुत धर्माधर्मयोः विषये

अनधिगताबाधितार्थगन्तृत्वरूपम् ।

लक्षणयाऽपि अर्थवादानां धर्माधर्मयोः प्रामाण्यं न संभवति, वाच्यार्थान्वयानुपपत्त्यभावे लक्षणाया एवासंभवात् । तात्पर्यग्राहककाभावात् तात्पर्यानुपपत्त्याऽपि लक्षणा कल्पयितुं न शक्यते । "अथ शब्दमात्रमथवा प्रमाणमात्रं प्रवृत्तिनिवृत्तिरूपप्रयोजनवदर्थविषयकमेव । नियमादस्मात् अर्थवादानां निष्प्रयोजनार्थबोधकत्वं न सम्भवतीति लभ्यते । अतः अर्थवादानां वाच्यार्थस्य निष्प्रयोजनत्वात् तेषु लक्षणा कार्या । इत्थं प्रमाणमात्रस्य प्रवृत्तिनिवृत्तिलक्षण–प्रयोजनवदर्थविषयकत्वनियम एव लक्षणायां तात्पर्यग्राहकमि"त्यपि न युक्तम् । अस्य नियमस्य आख्यायिकारूपशब्दानां निष्प्रयोजनार्थप्रतिपादकत्वेन व्यभिचरितत्वेन अप्रामाणिकत्वात् ।

अथ यदि "स्वाध्यायोऽध्येतव्य" इति विधिना अर्थज्ञानोद्देशेन स्वाध्यायाध्ययनं विधीयते । अर्थज्ञानस्य च निष्प्रयोजनत्वे तदुद्देश्यकस्वाध्यायाध्ययने प्रवृत्त्यनुत्पत्तेः विधेः प्रवर्त्तकत्वानु–पपत्तिः । अतः अर्थज्ञानस्य प्रयोजनवत्त्वमाक्षिप्यते । प्रयोजनञ्च स्वाध्यायप्रतिपाद्यार्थे प्रवृत्तिस्ततो निवृत्तिर्वा । एतदुभयञ्च स्वाध्यायार्थस्य इष्टानिष्टसाधनत्वयोरेव सम्भवतीति स्वाध्यायार्थत्वावच्छेदेन इष्टमनिष्टं वा प्रयोजनमिति अर्थवादार्थानामपि स्वाध्यायार्थत्वाविशेषात् इष्टानिष्टरूपप्रयोजनवत्त्वं सिद्धम् । एवं अर्थवादेषु प्रयोजनवदर्थलक्षणायाम–ध्ययनविधिस्तात्पर्यग्राहकः इत्युच्यते, तर्हि अर्थज्ञानोद्देश्यकाध्ययनस्य लोकसिद्धत्वेन अध्ययनविधिवै–यर्थ्यापत्तिः । नापि अर्थज्ञाने उपायान्तराणामपि सत्वेन अध्ययनविधिः "स्वाध्यायाध्ययनेनैव अर्थज्ञानं भावयेदि"ति नियमं करोति । उपायान्तरस्यापि सत्त्वेन नियमस्य अर्थज्ञाने अनुपयोगात् । क्रतुं यावदुपयोगोऽपि कल्पयितुं न शक्यते । अर्थज्ञानस्य अध्यापनादिष्वप्युपयोगेन अव्यभिचरितक्रतुसंबन्धाभावात् । अतः स्वाध्यायविधिः अर्थज्ञानोद्देशेन अध्ययनं न विधत्ते नापि नियमयति । किन्तु विश्वजिन्न्यायेन स्वर्गफलं कल्पयित्वा तदुद्देशेन अध्ययनं विधत्ते । यदि स्वर्गफलकल्पने गौरवमित्युच्यते तर्हि अर्थज्ञानोद्देशेनैव अध्ययनविधिर्भवतु । विधेः लोकतः पूर्वप्रवृत्त्यङ्गीकारेण विधिप्रवृत्तिसमये अर्थज्ञानाय लोकासिद्धोपायाभावेन न विधिवैयर्थ्यम् । अथवा 'अध्येतव्य'इति समानपदोपात्तत्वेन अध्ययनमेव भावनायां भाव्यत्वेनान्वेति । न च अध्ययनस्य इष्टसाधनत्वस्य ज्ञानाभावेन कथं तत्र प्रवृत्तिः स्यादिति वाच्यम् । अर्थज्ञानस्य अध्ययनस्य वा इष्टसाधनत्वज्ञानाभावेऽपि "अनधीयाना व्रात्या भवन्ती"ति वचनेन अकरणे प्रत्यवायबोधनेनैव प्रवृत्तिसंभवात् स्वाध्यायविधेः प्रवर्त्तकत्वोपपत्तिः । अतः स्वाध्यायविधिना स्वाध्यायार्थस्य प्रयोजनवत्त्वं नाक्षिप्यते । तस्मात् स्वाध्यायान्तर्गतार्थवादानां प्रयोजनवदर्थप्रतिपादकत्वे प्रमाणाभावात् न तत्र लक्षणा संभवति । अतः अर्थवादा अप्रमाणमेव धर्माधर्मयोः इति ।

(सिद्धान्तः)

दृष्टे संभवति अदृष्टफलकल्पनायाः अन्याय्यत्वात् स्वाध्यायविधिना स्वर्गोद्देशेन अध्ययनं न विधीयते । अर्थज्ञानमात्रोद्देशेनाप्यध्ययनं न विधीयते । "अनधीयाना व्रात्या भवन्ति" इति वचनेनैव अध्ययनस्य अवश्यकर्त्तव्यत्वप्रतीतेः –

"स्थाणुरयं महाभारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा ।।"

इत्यादिवचनाच्च अधीतवेदस्य अर्थज्ञानस्यापि आवश्यकत्वात् तस्य स्वाध्यायविध्यभावेऽपि उक्तवचनद्वयेनैव सिद्धेः स्वाध्यायविधिवैयर्थ्यापत्तेः । अध्ययनस्य भाव्यत्वपक्षेऽपि तस्य अनधीयाना इति वचनेनैव कर्त्तव्यत्वलाभात् स्वाध्यायविधिवैयर्थ्यप्रसङ्गः । अतः वैपर्थ्यपरिहारार्थं स्वाध्यायविधिना प्रयोजनवदर्थज्ञानोद्देशेन स्वाध्यायाध्ययनं विधीयते इति वक्तव्यम् । एवञ्च अर्थज्ञानस्य प्रयोजनवत्त्वं नाक्षेपलभ्यं किन्तु शब्दादेव प्रतीयते । यदि अध्येतव्य इति तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वबोधनात् कर्मत्वेन च तस्यैव उद्देश्यत्वलाभ इत्युच्यते, तर्हि प्रयोजनवदर्थ-ज्ञानसाधनीभूतस्वाध्यायोद्देशेन अध्ययनं विधीयते । अतः 'अध्ययनं स्वाध्यायसंस्कारः' इति प्रवादोऽप्युपपद्यते । उद्देश्यस्यैव संस्कार्यत्वात् । एवं स्वाध्यायार्थस्य प्रयोजनवत्त्वसिद्धौ अध्ययनविधिरूपतात्पर्यग्राहकसत्त्वात् अर्थवादेषु लक्षणा सिद्ध्यति । तत्र लक्ष्योऽर्थः क इत्यपेक्षायामुच्यते —

विधिप्रतिषेधाभ्यां क्रमेण प्रवृत्तिनिवृत्ती क्रियेते । स्तुतिनिन्दयोर्ज्ञानस्य लोके रुच्यरुच्युत्पादनद्वारा प्रवृत्तिनिवृत्तिप्रयोजकसहकारित्वं प्रसिद्धम् । स्तुतिः बलवदनिष्टाननुबन्धित्वं, निन्दा बलवद-निष्टानुबन्धित्वम् । बलवदनिष्टाननुबन्धित्वतदनुबन्धित्वयोः विधिनिषेधाभ्यां यथाक्रमं प्रवृत्तिनिवृत्त्यर्थम-पेक्षितत्वेन समभिव्याहृतार्थवादैः लक्षणया स्तुतिनिन्दे प्रतिपाद्येते इति ।

अथ कोऽत्र (विधिवाक्ये) प्रवर्त्तकः? नह्यत्र कश्चन प्रवर्तकः पुरुषः उच्यत इति चेदुच्यते- लिङादिविधिवाचकशब्दानां लोके पुरुषनिष्ठोऽभिप्रायः अर्थः । लिङादिघटितवाक्यश्रवणेन प्रवृत्त्युदयात् लिङर्थज्ञानं प्रवृत्तिं जनयतीति निश्चीयते । लोके आचार्येण 'गामानये'त्युक्ते शिष्यः गवानयन-विषयकमाचार्याभिप्रायं ज्ञात्वा गवानयने प्रवर्तते । अतः वक्तुरभिप्रायः लिङर्थः । वेदे तु पुरुषाभावात् लिङादिशब्दनिष्ठ एव कश्चिद्धर्मः [1]प्रवृत्तिप्रयोजकज्ञानविषयः, स एव च लिङर्थः। तत्र वाच्यतावच्छेदकं पुरुषाशयवैदिकलिङाद्युभयमात्रसाधारणं व्यापारविशेषत्वम् । व्यापारस्य प्रवृत्तिनिवृत्तिप्रयोजकत्वम् अन्यलभ्यत्वान्न वाच्यतावच्छेदकान्तर्भूतम् । प्रवृत्तिस्तु आख्यातेनैवाभिधीयते । तस्याः लिङादिनिष्ठधर्मविशेष-रूपायां शब्दीभावनायां स्वप्रयोजकत्वं संसर्गः । नञ्सभिव्याहारे स्वप्रतियोगिकाभावप्रयोजकत्वं संसर्गः ।

ननु आख्यातार्थस्य लिङर्थे स्वप्रयोजकत्वं संसर्ग इत्यनुपपन्नम् । प्रवृत्तिप्रयोजकं नाम साक्षात् परम्परया वा प्रवृत्तिहेतुभूतम् । प्रवृत्तिसामान्यं प्रति इष्टसाधनत्वज्ञानं कारणम्, इष्टसाधनत्वज्ञाने च पुरुषाभिप्रायज्ञानं शाब्दधर्मविशेषज्ञानं वा, न तु तद्विषयीभूतः अभिप्रायः धर्मविशेषो वेति लिङर्थज्ञानस्यैव प्रवृत्तिप्रयोजकत्वादिति चेन्न । अत्र प्रयोजकत्वस्य प्रवृत्तितदभावकारणीभूतेष्टानिष्टसाधनता-ज्ञानजनकज्ञानविषयत्वरूपत्वात् । तच्च विद्यत एव अभिप्रायरूपस्य शाब्दधर्मात्मकस्य च लिङर्थस्य । अत्रानिष्टसाधनताज्ञाने यत् प्रवृत्त्यभावकारणत्वं, तत् योगक्षेमसाधारणम् । अर्थात् कलञ्जभक्षणस्य अनिष्टसाधनत्वज्ञानं कलञ्जभक्षणं कुर्वतः पुरुषस्य कलञ्जभक्षणविषयकप्रवृत्त्यभावस्य योगे (उत्पत्तौ), अकुर्वतश्च तत्क्षेमे (स्थितौ) कारणम् ।

प्रवर्त्तनानिवर्तने एव शाब्दीभावनेति व्यवह्रियेते । प्रवर्तनायाः प्रवृत्तिः, निवर्तनायाश्च तदभावो भाव्यम् । भावनाज्ञानं करणम् । न च शब्दनिष्ठविजातीयधर्मरूपप्रवर्तनानिवर्त्तनयोर्भावना-पदवाच्ययोः वैदिकलिङि

---

१. निषेधवाक्ये निवृत्तिप्रयोजकज्ञानविषयः ।

अनादित्वेन कार्यत्वस्यैवाभावेन कथं तज्ज्ञानस्य ते प्रति करणत्वम्? किञ्चाङ्गीकृतेऽपि कार्यत्वे स्वं प्रति स्वज्ञानस्य कथञ्चिदपि करणत्वासम्भवात् भावनां प्रति भावनाज्ञानस्य करणत्वमयुक्तमिति वाच्यम्। अत्र भावनाभाव्यनिष्पादकस्य करणपदेन व्यवहारात्। अस्ति च लिङर्थभूतशाब्दीभावनाज्ञानस्य भावनाभाव्यप्रवृत्तिनिष्पादकत्वम्। अर्थवादप्रतिपाद्यस्तुतिनिन्दे प्राशस्त्याप्राशस्त्यापरपर्याये यथायोगं प्रवर्तनानिवर्तनेतिकर्त्तव्यते। तथा च 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति वाक्यात् स्वर्गभाव्यका अग्निहोत्रहोमकरणिका यत्किञ्चिदितिकर्त्तव्यताका लिङर्थज्ञानकरणका'ग्निहोत्रं जुहोति यदेव किञ्च यजमास्ये'त्याद्यर्थवाद-प्रतिपाद्यप्राशस्त्येतिकर्तव्यताकशाब्दभावनाप्रयोज्या प्रवृत्तिः बुद्ध्यते। 'न कलञ्जं भक्षये'दिति वाक्याच्च यत्किञ्चिदनिष्टभाव्यका कलञ्जभक्षणकरणिका निवर्तनाख्य-शाब्दभावनाप्रयोज्याभावप्रतियोगिनी प्रवृत्तिर्बुद्ध्यते। तथा च भावनान्वितप्राशस्त्याप्राशस्त्यप्रतिपादकत्वेन विधिवाक्यैकवाक्यतया अर्थवादानां धर्माधर्मयोः प्रामाण्यम् सिद्धम्।

(प्रयोजनम्)

पूर्वपक्षे तु अर्थवादैः प्राशस्त्याप्रशस्त्ययोरप्रतिपादनात् यथाकथञ्चिदुपस्थितप्राशस्त्यज्ञानात्प्रवृत्तावपि फलसिद्धिः। सिद्धान्ते तु अर्थवादैर्लक्षणया प्रतिपादितस्तुतिनिन्दयोः शाब्दीभावनायामन्वयात् अर्थवादोपस्थितप्राशस्त्यज्ञानेन प्रवृत्तावेव फलसिद्धिः। स्तुतिनिन्देतिकर्तव्यताकशाब्दीभावनाभाव्याया एव प्रवृत्तेः स्वर्गभाव्यकत्वात्।

लोपार्थविमर्शः

प्रो.श्रीबालशास्त्री
आचार्यः व्याकरणविभागे
का.हि.वि.वि.

ननु तस्य लोपः 1/3/9, लोपो व्योर्वलि 6/1/66 इत्यादिविधिसूत्रेषु लोपपदस्य कोर्थः। अदर्शनं लोपः 1/1/60 इति संज्ञासूत्रानुरोधेन अदर्शनमेव तदर्थ इति ब्रूते चेत् तर्हि राजश्वशुराद्यत् 4/1/137 अग्नेर्ढक् 4/2/33 इत्यादाविव अत्रापि अकारोत्तरदकारोत्तराकारोत्तरेफोत्तरशकारोत्तराकारोत्तरनकारोत्तरात्वरूपस्वानुपूर्व्या एव अदर्शनशब्देन बोधे, तस्यैव लोपसंज्ञित्वे तत्तल्लोपविधिप्रदेशेषु 'अदर्शन' इति शब्दस्वरूपस्यैवादेशतापतेः।

नच तस्यापत्यम् 4/1/92 सास्य देवता 4/2/24 इत्यादौ अपत्यदेवतादिशब्दवददर्शनशब्दोऽपि दर्शनप्रतियोगिकाभावरूपस्वीयार्थबोधक एव न तु स्वरूपबोधक इति न कापि विप्रतिपत्तिरिति वाच्यम्। पश्वपत्यदेवतादिपदानां स्वरूपपरत्वे तदाश्रित्य कार्याप्रसक्त्या सूत्राणां वैयर्थ्येन तत्सामर्थ्यात्तेषां पश्वादिशब्दानामर्थपरत्वेऽपि 'स्वंरूपं' शब्दस्याशब्दसंज्ञा 1/1/67 इति सूत्रे जाग्रति अदर्शनशब्दस्यार्थपरत्वासंभवादिति चेन्न।

लोपनं लोपः, छेदनार्थकाल् लुप्धातोर्भावे घञि सति निष्पन्नेन लोपक्रियारूपार्थकलोपशब्देन संज्ञाभूतेन लोपनरूपार्थाभिन्नस्य 'अदर्शन' इत्यर्थस्यैव संज्ञित्वं नतु 'अदर्शन' इति शब्दस्वरूपस्येति 'लोप' इति महासंज्ञाकरणेनान्वर्थत्वविज्ञानाद् अदर्शनशब्दस्य अर्थपरत्वे बाधकाभावात्। लुप्धातोश्छेदनार्थत्वेन 'लोप' इत्यस्य 'छेद' एवार्थः स्यान्नतु दर्शनप्रतियोगिकोऽभाव इति संज्ञा–सज्ञिनोर्भिन्नार्थतया 'लोप' इति संज्ञाया अन्वर्थत्वविज्ञानेनापि नेष्टसिद्धिरिति मन्यसे चेत्, दृष्टार्थपरतासम्पादनशक्तेः नवेति विभाषा 1/1/44 इति सूत्रस्थेतिशब्दस्यात्रानुवृत्या 'अदर्शन' इति शब्दस्य योर्थः दर्शननिष्ठप्रतियोगितानिरूपकोऽभावः स लोपसंज्ञक इत्येवम् अदर्शनशब्दस्यार्थपरतायाः सुलभत्वात्।

न च सुदूरं विच्छिन्नस्य 'इति' इति शब्दस्यानुवृत्तौ मानाभावः। निपात एकाजनाङ् 1/1/14, अदः सर्वेषाम् 7/3/100, दीर्घादाचार्याणाम् 8/4/52 इत्यादिसूत्रनिर्देशैः[1] तस्य 'इति' शब्दस्यात्र मण्डूकप्लुत्यानुवृत्तिसंभवात्। स्वंरूपम्

1/1/67 इति सूत्रस्य भाष्यसम्मतप्रत्याख्यानपक्षें तु अर्थबोधनायैव शब्दप्रयोग इति सिद्धान्तादर्शन– शब्दस्यार्थपरत्वे बाधकाभावात्, यत्रार्थे कार्यस्य बाधस्तत्रैव शब्दस्य स्वरूपपरत्वमिति निर्धारणाच्च अर्थस्यैवैषा संज्ञा, न तु शब्दस्य इत्यभियुक्तोक्तौ सन्देहलेशानवकाशात्।

नचैवम् अदर्शनशब्दस्यार्थपरत्वे अदर्शनं लोपः 1/1/60 इति सूत्रस्य कीदृशः शाब्दबोध इति चेत्, :– दृष्टिः = दर्शनम्। दृश्धातोर्भावे ल्युट्। न दर्शनम् = अदर्शनम्, नञतत्पुरुषः दर्शनम् = ज्ञानम् इति ज्ञानस्य सविषयकत्वात् किं विषयकं ज्ञानमित्याकांक्षायाम् शब्दानुशासनप्रस्तावात् शब्दविषयकमिति लभ्यते। शब्दस्य च चक्षुरिन्द्रियजन्यज्ञानविषयत्वा संभवादत्र दृश्धातुर्ज्ञानसामान्यार्थक इति योग्यताबलात्श्रावणप्रत्यक्षरूपं ज्ञानमत्र दृश्धात्वर्थ इति निश्चीयते। तत्र दृश्धात्वर्थे शब्दस्य कर्मतया अन्वयः। कर्मता च विषयतारूपा। तादृशज्ञानस्य च नञर्थे अभावे स्वनिष्ठप्रतियोगितानिरूपकत्वेनान्वयः। तथा च 'शब्दनिष्ठकर्मत्वाख्यविषयतानिरूपित–विषयितावच्छ्रावणप्रत्यक्षवृत्तिप्रतियोगितानिरूपकोऽभावो लोपपदजन्यबोधीयविषयता–श्रयो भवतु' इति गृहाण।

न च शब्दविषयकश्रावणप्रत्यक्षप्रतियोगिकाभावस्य लोपपदार्थत्वे 'लोपो व्योर्वलि 6/1/1/166 इति सूत्रस्य वल्परक–यकार–वकार–विषयक–श्रावणप्रत्यक्ष–प्रतियोगिकोऽभावो भवतु इत्यर्थेन पचेरन्, जीरदानुः इत्यादौ यकारवकारयोः सूत्रानुरोध ेन श्रावणप्रत्यक्षाभावेऽपि तयोरूच्चारणं तु स्यादेव, सूत्रेणोच्चारणस्यानिषिद्धत्वात्। किं च सामग्रीसत्वेऽवश्यं कार्यमिति सिद्धान्ताद्, विषयभानप्रयोजकसामग्रीसन्निध ाने तज्ज्ञानं न जायतमितीच्छायामपि तज्ज्ञानोत्पतेरनुभवसिद्धत्वाच्च श्रावणप्रत्यक्ष–सामग्रीभूताया उच्चारणक्रियायाः सत्वेन तत्प्रयोज्यस्य श्रावणप्रत्यक्षस्यापि यवयोरापत्तिरिति वाच्यम्।

तत्तल्लोपविधिसूत्रवैयर्थ्यापनोदाय तेषां विधिसूत्राणां श्रावणप्रत्यक्षसामग्रीभूताया उच्चारणक्रियायाः प्रतिरोधे एव तात्पर्यावधारणात्, किं वा प्रत्ययानुबन्धादिवर्णसत्वे तत्कर्मकोच्चारणस्यापि कदाचिदापत्तौ विरामोऽवसानम् 1/4/110 इतिसूत्रोक्त 'अभावो लोप' इति भाष्यानुसारम् अनुबन्धप्रत्ययादिप्रतियोगिकोऽभाव एव लोपपदार्थ इति स्वीकारेणादोषात्। अदर्शनशब्दो लक्षणया अभावरूपार्थबोधक इति तदभिप्रायात्।

नन्वेवम् अभावस्य लोपत्वे नौकाधिकरणिका शयनक्रिया इत्यर्थके नौकायां शेते इति वाक्ये ल्यपोऽदर्शनेन लोपसंज्ञापत्तौ 'आसनात्प्रेक्षते' इतिवदत्रापि 'ल्यब्लोपे कर्मण्यधिकरणे च' इति वार्त्तिकेन नौकाशब्दात् पंचम्यापत्तिः स्यात्। न च उक्तवार्त्तिकस्य 'ल्यबन्ततदादिकर्मकोच्चारणाभावे सति ल्यप्प्रत्ययप्रकृतिभूतधातूपस्था–पितक्रियानिरूपितानुक्तकर्मत्वाधिकरणत्वान्यतरावच्छिन्नवाचकात्प्रातिपदिकात्पंचमी–विभक्तिः साध्वी 'इत्यर्थसत्वेन नौकारूपपदार्थे शयनक्रियानिरूपिताधिकरणत्व'सत्वेऽपि ल्यप्प्रत्यप्रकृतिकयत्किंचिद्धातूपस्थापितक्रियानिरूपिताधिकरणत्वस्य सर्वथाऽभावान्न

तद्वाचकनौकापदात्पंचम्या आपत्तिः तत्र उपविश्येत्यादि ल्यबन्तार्थनिरूपिताधिकरणत्वस्वीकारे तु पंचमीष्टैवेति वाच्यम्। दधि मधु इत्यादौ प्रत्ययस्याणोऽभावेन लोपसंज्ञापत्तौ प्रत्ययलक्षणेन अचोंणिति 7/2/115 इत्यनेन वृद्धयापत्तेर्दुर्वारत्वात्। यदि च यस्मात्प्रत्ययविधिः 1/3/13 इति अङ्गसंज्ञासूत्रे प्रत्यासत्या उभयोरपि प्रत्ययपदार्थयोरैक्यमाश्रित्य यस्माद्यस्य प्रत्ययस्य विधिः, तस्मिन्नेव प्रत्यये परे तदेवाङ्गसंज्ञमित्यर्थेन, अचोंणिति इत्यनेन च ञित्–णित्प्रत्ययनिरूपिताङ्गत्ववत एव वृद्धिविधानेन नात्र वृद्धेः प्रसंगः, दधि मधु इत्यनयोर्णित्प्रत्ययनिरूपिताङ्गत्वाभावादिति समाधत्से, तर्हि एतयोः क्विप्प्रत्ययस्यादर्शनेन प्रत्ययलक्षणेन ह्रस्वस्य पिति कृति तुक् 6/1/71 इत्यनेनानाङ्ग कार्यस्य तुक आपादनस्य दुर्वारत्वात्। पित्कृत्प्रत्ययाभ्यां प्रकृतेराक्षेपेण प्रत्यासत्या पित्प्रत्ययनिरूपितप्रकृतित्ववत एव पिन्निमित्तकः तुक् इत्यर्थेन नात्र तुगागमस्यापि संभावनेति समाधानं तु नोचितम्। वृत्त्या अनुपस्थितस्य आक्षिप्तपदार्थस्य शाब्दबोधे भाने मानाभावात्।

किं च ह्रस्वस्य पितीति सूत्रे प्रकृतेराक्षेपं विनापि अग्निचित्, सोमसुत् इत्यादौ क्विप्च 3/2/76 इत्यनेन क्विबुत्पतौ बाधकाभावेन, अत्र सूत्रे प्रकृतेराक्षेपेऽपि अग्निचित् इत्यादावनेन ह्रस्वस्यपितीति सूत्रेण क्विबुत्पतेरसंभावाच्च नात्र पित्कृत्प्रत्ययाभ्यां प्रकृतेराक्षेपसंभावना। अनुपपद्यमान एवार्थः स्वोपपादकमाक्षेप्तुं प्रभवति, यथा अनुपपन्नं पीनत्वं रात्रिभोजनम्। प्रकृते तु प्रत्ययस्य क्विपोऽनुपपद्यमानत्वाभावेन प्रकृतेराक्षेपस्य तेन कर्त्तुमशक्यत्वात्। अत्रैव प्रकृतिं विना प्रत्ययलक्षणेन प्रत्ययज्ञानसत्वेन व्यभिचारात्तदाक्षेपासंभवात्। एतेन वृत्त्यनुपस्थितस्यापि आक्षिप्तपदार्थस्य व्युत्पत्तिवैचित्र्येण शाब्दबोधे भाने बाधकाभावेन नात्र दधि मधु इत्यादौ तुगापत्तिरिति व्याहरन्तः परास्ताः, उक्तरीत्या क्विपोऽनुपपद्यमानत्वाभावेन प्रकृतेराक्षेपासंभवात्।

न च है कतरद् इत्यत्र सम्बुद्ध्यवयवदकारस्य लोपाभावाय, हे कुल इत्यत्र सम्बुध्यवयवमकारस्य लोपार्थं च प्रत्ययग्रहणपरिभाषया तदादेरुपस्थित्या एङन्तह्रस्वान्ततदादेः परो हल्लुप्यते सम्बुद्धेश्चेदित्यर्थ एङ्ह्रस्वात् 6/1/69 इत्यस्य सम्पादितः। तदुक्तं भट्टोजिदीक्षितैः, 'सम्बुध्याक्षिप्तस्य एङ्ह्रस्वाभ्यां विशेषणान्नेह हैकतरत् कुलेति', तद्वदत्रापि प्रत्ययग्रहणपरिभाषया तदादेरुपस्थितौ पित्कृन्निरूपिततदादित्ववतो ह्रस्वान्तस्य लुगित्यर्थे सति दधि मधु इत्यादौ क्विब्निरूपिततदादित्वाभावान्न लुकः प्राप्तिरिति वाच्यम्। अग्निचिद्दधि, सोमसुन्मधु इत्यांदौ चिनोतेः सुनोतेश्च प्राप्तस्य क्विपोऽदर्शनस्य तु चिनोतिसुनोतिभ्यामग्र इव दधि–मधुशब्दाभ्यामग्रेपि सत्वेन तस्यापि लोपसंज्ञायां प्रत्ययलक्षणेन दधि–मधुभ्यामग्रेपि क्विपबुद्धिसत्वेन, तदबुध्यवधित्वस्य चिनोति–सुनोत्यादावविवादात्, तदादित्वस्य (=तत् क्विप्प्रकृतिभूतं शब्दस्वरूपम् चित् इति, सुत् इति, (क्विप् च 3/3/76 इत्यनेन धातोरेव क्विपो विधानेनात्र 'चि' 'सु' इति धातुमात्रमेव प्रकृतिः क्विपो, न तु

अग्निचि 'सोमसु' इति। यदागमयायेन 'चित्' 'सुत्' तुगन्तेऽपि क्विपः प्रकृतित्वम्) आदिर्यस्य एवं भूतः शब्दसमुदायः चिद्दधि इति सुन्मधु इति) दधिशब्दान्ते मधुशब्दान्तेऽपि सत्वात् तुगापत्तेर्वर्तमानत्वादिति चेन्न। कृदतिङ् 3/1/93 इतिसूत्रस्थभाष्यानुसारं धात्वादेः षः सः 6/1/64 इतिसूत्राद्धातोरित्यनुवर्त्य ह्रस्वान्तस्य धातोस्तुक् पिति कृतीत्यर्थनिष्पादनेनादोषात्। दधिमधुशब्दयोर्धातुत्वा-योगात्। तथा च तत्र भाष्यम्, (सूत्रे अतिङ् इति पदाभावे तिङोऽपि कृत्संज्ञापत्तौ तिपः पित्वेन कृत्वेन च) 'एवं तर्हि पचति पठतीति ह्रस्वस्य पिति कृति 6/1/71 तुग् भवतीति तुक् प्राप्नोति। धातोरिति वर्तते (धात्वादेः 6/1/64 इत्यतः इति कैयटः) एवमपि चिकीर्ष इत्यस्य ह्रस्वान्तत्वधातुत्वयोश्चिकीर्षतीत्यत्र प्राप्नोति। अत्रापि शपा व्यवधानम् इति।

न चैवं सोमसुतः पुत्रमात्मन इच्छति सोमसुत्पुत्रीयतीत्यत्र पुत्रीयस्य सनाद्यन्ताः 3/1/32 इति धातुत्वे तत्र क्विपोऽदर्शनेन लोपसंज्ञायां प्रत्ययलक्षणेन तुगापत्तिरूपो दोषो भवत्येवेति वाच्यम्। प्रसंगे सति इत्यर्थकं स्थानेऽन्तरतमः 1/1/49 इतिसूत्रस्थं 'स्थाने' इति पदमनुवर्त्य प्रसंगे सति यददर्शनम्, अर्थात् शास्त्रतोऽर्थतश्त प्रसक्तस्य यददर्शनं तल्लोपसज्ञं भवतु इत्यर्थाश्रयेण सकलदोषपरिहारसत्वात्। उक्तेषु दधि मधु सोमसुन्मधु सोमसुत्पुत्रीयतीत्यादिषु क्विपः शास्त्रतोऽर्थतश्च वा प्रसक्तेरभावेन लोपसंज्ञाया अभावात्।

तत्र शास्त्रतः प्रसक्तेरुदाहरणं वारि राजेति। अत्र सुविभक्तेः स्वौजसमौट् 4/1/2 इत्यनेन प्रसक्तिः। अर्थतः प्रसक्तेरुदाहरणं श्वशुराज्जिह्वेतीति। अत्र वीक्ष्येति पदस्यार्थतः प्रसक्तिः। अत्र प्रसक्तस्य ज्ञानसामान्याभावो लोप इति फलितोऽर्थः। तथा च कस्मात्त्वं, नद्याः इतिवदध्याहारप्रसंगे श्वशुरं जिह्वेतीत्यत्र 'ल्यब्लोपे' इति वार्तिकेन न पञ्चमी अध्याहारेण ब्रूते इति ज्ञानसत्वेन ल्यबन्तपदविषयक-सामान्यज्ञानाभावाभावात्।

प्रसक्तिश्चात्र बाधकेन अबाधितैव ग्राह्या। तेन ग्रामणीः इत्यत्र ग्रामं नयतीति विग्रहे कर्मण्यण् 3/2/1 इत्यनेन प्रसक्तस्याण्प्रत्ययस्य सत्सूद्विषद्रुह 3/2/69 इति विहितेन क्विपा बाधात्प्रत्ययलक्षणेन णित्प्रत्ययनिमित्ताया वृद्धेर्नापत्तिः।

एतेन (दधि, मधु, सोमसुत्पुत्रीयति, इत्यादौ तुगाद्यापत्तिवारणाय 'स्थानं' इत्यनुवृत्य 'शास्त्रतोऽर्थतश्च प्रसक्तसय यददर्शनं तल्लोपसज्ञं भवतु' इत्यर्थसम्पादनार्थम् अदर्शनं लोपः 1/1/60 इति संज्ञासूत्रस्यावश्यकत्वेन) लोपो व्योर्वलि 6/1/66 इत्यादिविधि– सूत्रेष्वेव, पश्वपत्यदैवतादिशब्दानां लौकिकार्थग्रहणवल्लोपशब्दस्यापि अभावरूप– लौकिकार्थग्रहणेन सकलेष्टसिद्धेः अदर्शनं लोपः 1/1/60 इति लोपसंज्ञाविधायकं सूत्रं व्यर्थमेवेत्यपास्तम्। लोपसंज्ञाविधायकसूत्राभावे तुगाद्या-पत्तेर्वारयितुमशक्यत्वात्।

नन्वेवं शब्दविषयकश्रावणप्रत्यक्षप्रतियोगिकस्य, किंवा श्रावणप्रत्यक्षकारणीभूत–

शब्दकर्मकोच्चारणप्रतियोगिकस्य अथवा शब्दप्रतियोगिकस्य वा अभावस्यैव लोपपदार्थत्वे अण्–अक्–अच्–आदिप्रत्याहारार्थं माहेश्वरचतुर्दशसूत्रान्त्यवर्णत्वेन निबद्धानां ण्–क्–च् इत्याद्यनुबन्धानां हि अणो प्रगृह्यस्य 8/4/27 , अकः सवर्णे 6/1/101, अचो यत् 3/1/197 इत्यादिसूत्रेषु श्रवणं, उच्चारणं सत्ता वा कथं नाम प्रामाण्यं भजेत इत्याशंकाकलंककलुषीकृतचेताश्चेद् भवसि, तर्हि पूर्वोक्तसूत्रनिर्देशसामर्थ्याच्छाब्दबोधविषयताप्रतियोगिकोऽप्यभावो लक्षणया अदर्शन–शब्दार्थत्वेन लोपपदार्थ इति जानीहि। एते अनुबन्धा उच्चारणकर्मतामावहन्तोऽपि शाब्दबोधीयविषयताश्रया न भवन्ति। तदुक्तम् भट्टनागशैः अनुबन्धाः प्रत्याहारपदजन्य–बोधीयविषयत्वाभाववन्तः, तस्य लोप 1/3/9 इति शास्त्रीयोद्देश्यता–वच्छेदकाक्रान्तत्वादिति।

तथा च 'शास्त्र–लोक इत्येतदन्यतरप्रयोज्यप्रसक्तिनिष्ठकर्मतानिरूपको–च्चारणत्व, शाब्दबोधीयविषयतात्व एतदन्यतरावच्छिन्नप्रतियोगिताकोऽभावो लोपपदप्रयोज्यबोधीयविषयताश्रयो भवतु' इति लोपसंज्ञाविधायकसूत्रस्य प्रामाणिकोर्थः सम्पद्यते।

एतेन अण् अक् अच् इत्यादौ ण्क्चादीनामित्संज्ञकत्वे तेषां लोपः कुतो नेति शंका समाहिता। शाब्दबोधीयविषयत्वाभावस्यापि लोपत्वेन लोपस्यात्र विद्यमानत्वादिति शम्।

साहित्यप्रस्तावे शब्दनिरूपणम्

प्रो. चन्द्रमौलिद्विवेदी
अध्यक्षः – साहित्यविभागः
का.हि.वि.वि.

अपृथक्शब्दनिर्वर्त्यमविनाभावसंश्रयम्।
वागर्थमिश्रमेकं तत् साहित्यं वपुरैश्वरम्।।

यत्साङ्गुलीयकपदाङ्गुलिद्वादशात्मध्यातप्रभामुषितमोहतमस्सु नित्यं।
चेतस्स्वयत्यमलसम्पदुदारभावो वाचां नुमोऽङ्घ्रियुगलं हि तदम्बिकायाः।।
वाग्देवतासु लसितान्तर्भक्तिभाजां सत्वात्मनाममलधर्ममयं स्मृतं यत्।
सर्वात्मनाभ्युदयसम्पत्शालि लोके काव्यं तदस्य प्रविवेकमुपाश्रयामः।।

(स्वस्यैव)

किं नाम काव्यम्। यदाश्रयणेन विद्वांसो जना नानाविधैहिकामुष्मिकप्रयोजनानि साधयितुं प्रभवन्ति। तत्र

काव्यं नाम साहित्यम् इति ब्रूमः। साहित्यं तु शब्दार्थयोरित्यनुक्तमपि गतार्थं भवति। न गतार्थयितुं शक्यते यतोहि सहार्थेऽपि साहित्यं रूढमिति चेत् ? नास्ति क्षतिः तत्तु रूढं, इदं तु लक्षणात्मकम् अतः एतत् तद्भिन्नमित्यवधातव्यम्। यतोहि नहि काव्ये प्रयुक्तः साहित्यपदार्थः सहार्थे प्रतिभाति, यतोहि शब्दार्थौ सहितौ काव्यम्'' इति यद् भामहेनोक्तं तन्न सहार्थे वक्तुं युक्तं पौनरुक्त्यभयात्। द्वन्द्वेनैव शब्दार्थयोस्तुल्य– प्राधान्यतः सहभावोऽभिहितः पुनः सहितोक्तिर्व्यर्था। चेत् सहितौ मिश्रितौ शब्दार्थौ काव्यमिति वक्तुमीहा तर्हि शब्दार्थौ काव्यम् इत्येव वाग्भटालङ्कारवत् वक्तुं युक्तम् न तु 'सहितौ' इत्यादि। अतोऽवश्यमेव 'सहितौ' पदं किमपि गम्भीरार्थतत्वपरम्, यन्मूलं साहित्यपदं प्रसृतं प्रतिभाति। संस्कृत पदानामन्यभाषोक्तपदेभ्य इदमेव वैलक्षण्यं यत् सर्वमपि स्वकीयार्थगौरवं स्वस्मिन् स्वल्पेऽपि वपुषि सन्निविष्टं व्यनक्ति।

''साहित्यपदं'' त्र्यवयवकं, दृश्यते तत्र धाधातोः क्तप्रत्ययेन निष्पन्नं हितपदं, सपदं, ष्यञ्प्रत्ययंचेति। हितमेवाभिहितम्। विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्लोपे सति हितपदमभिहितपदवाचकं भवति। अभिहितपदं वाच्यार्थे प्रसिद्धम्। इदं अभिहितपदं

सापेक्षद्रव्यात्मकमस्ति। यथा गुरुः, पिता, पुत्र इत्यादि सापेक्षं द्रव्यमुच्यते। अतः अभिहितपदं अभिधायकमपेक्षते, अभिधायकंचाभिधेति, त्रयाणां संग्रहोऽभिहितशब्देनैव भवति। हितेन सहवर्तते इति सहितः, लक्ष्यव्यङ्यादयः। ष्यञ्पदेन यथेष्टं वाच्यवाचकादीनां सम्बन्धादि गृह्यते। इत्थं एकमेव साहित्यशब्दः काव्यशास्त्रा–विच्छिन्नपरम्पराकः काव्यं लक्षयन्ननुभवपथमायाति अतः मयोच्यते साहित्यमेव काव्यमिति। साहित्यं काव्यस्य सामान्यलक्षणम् ।

काव्यपदमपि सर्व स्वार्थं स्वस्मिन्नावहति। 'कु शब्दे' इति धातुः, कर्मणि ण्यत्प्रत्ययश्च कवेर्भावे ष्यञ्प्रत्ययश्च सर्वार्थमभिदधते। शब्दः न वर्णात्मकः, अपितु ताल्वाद्यभिघातद्वारा वर्णाभिव्यक्तः कश्चनार्थप्रत्यायकरूप एव गृह्यते न वर्णेनार्थो वाच्यः प्रत्याय्यते। अतः येनोच्चारितेनार्थप्रत्ययो भवति स शब्दः इति निरूपितम्। इत्थमुच्चरितवर्णाभिव्यक्तः शब्दो वा स्फोटोवा कुधातुना ग्रहीतुं युक्तः। अर्थप्रत्यायकत्वेन शब्दादर्थः कर्मात्मना भावात्मना वा सम्बन्धः स्वयमेवाक्षिप्यते, सापेक्षत्वात्।

तत्र शब्दार्थयोःसाहित्यम् काव्यमिति पर्यवसिते सति के शब्दाः के अर्थाः किञ्च साहित्यमिति विचार आवश्यकः। तत्रादौ शब्दो द्वादशधा श्रूयते

प्रकृतिः प्रत्यय उपस्कार उपपदम् प्रातिपदिकं विभक्तिः उपसर्जनं समासः पदं वाक्यं प्रकरणं प्रबन्ध इति।

प्रत्ययात्प्रथममुपादीयते या, सा प्रकृतिः। धातु–प्रत्यय प्रातिपदिकरूपत्वेन त्रिधा। तत्र पठितापठितोभयात्म–प्रत्यय–नामोभयात्मभेदेभ्यो धातुः षोढा।

पठितः, भूवादयः, अपठितः, आन्दोलयत्यादयः, उभयात्मक, "अनुस्कुनुहि" इत्यादयः। सूत्रमात्रपठितत्वाद्गणेष्वपठितत्वादुभयात्मकत्वमस्य। प्रत्ययरूपः सनाद्यन्तः, नामरूपः कड्वादयः तथा नामप्रत्ययोभयात्मकस्तु होडगल्भक्लीबादयः। तथा च, आख्यानात् कृतस्तदाचष्टे इति णिच् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्चकारकम् " इति बलात् कंस– वधमाचष्टेइति कंसँघातयति" एवमेव "आङ्लोपे कालात्यन्तसंयोगे मर्यादायाम्" इति बलात् "आरात्रि विवासमाचष्टे रात्रिंविवासयति" "नक्षत्रयोगेज्ञि" इति बलात् "पुष्पचन्द्रयोगं जांनाति पुष्येण चन्द्रं योजयति" 'चित्रीकरणे प्रापि" इति बलाद् "उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योदगमं प्राप्नोति, माहिष्मत्यां सूर्यमुदगमयति इत्यादौ उभयात्मको नामप्रत्ययात्मको धातुर्द्रष्टव्यः।

प्रत्ययरूपा प्रकृतिरपि सुप्तिङ्कृत्तद्धितधातुप्रत्ययस्त्रीप्रत्ययभेदेभ्यः षोढा मन्तव्या। सुप्रूपा – आमुष्यायण इत्यादयः तिङ्रूपा= पचतितरां जिघ्रतिदेश्य–मित्यादयः, कृद्रूपा– कृत्रिमम् इत्यादयः, तद्धितरूपा–गार्ग्यायणः कौंजायन्यइत्यादयः, धातुप्रत्ययान्ता – चिकीर्षाकण्डूया इत्यादयः स्त्रीप्रत्ययान्ता – गाङ्गेय इत्यादयः।

प्रातिपदिकरूपा प्रकृतिरपि नामाव्ययानुकरणकृतद्धितसमासभेदेन षोढा। नामानि तु अनपेक्षितव्याकृतीनि सत्वभूतार्थामिघायीनि। द्विधा चेमानि आविष्टलिङ्गानि

अनाविष्टलिङ्गानि। जातिद्रव्यपरिमाणाभिधायीनि आविष्टलिङ्गानि। यथा, आकृतिव्यङ्यायां जातौ =गौ पक्षी इत्यादयः उपदेशव्यङ्यायां तु ब्राह्मणः गार्ग्यः। सापेक्षद्रव्ये गुरूः पितः निरपेक्षद्रव्ये चैत्रश्चन्द्रः, नियतपरिमाणे, द्रोणः खारी इत्यादयः, अनियतपरिमाणे संघः 'पूगः' इत्यादयः गृह्यन्ते। अनाविष्टलिङ्गानि तु "गुणसंख्या सर्वनामानि। तेषु अनुरंजकगुणेषु, श्वेतः स्वाद्वुः शीघ्र इत्यादयः अननुरंजकगुणेषु दक्षः जिह्म इत्यादयः गृहयन्ते।

लिङ्गवतीसंख्यायां एकः एका एकम् इत्यादयः, अलिङ्गावती संख्यायाम् पञ्च षड् अष्टौ दशादयः गृह्यन्ते। सर्वादिसर्वनामसु – सर्वविश्वादयः, असर्वादिसर्वनामसु प्रथमचरमादयः, सन्ति।

अव्ययादिः –

प्रायेणालिङ्गसंख्याशक्तिकमव्ययम्। तच्च अव्ययनिपातगत्युपसर्ग कर्मप्रवचनी–यविभक्तिप्रतिरूपभेदात् षोढा भवति। अव्ययं सत्वासत्वलेशाभ्यां द्विधा। द्रव्यगुणक्रिया जातिसंज्ञासम्बन्धिशक्तिकत्वेन सत्वलेशः षोढा।

तत्र द्रव्यरूपं स्वः दिवः आदयः, गुणरूपं–शश्वत् साचि सामि मनाक् इत्यादयः क्रियारूपम् नमः स्वस्ति स्वाहा इत्यादयः, जातिरूपं – सायं प्रातः अस्तं नक्तम्, इत्यादयः संज्ञारूपम् – क्विप् सः ओम् इत्यादयः, सम्बन्धिरूपम् – अन्तरा ऊर्ध्वं बहिः इत्यादयः।

असत्वलेशोऽपि क्रियापेक्षं, क्रियाद्रव्यापेक्षं क्रियाविशेषणं क्रियाद्रव्यविशेषणम् क्रियाविष्टरूपं क्रियाद्रव्याविष्टरूपं च षड्विधं भवति। तत्र क्रियापेक्षम् – द्वन्द्वं यथायथम् इत्यादिः, क्रियाद्रव्यापेक्षम्– साकं सार्ध सहादयः, क्रियाविशेषणम्– आभीक्ष्णं मुहुः पुनःइत्यादयः, क्रियाद्रव्यविशेषणम् – अलं सुष्ठु मृषा वृथादयः, क्रियाविष्टरूपं – शश्वत् सपदि सम्प्रति, क्रियाद्रव्याविष्टरूपं तु आविः प्रादुः तिरः, आदयः सन्ति।

निपाताः –

असत्वभूतार्थाभिधायिनः उच्चावचेष्वर्थेषु निपतन्तीति निपाताः अव्ययविशेषाः। ते च मङ्गलाधिकारसम्भ्रमनियोगसमुच्चयविकल्पाद्यर्थेषु ये निपाताः ते विध्यर्थाः। कुत्साप्रशंसा विषादहर्षेर्ष्याविस्मयाद्यर्थेषु ये निपातास्ते अर्थवादाः। स्मरणोपमाभ्युपग–मानुप्रश्नपरकृत्यपुराकल्पाद्यर्थेषु ये निपाताः ते अनुवादार्थाः। प्रतिषेधनिवारणापाकरणा–सूयागर्हणाविनिग्रहाद्यर्थेषु ये निपतन्ति ते निषेधार्थाः। सम्बोधनानुकम्पावितर्कप्रश्न–पक्षान्तरहेत्वपदेशाद्यर्थेषु येनिपातास्ते विधिनिषेधार्थाः। पदपादवाक्यालंकारपूरणाद्यर्थेषु ये निपातास्ते अविधिनिषेधार्थाः सन्ति। अलङ्कारपूरणेषु – भङ्गश्लेषभाषाश्लेष–यमकवक्रोक्तिचित्रानुप्रासपदावृत्तिप्रश्नोत्तरप्रभृत्यलङ्काराणां पूरकत्वेन अलङ्कार–पूरणार्था निपाता मन्तव्या। अन्यत् स्पष्टम्।

गतयः—

समासार्हाः निपाता एव कतिपयेऽपि गतयः। यथा पराकरोति शुक्लीकरोति मनोहत्य अदःकृत्य उपाजेकृत्य यदुपनिषत्करोत्यादयः गतयः सन्तिः।

उपसर्गाः—

गतिविशेषा एव प्रादयः उपसर्गाः। प्रपरादयः।

ते वाचकद्योतकविशेषकसहाभिधायककार्यार्थकनिरर्थकाश्च भवन्ति। परासुः अपमन्युः इत्यदयो वाचकाः, प्रतिष्ठते पराक्रमते अभिधत्ते श्रद्धत्ते अन्तर्दधाति इत्यादयः द्योतकाः, प्रवर्धते पलायते सुभवतीत्यादयः प्रकृत्यर्थविशेषकाः, दुर्मनायते उत्पुच्छयते इत्यादयः प्रत्ययार्थविशेषकाः प्राणिति विक्लवते संरम्भते उज्जासयति इत्यादयः सहाभिधायकाः, विजयते अपस्किरते प्रणश्यति अन्तर्णयति इत्यादयः कार्यार्थाः। प्रारभते निष्ठीवति अध्यागच्छति इत्यादयः निरर्थकाः।

कर्मप्रवचनीयाः —

प्रादय एव क्रियाविशेषोपजनितसम्बन्धावच्छेदहेतवः कर्मप्रवचनीयाः। यथोक्तं वाक्यपदीये

क्रियाया द्योतकोनायं न सम्बन्धस्य वाचकः।
नापिक्रियापदाक्षेपी सम्बन्धस्य तु भेदकः।।

इति।

यथा — शाकल्यस्य संहितामनुप्रावर्षत् " इत्यादयः। अत्र अनुना संहिताप्रवर्षण— योर्हेतुफलभूतयो लक्ष्यलक्षणभावो प्रकाश्यते। निशमयतिक्रियोपजनितः संहितामनुनिशभ्य प्रावर्षत् इत्यर्थः। कर्मप्रवचनीया एकादश अनु उप अप परि आङ् प्रति, अभि अधि सु अति अपि इति। एतेषु अनुः हेतुलक्षणसहार्थ—हीनतालक्षण—इत्थम्भूताख्यान भाग—वीप्सेति" सप्तार्थकः। प्रतिः, वीप्सादिभिः सह प्रतिनिधिप्रतिदानेति षडर्थः। परिः लक्षण— इत्थंम्भूताख्यान—भाग—वीप्सावर्जन—आनर्थक्येति षडर्थकः। अपिः —पदार्थ— सम्भावना—अन्ववसर्ग—गर्हा समुच्चयेति पंचार्थकः। अधिः — आनर्थक्याधिकारस्वाम्येति त्र्यर्थकः। अभिः — लक्षण—इत्थम्भूताख्यानवीप्सेति त्र्यर्थः। उपः—हीन—अधिकार्थेति द्वयर्थः। अतिः — पूजातिक्रमणेति द्वयर्थः। आङ् — मर्यादावचनेति एकार्थः।

विभक्तिप्रतिरूपम् = सुबन्ततिङन्तानुकारि विभक्तिप्रतिरूपम्। तत्र सुबन्तानुकारिरूपाणि यथा उच्चैः सायं चिरस्य इत्यादयः। तिङन्तानुकारीणि यथा— मन्ये शङ्के अस्ति अस्मि इत्यादयः। इत्यव्ययः।

अनुकरणम् —

शब्दस्य ताद्रूप्येनाभिधानमनुकरणम्। व्यक्ताव्यक्तवर्णपदवाक्यानां सादृश्योक्तयोऽनुकरणानि। यथा चटच्चटेति पिपिप्रियेत्यादयः।

अनुकरणानां साधुत्वमेवोपपन्नं भवति, भवन्तु वा साध्वसाध्वपभ्रंशापदा—

दीनामनर्थकोक्तयः। प्रतिषिद्धत्वं तु तदानीं घटते यदा अनुकृतामप्युक्तिं स्वयं प्रयुङ्क्ते।

कृत् –

भावकारकाभिधायिनो धातुप्रत्ययाः कृतः। तेषु केचनालिङ्गिनः, यथाणादयः, कुम्भकारः कारुः, इत्यादयः, केचनान्यलिङ्गिनः, यथा ण्वुलादयः कारकः कारिका, कारकमित्यादयः, केचन स्वलिङ्गिनः यथा पङ्क्तिः पाकः शय्या इत्यादयः केचनालिङ्गिनस्तुमुनादयः, यथा भोक्तुं अलंकृत्वा ईश्वरो विलिख इत्यादयः केचन शक्त्याद्यपेक्षिणः शत्रादयः यथा व्रजता, क्रियमाणं, चक्रम्यमाणः, केचनानुप्रयोगा-द्यपेक्षिणस्तद्धिताद्यनुषङ्गा णमुलादयः, यथा रैपोषं पुष्यति चोरंकारमाक्रोशति व्यावक्रोशी सांराविणम् इत्यादयः भवन्ति।

तद्धितः–

अधातुप्रत्यया भावकारकसम्बन्धिस्वार्थाभिधायिनस्तद्धिताः। तेऽपि अलोपि-लोपि–सर्वलोपि–आदेशि–प्रदेशि–अप्रदेशिभेदेन षोढा। तेषु निरनुबन्धा अलोपिनः यथा– अश्वत्वं अश्वक इत्यादयः। सानुबन्धा लोपिनः यथा– ब्राह्मण्यं मृत्तिका इत्यादयः। लुग्लुपादयः सर्वलोपिनः, यथा गर्गाः चरका इत्यादयः। येषामायन्ना-द्यादेशस्ते आदेशिनः यथा कापेयम् आत्मनीनम्। प्रकृतेरादिमध्यविषयाः प्रदेशिनः, यथा बहुतृणम् त्वयका उच्चकैः इत्यादयः।

समासः –

पृथगर्थानामेकार्थीभावः समासः। सुबन्ताभ्यां तिङन्ताभ्यां, सुप्तिङन्ताभ्यां, सुब्धातुभ्यां, सुबन्तनामभ्यां नामभ्यां च स षोढा भवति। तत्र सुबन्ताभ्यां यथा –

उपकुम्भम् राजपुरूषः नीलोत्पलम् अष्टाकपालः चित्रगुः धवखदिरौ।

न केवलं प्रधानयोर्नोपसर्जनयोर्निरपेक्षत्वात् सम्बन्धो भवति अपितु प्रधानो-पसर्जनयो– रेव। सम्बन्ध एव सामर्थ्यम्। ''समर्थः पदविधिः'' इति सूत्रम्। प्रधानो-पसर्जनभावश्च वैयधिकरण्ये अभिधीयमानः सामानाधिकरण्ये च प्रतीयमान इष्टः।

कुम्भस्य समीपमुपकुम्भमित्यत्र पूर्वपदप्रधानोऽव्ययीभावः, राज्ञःपुरुषः राजपुरुष-इत्यत्रोत्तरपदप्रधानस्तत्पुरुषः, इत्यत्र प्रथमयाभिधीयमानप्रधानत्वम् तदितरया चोपसर्जनत्वम्। यद्यपि समानाधिकरणबहुव्रीहौ 'चित्रगु' इत्यत्र चित्रा गावोऽस्येति विग्रहे षष्ठ्यन्तस्य प्रधानभावत्वेन सत्वेऽपि न क्षतिः अत्र चित्राणां गवामयम् वाक्यवैपरीत्येन इदंपदार्थस्य प्रधानत्वमनुभवितव्यम्। अन्यथा 'धवखदिरौ' 'धवखदिरयोः' इत्यत्र धवश्च खदिरश्चेति प्रधानयोः, धवस्य खदिरस्य चेत्यप्रधानयोः क्रियादीन् प्रति इतरेतरयोगद्वन्द्वे प्राधान्यमप्राधान्यं वा न प्रतीयेत।

सामानाधिकरण्ये च प्रतीयमानः, प्रधानोपसर्जनभावः। ''नीलोत्पलम्'' नीलंचोत्पलंच, ''अष्टाकपालः'' अष्टसुकपालेषु संस्कृतः इत्युभयोर्विग्रहवाक्ययो प्रथमे प्रथमयोभयोः प्राधान्यस्यामिहितत्वेऽपि 'विशेषणं विशेष्येण बहुलम्' इत्यनेन

प्रधानोपसर्जनभावः प्रतीयते। द्वितीये तु "संख्यापूर्वक " तद्धित.... इति सूत्राभ्यां प्रधानोपसर्जभावश्चेति। अत उक्तं सामानाधिकरण्ये प्रतीयमानः प्रधानोपसर्जनभाव इति। एतेषु सुबन्तेनैव सुबन्तं समस्यते इति सुबन्ताभ्यामेव समासः–

तिङन्ताभ्याम् –

तिङन्ताभ्यां समासो यथा अश्नीतपिबता एहिरेयाहिरे इत्यादयः अश्नीतपिबत इत्यादि यासु क्रियासु सातत्येन विद्यते ताः क्रिया अश्नीतपिबता, इति विग्रहे आख्यातमाख्यातेन क्रियासातत्ये इति तिङन्तानां समासः, 'एहिरे याहिरे ' इत्यत्र "रे" इत्यस्यनाख्यातत्वेऽपि आख्यातमध्यपतित्वेनाख्यातत्वमेव मन्तव्यं 'तन्मध्यपतितः तद्ग्रहणेन गृह्यते" इति स्मरणात्।

सुप्तिङन्ताभ्याम् –

सुप्तिङन्ताभ्याम् यथा अपचसि जहिस्तम्ब इत्यादयः। अवक्षिप्तोऽसि न पचसि त्वमभिहितोऽपि वृषलइति विग्रहे "अपचसि" इति। अत्र 'नञो नलोपस्तिङ्यवक्षेपे' वचनात् समासः। "जहिस्तम्ब' इत्यत्र जहि जहि स्तम्बमिति कर्ता योऽभिधीयते स एवमुच्यते जहिस्तम्ब इति। "जहि कर्मणा बहुलमाभीक्ष्ण्ये समस्यते कर्तारं चाभिद–धाति" इति वचनात् समस्यते।

सुब्धातुभ्याम् –

यथा – संग्रामयते, अन्तर्धिः, प्रतिभुवौ इत्यादिषु, "सग्राम युद्धे" इति समस्तपाठ, अन्तर्धिरित्यत्र उपसर्गेषु "श्रदन्तरोरुपसंख्यानम्" इति वचनात् 'अन्तः' इत्यस्योपसर्गत्वे उपसर्गेघोः किः "सूत्रबलात् सुब्धातुभ्यां समासः। "प्रतिभुवौ" इत्यत्र क्विबन्तस्य प्रत्ययनाम– धातुत्वाद् धातुत्वमिति सुब्धातुभ्यां समासः।

सुबन्तनामभ्याम् –

यथा दधिसेक्, चर्मकृती सरसिजम्। 'सुप्सुपा' इति सूत्रादागतसुप्पदस्य निवृत्तिः' 'कुगतिप्रादयः' उपपदमतिङ् 'इत्यत्रातिङ्ग्रहणेनोभयसूत्रशेषतया व्याख्यायमानत्वात्। "कर्तृकरणे कृता बहुलभ्" इत्यत्र कर्तृकरणयोः समासविधानात् कृता इति समासाभ्यनुज्ञाने सुपा इत्यस्य निवृत्तिः। ततश्च "गतिकारकोपपदानां कृद्भिः सहसमासः सुबुत्पत्तेः प्रागेव भवतीतिव्याख्यातम्। बहुलग्रहणात् क्वचिन्नामभ्यां क्वचित्सुबन्ताभ्यां क्वचिन्नामसुबन्ताभ्यां निश्चीयते। "दधिसेक्" इत्यत्र 'सात्पदाद्योः' इति षत्वनिषेधाय सेक् इत्यस्य सुबन्तत्वम्। 'चर्मक्रीती' इत्यत्र नलोपाय पूर्वपदं सुबन्तं उत्तरपदं तु प्रातिपदिकम्। 'क्रीतात् करणपूर्वात्' इति समासे अकारान्तात् ईकारः सिद्धो भवति। 'सरसिजम्' इत्यत्र पूर्वपदे सुपः श्रवणंमुत्तरपदे प्रयोजनाभावाद् विभक्तेरनुत्पत्तिः। अतः सुबन्तनामभ्यां समासो ध्यातव्यः।

नामभ्याम् –

यथा माषवापिणी, कृतपूर्वी असूर्यंपश्या इत्यादिस्थलेषु नामभ्यां समासः। माषवापिणी' इत्यत्र प्राक्सुबुत्पत्तेः समासे जाते 'प्रातिपदिकान्तनुम्विभक्तिषु" च

इति सूत्रेण प्रातिपदिकान्तनकारस्य णत्वम्। 'कृतपूर्वीका इत्यत्र कृतं पूर्वं कटोऽनेनेति कृतशब्दस्य कटापेक्षायां पूर्वशब्देनासम्बन्धात् असामर्थ्येऽपि 'पूर्वादिनिः सपूर्वाच्च' इति वचनात् कृतपूर्वयोः असुबन्तयोः समासः। अतः नामभ्यां समासः। एवमेव

"असूर्यपश्या" इत्यत्रापि नञ्सूर्ययोर्दृशिक्रियया सम्बन्धात् "सूर्यमपि न पश्यन्तीति विग्रहात्" नञ्सूर्ययोः परस्परंमसम्बन्धात् सामर्थ्याभावाद् विभक्त्यभावः। 'असूर्यललाटयोर्दृशितपोः" इति निर्देशादसामर्थ्येपि नाम्नोरेव समासः। इति प्रकृतिः

प्रत्ययः–

प्रतीयतेऽर्थोऽनेनेति प्रत्ययः। स त्रिधा– धातुप्रत्ययाः, प्रत्ययप्रत्ययाः, प्रातिपदिकप्रत्ययाः। सनादि तिबादि तुमुनादि तव्यादि ण्वुलादि उणादय धातुप्रत्ययाः। चिकीर्षति, व्रजति– पक्तुमिच्छति गन्तव्यं करणीयः, पाचकः, वायुः– इत्युदाहरणानि क्रमशः।

इच्छाप्रयोजकव्यापारादिषु सनादयः प्रत्ययान्तरापेक्षिणश्च। क्रियायां तिबादयः साध्यक्रियाभिधायिनः। असत्वभूता साध्यत्वविधायिनस्तुमुनादयः। भावकर्मविधायिनः तुमुनादयः। भावकर्मणोः कर्त्रादिपु च ये विधीययन्ते ते तब्यादयः। प्रायेण कर्तरि, कर्मादिष्वपि ये विधीयन्ते ते ण्वुलादयः। सिद्धभावे विधीयमाना द्रव्यवाचिन उणादयः इति विवेकः।

यदादि–घादि–मबादि–फगादि–युजादि–ढगादयः प्रत्ययप्रत्ययाः भवापत्य–स्वार्थमत्वर्थादिषु सुबन्तेभ्यः यदादयः। अप्सव्यः, आमुष्यायणः त्वयका शुभयुः। प्रकर्षकुत्साप्रशंसादिषु तिङन्तेभ्यो घादयः, यथा पचतितरां पचतकि इत्यादयः। कृद्भ्य उत्पद्यन्ते मबादयः यथा कृत्रिमम् श्यैनंपाता। जीवद्वंश–प्रशस्तस्वार्थादिषु अपत्यादितद्धितान्तेभ्यः फगादयः यथा गार्ग्यायणः इत्यादिः। सिद्धभाव ताच्छील्योपा–धिकर्त्रादिषु णिजादिधातुभ्यो युजादयः यथा कारणा, यायावरः, चिकीर्षुः, अपत्याद्यर्थेषु स्त्रीप्रत्ययान्तेभ्यो ढगादयः यथा गाङ्गेयः यौवतेयः।

प्रातिपदिकप्रत्ययास्तु टाबादि– स्वादि–तसिलादि –कादि अणादि '– व्यजादयः। तेषु प्रकृतिलिङ्गाभिधायिनः टाबादयः, यथा खट्वा – युवतिः। प्रकृत्यर्थसंख्याभिधायिनः स्वादयः यथा, कुण्डं, कुण्डे। शक्तिमात्रसोपाधिशक्ति–वाचिनस्तसिलादयः यथा यतः, यत्र, बहुशः पुरुत्रा वसति इत्यादयः। स्वार्थादिषु कादयः यथा, अश्वकः, पटुतरः तार्तीयिकम्। सम्बन्धिकारकभावेषु अणादयः, यथा औपगवः ब्राह्मणत्वम्। कर्मादिकारकोपहित– क्रियेच्छाचारच्व्यर्थादिषु क्यजादयः यथा पुत्रकाम्यति श्येनायते, इत्यादयः। इतिप्रत्ययः

उपस्कारः –

प्रकृतिप्रत्ययानामुपसर्गोपग्रह आगम–लोप–वर्णविकार–विकरणादिसंस्कारः उपस्कारः। अयमपि त्रिधा प्रकृत्योपस्कारः प्रत्ययोपस्कारः, उभयोपस्कारश्च। एते सर्वे उपस्कारा भूषणसमवायअध्याहारवैकृतयत्नप्रतियत्नार्थेषु भवन्ति। तत्राद्यः

प्रकृत्युपस्कारः क्रमेण [1]औपयिकम्, [2]आशास्ते, [3]जंजप्यते उपस्कुरुते, [4]सिंह (६ नन्ति), [5]यौति सौधातकि, [6]वध्यात् (गव्यम्), इत्यादयः।

प्रत्ययोपस्कारे भूषणरूपा इडसुगीककादयः, यथा सहिता, देवासः तार्तीयिकम्। समवायरूपा स्य–सिच् सीयुडादयः यथा करिष्यति, अपाक्षीत् कृषीष्ट। अध्याहाररूपाः, प्रत्ययार्थविशेषकोपसर्गमप्तरबादयः। यथा सुमनायते, कृत्रिमम् पचतितराम्। वैकृतरूपा आदेश सर्वादेशप्रत्यादेशादयः यथा – गार्ग्यायणः पवनः वेद। प्रतियत्नरूपा विशेषादेश– विधिनिषेधादयः यथा तस्थौ उदयादि, सुप्रेयसी।

उभयोपस्कारे युष्मत्प्रभृतिप्रयोगादयः। अत्र भूषणरूपा त्वं पचसि, भज्यते शाखा स्वयमेव इत्यादि। समवायरूपाः विकरणादयः यथा चोरयति स्वयं दुग्धे। अध्याहाररूपाः द्विरुक्तादयः, यथा पायं पायं इत्यादयः, प्रतियत्नरूपा विध्यनुप्रयोगादयः, यथा रैपोषं पुष्यति इत्यादयः। इत्युपस्कारः

उपपदम् –

उपस्कारविशेष एव प्रकृतिसमीपोच्चारितं पदमुपदम्। तत् त्रिधा, तिङ्कृत्सुबुपपदत्वात्। क्रियाकारकनामाव्ययनिपातोपसर्गरूपत्वेन तिङुपपदकृदुपपदयोः षाड्विध्यम्। सुपुपदे उपसर्गस्यासम्भवात् तस्थाने कर्मप्रबचनीयरूपं निवेश्य षड्–विधत्वमुपपादनीयम्। तत्र तिङुपपदे क्रियारूपं यथा एहि मन्ये रथेन यास्यसि इत्यादयः। कारकरूपं यथा अश्वेन संचरते। नामरूपं यथा कालो यद्भुंजीत भवान्। अव्ययरूपं यथा कथं नाम तत्रभवान् वृषलं याजयेत्। निपातरूपं यथा–यावद्भुङ्क्ते। उपसर्गरूपं यथा पराक्रमते।

कृदुपपदे क्रियारूपं यथा – न त्वां तृणाय मन्ये। कारकरूपं यथा – चर्मणि द्वीपिनं हन्ति। नामरूपं यथा– गवां स्वामी। अव्ययरूपं यथा – समया ग्रामम्। निपातरूपं यथा– हे देवदत्त। कर्मपवचनीयरूपं यथा वृक्षमनु विद्योतते विद्युत्। इति उपपदम्।

प्रातिपदिकम् –

प्रातिपदिकं विभक्तावयवाविभक्तावयवानुकरणभेदेन त्रिधा। कृत्तद्धितसमास–विभागात् त्रिधा विभक्तावयवम्। कृता भावः कारकश्चाभिधीयेते। भावस्तु धात्वर्थ एवं कालाननुपातित्वेनापूर्वापरीभूतो भवति। क्रियानिमित्तं कारकम्।

तत्र भावः सिद्धः साध्यः, सिद्धासमाप्तः साध्यासमाप्तः सिद्धसाध्यः साध्यसिद्धश्चेति षोढा निरूपितः। तत्र षष्ठिसम्बन्धविभक्तेर्निमित्तं सिद्धः। कतृकर्मणोः कारकविभक्तेर्निमित्तं साध्यः। सिद्ध एव तद्धितानुबन्धी सिद्धासमाप्तः। साध्यएवानुप्रयोगानुबन्धी साध्यासमाप्तः। सिद्ध एव साध्यधर्मयोगी सिद्धसाध्यः। साध्य एव सिद्धधर्मयोगी साध्यसिद्धः। क्रमेणोदाहरणम् यथा – 1– भेदिका काष्ठानां देवदत्तस्य, अत्र कर्तर्यपि षष्ठी एव भवन्ती भावस्य सिद्धतां द्योतयति। 2–ओदनं भोक्तुं याति, अत्र 'न लोकाव्यये' ति षष्ठी निषिध्यते अतः साध्यरूपः।

3– व्यावक्रोशी अत्र व्यतिहाराद्युपाधिको णज् इनादिः तद्धितोत्पत्तिमन्तरेण न समाप्यते अतः सिद्धासमाप्तः। 4–चकासांचकार, रैपोष पुष्यति। स्वार्थाभिव्यक्तये कृभ्वाद्यनुप्रयोगं यथाविध्यनुप्रयोगं च आमन्तं णमुलन्तमत्रापेक्षते अतः साध्यासमाप्तो भवति। 5– आश्चर्यो गवां दोहोऽगोपेन। अत्र उभयप्राप्तौ कर्मण्येव षष्ठी, कर्तरि च तृतीया अस्ति, अतः षष्ठ्या सिद्धत्वं तृतीयया च साध्यत्वमिति विवक्षातः सिद्धोऽप्ययं साध्योऽपि भवतीति। केश्चित्तु उष्ट्रासिकामास्ते "इत्यत्र क्रियाविशेषानुष्ठानत्वेन द्वितीयादर्शनादभेदविवक्षातः क्रियावदेव साध्यत्वमुष्ट्रासिकासिद्धस्यापि, अतः सिद्धसाध्यमित्युच्यते।

कर्तव्यं भवतः। अत्र न लोकाव्यंय............ इति सूत्रेण खलर्थस्य कर्तृकर्मणोः षष्ठीनिषेधे साध्यार्थाभिधायित्वं, पुनश्च कृत्यानां कर्तरि वा – क्तस्य च वर्तमाने –इत्यादिभिः षष्ठीविधानात् पक्षे विवक्षातः सिद्धार्थामिधायित्वं, गम्यते अतः साध यसिद्धः। इतिभावः

कारकम् –

कर्ता – कर्म –करण–सम्प्रदानापादानाधिकरणभेदात् कारकम् षोढा। प्रत्येकंच त्रैविध्यादष्टादशकमुदाहरणम्। तत्र कर्ता – स्वतन्त्रः हेतुः कर्मकर्ता च। क्रमशः पुरां भेत्ता, राजानं योधितवान् पचेलिमा माषाः इति।

कर्म – निर्वर्त्यं विकार्यं प्राप्यम्। कर्तव्यः घटः, भुक्त ओदनः, सुयानो मार्गः। अत्र क्रमेण उत्पत्तिप्रकृत्युच्छेदक्रियाकृतविशेषानवगतयो मूलम्।

करणं, बाह्यमाभ्यन्तरं बाह्याभ्यन्तरंच। आशितम्भवं भक्तं, प्रियङ्करणं शीलम्, दर्शनं चक्षुः।

सम्प्रदानम्, ददातिकर्माप्यम् कर्ममात्राप्यम् क्रियाप्यंच। दानीयो विप्रः दाशः कैवर्तः, श्लाध्यो राजा। श्लाघन्ते जना अस्मै इति विग्रहः। अपादानम् – निर्दिष्टविषयं, उपात्तविषयम्, अपेक्षितक्रियं च। प्रपतनो गिरिः,, भीमः, अवधिः पर्वतः।

अधिकरणम् – वैषयिकमौपश्लेषिकंनैमित्तिकम्। यथा निपानं जलाशयः, इषुधिः उपासङ्गम्, रङ्गः प्रेक्षा।

कृतस्त्रिप्रकाराः भवन्ति – भावकारकोभयवचनैः। भाववचनाश्च अथुजादय ण्वुलादयः णजादयः तुमुनादयः सयादयः णमुलादयश्च। कारकवचनाश्च ण्वुलादयः अणादयः, उणादयः क्विनादयः शत्रादयः तृनादयः। भावकारकोभयवचनाश्च तव्यादयः तवादयः क्तादयः खलादयः लुडादयः घञादयश्च। भावे य ण्वुलादयः ते रोगाद्युपाधि मति भवन्ति यथा अरोचको बाधते भवतः आसिकाइत्यादय। कर्तरि ण्बुलादय यथा कारकः स्रष्टा इत्यादयः। णजादयः व्यावक्रोशीइत्यादयः। सयादयस्तुमर्थे छन्दोविषयो यथा वक्षे रायस्त्वा। कारके अणादयः यथा काण्डलाव इत्यादि। उभये तु तावादयः छन्दोविषये यथा परिधातवै। व्यक्तकालाःखलादयो यथा स्वाढ्यम्भवं भवता, सूत्थानं भवता इत्यादय स्पष्टाः। इति कृतः।

तद्धितादयः अग्रे निरूपयिष्यन्ते।

।। श्रीः ।।

काव्यदोषाणां मूलं शब्दशास्त्रम्

पं. वायुनन्दनपाण्डेयः
उपाचार्यचरः, साहित्यविभागे
सं.सं विश्वविद्यालये

धर्मार्थकाममोक्षेषु व्युत्पत्त्याधायकस्य, सद्यः परनिर्वृतिसम्पादकस्य, कान्तासम्मिततया कृत्याकृत्य-प्रवृत्तिनिवृत्त्युपदेशाधायकस्य सहृदयानुरञ्जकस्य काव्यस्य वर्तते किमपि निरतिशयं महत्त्वं शास्त्रान्तरा-पेक्षया । तच्च काव्यं शब्दार्थमयमेव, काव्यात्मनो रसस्याभिव्यञ्जने शब्दार्थयोः समो व्यापारः । शब्दो विभावादिरूपमर्थं प्रतिपादयति, विभावादयश्च सम्भूय रसाभिव्यक्तिं कुर्वन्ति । अतएव भरतः-

"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इत्याह । (नाट्यशा. षष्ठ अ.)

ध्वनि-सम्प्रदायेऽपि ध्वनिं लक्षयन्नानन्दवर्धनाचार्योऽपि प्राह -

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरितिसूरिभिः कथितः ।।" (ध्वन्यालोकः प्र.उ.)

विशिष्टशब्दस्यैव काव्यत्ववादिनः पण्डितराजाः अपि चमत्काराधाने शब्दार्थयोरुभयोः प्राधान्यम् उत्तमोत्तमकाव्येऽङ्गीकुर्वन्ति । यदूचुः -

"शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यक्तस्तदाद्यम् ।" इति (रसगङ्गाधरे प्र.आ.)

अत्र शब्दार्थौ इत्यत्र द्वन्द्वसमासः, द्वन्द्वे चोभयोः पदयोः प्राधान्यं सर्वसम्मतम् । अभिव्यक्तः इत्यत्र द्विवचनेन कर्तृत्वं शब्दार्थयोरुभयोः सिद्धं भवति, चमत्कारिणोऽर्थस्याभिव्यञ्जने । व्याख्यातं च तत्रैव -

(यत्र काव्ये) शब्दो गुणीकृताभिधेयः, अर्थश्च गुणीकृतात्मा कमपि चमत्कृतिभूमिं व्यङ्क्त इत्यादि । इत्थं च काव्यतत्त्वस्य चमत्कारस्याभिव्यक्तौ यदा शब्दार्थयोरुभयोः प्राधान्यं तदा शब्दार्थयोः काव्यत्वे न काऽपि विप्रतिपत्तिरुल्लसति । येन सार्वजनीनव्यवहारेण रमणीयार्थप्रतिपादकस्य शब्दस्य काव्यत्वं भवद्भिः समाधीयते तेनैव व्यवहारेण शब्दार्थयोरुभयोः काव्यत्वमुपपादितं पूर्वाचार्यैः, स च व्यवहारो यथा काव्यं श्रुतमिति भवति तथा काव्यं बुद्धमिति च भवति, श्रवणं शब्दस्य, बोधोऽर्थस्य चेत्युभयोः काव्यत्वमव्याहतम् ।

जगन्निर्मातुर्ब्रह्मणोऽपि नामरूपात्मकस्य जगतो निर्माणे प्रवृत्तिः "नामरूपे व्याकरवाणि" इति श्रुत्या बोध्यते । अतः कविप्रजापतेरपि शब्दार्थमयस्यैव काव्यस्य निर्माणे प्रवृत्तिः न केवलं विशिष्टस्य शब्दमयस्येति । परं चमत्कारिणोऽर्थस्य प्रतिपादनाय शब्द एवाभ्युपायोऽतः शब्दोऽभ्यर्हितोऽत एव शब्दार्थावित्यत्र शब्दस्य पूर्वनिपातः क्रियते "अभ्यर्हितं च" इत्यनेनेति । परं शब्दार्थयोः काव्यत्वसम्पादनाय सुप्रयोगोऽपेक्षितः । तदुक्तं दण्डिना-

"गौर्गौः कामदुघा"लोके सुप्रयुक्ता स्मृता बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुरेवं शंसति ।।" (का.द.प्र.प.)

श्रुतिरप्याह - "एकः शब्द सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति" इति, तत्र

शब्दस्य सम्यग्ज्ञानं तु व्याकारणादित एव भवति । तस्य सुप्रयोगस्तु काव्यमेवास्ति । अत्र सुशोभनः प्रयोगः सुप्रयोगः । शोभनत्वं च दोषहानगुणाऽलङ्कारोपादानाभ्यां सम्पद्यते । अत एवाचार्याः -

"सर्वथा पदमप्येकं न निगाद्यमवद्यवत् ।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते ।। (का.ल.प्र.)
स्याद् वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ।" इति च (काव्यादर्शे)

येऽपि दोषाः काव्यत्वविघटका न भवन्तीति मन्यमाना निगदन्ति यदि दोषाः काव्यत्वविघटका भवेयुस्तदा दुष्टं काव्यमिति व्यवहारो न स्यात् इति तेऽपि स्वपक्षप्रतिपादनाग्रहग्रस्ताः सन्ति, वस्तुतस्तु "तवाऽयं हेतुराभास" इति व्यवहारवत् दुष्टं काव्यं काव्याभासो न काव्यम् इत्येव युक्तमत एव सर्वैराचार्यैर्दोषा हेयतयैवोपदिष्टा इति । दोषाणां हेयता त्वेतावतैव ज्ञातुं शक्यते यदाचार्यो मम्मटः काव्यं लक्षयन् "तत् = काव्यम् इत्युद्देश्यमुक्त्वाऽपि विधेय (शब्दार्थौ इति) कथनात् पूर्वमदोषौ" इत्युक्तवान् । वेदोऽपि निर्दुष्टाया वाचः प्रयोगे भद्रायाः लक्ष्म्या अधिवाचि स्थितिमाह -

"सक्तुमिव तितिउना पुनन्तो यत्रधीरा मनसा वाचमक्रत ।
अत्रो सखायः सख्या निजानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ।।" इति ।

तथाहि भरतः-

"गूढार्थमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम् ।
न्यायादपेतं विषयं विसन्धि शब्दच्युतं वै दश काव्यदोषाः ।।

इति दश काव्यदोषान्नामग्राहमाह ।

भामहो दण्डी च दशविधानेव दोषानाह । वामनश्च-पद-पदार्थ-वाक्य-वाक्यार्थदोषानाह ।

आनन्दवर्धनश्च द्विविधं दोषमाह । अव्युत्पत्तिकृतम् अशक्तिकृतं च । तत्राव्युत्पत्तिकृतो दोषः कविशक्त्या तिरोहितो भवति, परमशक्तिकृतो दोषः झटिति प्रतीतो भवति ।

परं यत्र धीमतां यत्रानौचित्यप्रतीतिर्भवति तत्रोद्वेगोभवति, रसप्रतीतिर्भग्ना भवति अत अनौचित्यं परिहर्तव्यम् ।

"अनौचित्याद् ऋते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ।। (ध्वन्यालोके पृ. ३३०)

अमुमेव सिद्धान्तं प्रतिपादयति महिमभट्टो व्यक्तिविवेके -(द्वितीये विमर्शे) द्विविधमनौचित्यम् अर्थविषयं शब्दविषयं च । तत्रार्थविषयं साक्षाद्रसभङ्गकारणत्वादन्तरङ्गम् । तल्लक्षणं च-

विभावानुभावव्यभिचारिणां समुचितविनियोगाभावः । अपरं शब्दविषयं च बहिरङ्गं वर्तते, वाच्यद्वारा रसभङ्गहेतुत्वात् । स च बहुविधः - (१) विधेयाविमर्शः विधेयः प्राधान्येन निर्देष्टव्यो भवति, तस्य विधेयप्राधान्यस्य-अविमर्शः-प्राधान्येनानिर्देशोऽर्थादुपसर्जनीकरणम् ।

(२) प्रक्रमभेदः-प्रक्रमः-उपक्रमः, आरम्भः तस्य भेदः, अर्थादन्यथोपक्रमः, अन्यथानिर्वाहः ।

(३) क्रमभेदः=क्रमस्य परिपाट्या भेद उल्लङ्घनम् अर्थाद् व्युत्क्रमः ।

(४) पौनरुक्त्यम् = पुनरुक्तिः उक्तस्यार्थस्य तद्रीत्यैव पुनः कथनम् ।

(५) वाच्यावचनम् = वाच्यस्य वक्तव्यस्यार्थस्य-अवचनमनुक्तिः एतेषां दोषाणां च सामान्यं लक्षणम् -

विवक्षितरसादिप्रतीतिविघ्नविधायित्वं दोषत्वम् । तत्र विधेयाविमर्शादीनां दोषाणां निर्देशः स्वयमाचार्येण

पाणिनिना कृतम् "एतदाचार्यस्याप्यनुमतमेवे"त्यादिना तत्र तत्र प्रतिपादयति स्वयं महिमा । निर्दिशति च पिण्डीकृत्य स्वकृतव्याख्याने रूप्यकः-एते दोषा आधुनिकेन महिम्ना स्वबुद्ध्योद्भाविता इति क्षोदक्षमाऽनर्हा इति सभ्यैरसूया न कर्तव्या, मुनित्रयेण निर्दिष्टत्वात् । तथा हि-

दास्याः पुत्रः 'वृषल्याः कामुकः इत्यादौ षष्ठीसमासं विधायापि महर्षि पाणिनिः पुत्रे कामुके चाक्रोशादपकर्षप्रतिपत्तये "षष्ठ्या आक्रोशे" इति सूत्रं प्रणिनाय । तेन च षष्ठीविभक्तेरलुकमाह । अन्यथा दासीपुत्र इत्यत्र समासत्वात् प्रातिपदिकत्वे विभक्तिलुकि तत्पुरुषे उत्तरपदार्थस्य प्राधान्यात् पुत्रेऽपकर्षप्रतीतिर्याऽपेक्षिता वर्तते सा न स्यात् । आक्रोशप्रतिपत्तये विभक्तिः कारणमित्यलुकमाह षष्ठ्याः । पुत्रे दासीजन्यत्वेनैवापकर्षः प्रतीयते अत आक्रोशप्रतिपत्तये प्रधानं, तत्पुरुषसमासे पूर्वपदार्थस्याप्राधान्याद् गुणीभावाद् व्याहता स्यात् अतो विधेयप्राधान्यप्रतिपादनाय समासं विधायापि विभक्तेरलुकमाह ।

यतोहि समासः प्रायोऽर्थाद् द्वन्द्वं विहायान्ये समासाः विशेषणविशेष्याभिधायिभिः पदैरुपरचिता भवन्ति, अन्यथा द्वयोर्बहूनां वा पदार्थानां मिथः एकार्थीभावरूपसामार्थ्याभावः प्रसक्तः स्यात् तेन "समर्थः पदविधिः" इति नियमोल्लङ्घनात् समास एव न स्यात् । अयं विशेष्यविशेषणभावो द्विधा भवति, समानाधिकरणः, व्यधिकरणश्च । तत्र द्वयोः पदयोः समानाधिकरणे कर्मधारयसमासो भवति "तत्पुरुषस्समानाधिकरणः कर्मधारयः" इति नियमात् । तत्रैव संख्याया विशेषणभावे "संख्यापूर्वोद्विगुः" इति द्विगुर्भवति । नञर्थस्य प्रतिषेधस्य विशेषणभावे नञ्समासो भवति । यत्र च द्वे पदे बहूनि वा पदानि अन्यपदार्थे विशेषणानि भवन्ति तत्र बहुव्रीहिर्भवति "अनेकमन्यपदार्थे" इति सूत्रात् ।

व्यधिकरणे च कारकाणां सम्बन्धस्य च विशेषणत्वाद् बहुविधः । तत्र प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीभेदात् तत्पुरुषोऽनेकविधो भवति । तत्र यदाऽव्ययार्थस्य विशेष्यता स्यात् तदाऽव्ययीभावसमासो मन्यतेऽधिहरि, उपकृष्णमित्यादौ ।

द्वन्द्वे च सर्वेषां पदानां प्राधान्यं भवति । अत एव पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्राधान्ये बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्व इति प्रायोवादः ।

तदेवमेतेषां समासानां विशेषणविशेष्यभावगर्भित्वेन यदा विशेषणांशः स्वाश्रयोत्कर्षाधानमुखेन वाक्यार्थस्य चमत्कारकारणं भवति तदा तस्य प्राधान्येन विधेयतया समासेन गुणीभावो न विधेयः। कृते सति विधेयस्य प्राधान्यस्याविमर्शाद् विधेयाविमर्शो भवति ।

(२) प्रक्रमभेददोषो महामहर्षिणा पतञ्जलिना सूचितः । तथाहि- "स्वामीश्वराधिपतिदायाद-साक्षिप्रतिभूप्रसूतैश्च" इति सूत्रेण स्वामीश्वरादीनां योगे षष्ठी सप्तमी च विभक्ती विधीयेते । अतो गवां स्वामी, गोषु स्वामीतिप्रयोगौ उभौ सिद्ध्यतः । एवं गवां स्वामी-अश्वानां च इत्यपि साधु, गोषु स्वामी - अश्वेषु चेत्यपि साधु । परं गवां स्वामी, अश्वेषु चेति प्रयोगं महाभाष्यकारोऽसाधुः इति ब्रूते । 'कृञ्चानुप्रयुज्यते लिटि' इति सूत्रे भाष्ये कथयति तद्यथा गोषु स्वामी अश्वेषु चेति । न हि भवति गोषु अश्वानां च स्वामी । अर्थात् उपक्रमोपसंहारयोरेकयैव विभक्त्या निर्वाहो विधेयः प्रक्रमभङ्गो नाचरणीय इति ।

(३) क्रमभेदोऽपि महाभाष्यकारेणैव निर्दिष्टः - स च अस्थानप्रयोगलक्षणः । "कृञ्चानुप्रयुज्यते लिटि" इति सूत्रे महाभाष्ये कृञोऽनुप्रयोगः किमर्थम् इत्याशङ्क्य "विपर्यासनिवृत्त्यर्थम् व्यवहितनिवृत्त्यर्थं च" इति समादधे । अनुपदार्थपर्यालोचनया आमन्तस्याव्यवहितोत्तरं कृ-भू-अस्तीनामनुप्रयोगो विधेयः, व्यवहितप्रयोगो विपरीतप्रयोगश्च मा विधेयः । अत 'ईहाञ्चक्रे' इति प्रयोगः साधुः । "ईहां देवदत्तश्चक्रे" इति व्यवहितप्रयोगोऽसाधुः । अतो विपर्यासोऽपि न विधेयः । अनुपयुक्तस्थानेऽपि प्रयोगो न विधेय इति

चादीनां निपातानां प्रयोगनियमं दर्शयता सूचितस्तेन क्रमभङ्गो दोष इति सूचित एव ।

वार्तिककारः कात्यायनोऽपि वृत्तिलाघवं विमृशन् पुनरुक्तिदोषं सूचितवान् । "कर्मधारय-मत्वर्थीयाभ्यां बहुव्रीहिर्लघुत्वात् स्यात्" इति वार्तिकं व्याहरन् प्राह कर्मधारयमत्वर्थीयापेक्षया बहुव्रीहे - र्विधानं कुर्वन् पुनरुक्तिपरिहारमाह । यथा पीताम्बरशब्दः । यदि पीतं च तदम्बरमित्यर्थो विवक्षितस्तदा कर्मधारयसमासः करणीयः । परं पीतस्याम्बरस्य धारयिता यदि विवक्षितस्तदा कर्मधारयकरणानन्तरं मत्वर्थीयः प्रत्ययोऽपि विधेय इति गौरवमापद्यते वृत्तिद्वयकरणात् । अतस्तदपेक्षया बहुव्रीहिसमासकरणे एकयैव वृत्त्यार्थप्रतीतौ लाघवम् । पीतमम्बरं यस्य स पीताम्बर इति । बहुव्रीहौ तद्वान् अर्थः प्रतीयते, मत्वर्थीयेनापीतिपुनरुक्तिरपि भवतीति । न्यायोऽयं शब्दभेदेन साहित्यशास्त्रेऽपि निरूपितः । "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इति । वामनेन च न कर्मधारयो बहुव्रीहिप्रतिपत्तिकर इति । तेन विपर्ययो व्याख्यातः इति सूत्राभ्यां व्याख्यातः ।

(५) वाच्यावचनदोषोऽपि "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति सूत्रव्याख्याने भाष्यकारेण सूचितः । तथाहि ईषदसमाप्तिः कस्य विशेषणं प्रकृत्यर्थस्य प्रत्ययार्थस्य वा? यदि प्रकृत्यर्थस्य विशेषणं तदा "गुडकल्पा द्राक्षा" इति कल्पप् प्रत्ययान्तात् टाप् नोपपद्यते, गुडशब्दस्य पुंल्लिङ्गत्वात् "प्रकृत्यर्थे चेल्लिङ्गवचनानुपपत्तिः" इत्याशङ्क्य समादधे (सिद्धं तु तत्सम्बन्ध उत्तरपदार्थे प्रत्यय- वचनात्) इति ।

अर्थात् प्रकृत्यर्थस्य विशेषणं चेत् गुडशब्दः ईषदसमाप्तिशब्दस्य फलितमर्थं सादृश्यं स्वार्थाभ्यन्तरं विधायाभेदसम्बन्धेन द्राक्षायामन्वेति तदा गुडाभिन्ना द्राक्षा इत्यर्थः सम्पद्येत तदा गुडशब्दात् टाप् नोपपद्यते तस्य पुल्लिङ्गे वर्तमानत्वात् । तथाऽभेदसम्बन्धेनान्वयात् रूपकं स्यात् नोपमा । परं प्रत्ययार्थविशेषणेन गुडसदृशा द्राक्षा इत्यर्थे द्राक्षायाः प्राधान्यादुपमात्र सिद्ध्यति टाबपि भवति । अतः गुडकल्पा द्राक्षा इति निष्पद्यते । अत्र भाष्यकार उपमां स्वीकृत्य वाच्यावचनरूपं दोषं परिहृतवान् । अन्यथा रूपकाश्रयणेन अवाच्यस्य वचनं स्यात् इति । इत्थं सर्वे दोषाः पाणिनि-कात्यायन-पतञ्जलिभिः सूचिताः । एतेषामेव दोषाणां प्रपञ्चभूता अन्ये दोषाः सन्ति इति । वृत्तस्य दुःश्रवत्वमपि शब्दानौचित्यमेव वर्तते । इत्थं सर्वेषां दोषाणां मूलं त्रिमुनि व्याकरणमेवेति निष्पन्नम् । तत एवोद्भाविता आचार्यैरिति ।

परमिमे दोषाः सन्निवेशविशेषवशाद् गुणतामपि आपद्यन्ते यथा पुष्पस्रजां मध्ये गुम्फिता हरितपलाशा अपि कामपि कमनीयतां दधति । केचन दोषा आश्रयसौन्दर्यात् कान्ताविलोचन न्यस्तं मलीमसमञ्जनमिव शोभामादधति । अतः केचन दोषा नित्याः केचनानित्या अपरे गुणतामापन्ना भवन्ति । अतः सर्वे न सर्वथा परिवर्जनीया एव, परं च्युतसंस्कृत्यादयो नित्या दोषास्तु सर्वथा हेया एवेति दिक् ।

श्रीः

शब्दस्य प्रामाण्यं स्वरूपञ्च

डॉ. चन्द्रभानुशर्मा भारद्वाजः
'उपाचार्यः' व्याकरणविभागे
का.हि.वि.वि.

पाणिनिव्याकरणे शब्दपदबोध्यः शब्दः कः? कीदृशः? कतिविधश्च? अत्रोच्यते,-

अथ 'शब्दानुशासनम्' इति भाष्यानन्तरं केषां शब्दानां? लौकिकानां वैदिकानाञ्च, तद्यथा लौकिकास्तावद्-गौरश्वः, पुरुषो, हस्तीत्यादयः भाष्ये समुदाहृताः ।

वैदिकास्तावद् - "शन्नो देवीरभिष्टये"(अ.सं.१.१.१)"इषेत्वोर्ज्जेत्वा" (शु.यजु.सं.१.१.१) "अग्निमीले पुरोहितम्"(ऋ.सं.१.१.१) "अग्न आयाहि वीतये" (सा.सं.१.१.१) तदनन्तरमथ गौरित्यत्र कः शब्दः? इति प्रश्ने क्रमशः द्रव्यक्रियागुणकृतीः शब्दत्त्वेन अपरिगृह्य, पुनः शब्दविषयकप्रश्ने पस्पशभाष्ये येनोच्चारितेन .... सम्प्रत्ययो भवति स शब्दः" स्फोटः स्वरूपलक्षणमेतत् शब्दस्य निर्धारितम्,

ततस्ततः अथवा प्रतीतपदार्थको लोके ध्वनिशब्दः इत्युच्यते, तद्यथा - शब्दं कुरु, शब्दं मा कार्षीः, शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते । तस्माद् ध्वनिः शब्दः । तटस्थ- लक्षणमेतत्, शब्दस्य ।

इत्येतावत्समग्रपस्पशभाष्ये शब्दविषये यन्निर्धारितं तदेव पाणिनिव्याकरणे शब्दत्त्वेन सङ्गृह्यते ।

नित्यानित्यभेदेन शब्दद्वैविध्येऽपि पाणिनि व्याकरणे शब्दनित्यत्त्ववाद एव, - अतएव "सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः" इत्यभियुक्तोक्तिः सङ्गच्छते ।

चतुष्टयी, त्रयी वा शब्दानां प्रवृत्तिः, - १- द्रव्यवचनाः, २- क्रिया वचनाः, ३- गुण वचनाः, यदृच्छा चेति, - एतादृशसर्वविधशब्देभ्यः विज्ञायमानेषु अर्थेषु, "अयं पाठकः, अयं घटः, इदं शौक्ल्यम्, इत्यादिषु लोके तादात्म्यमूलकाभेदव्यवहार एव भवति । अतश्च शब्दार्थयोस्तादात्म्यं स्वीक्रियते ।

अतएव पस्पशाह्निके शब्दे जिज्ञासते जातिगुणक्रियादीनां शब्दत्त्वमाशङ्क्यते, - यतो हि व्याकरणनये 'गुणसमुदायो द्रव्यमिति द्रव्यलक्षणं' स्वीकृतमास्ते । "अवयवः समुदायं प्रति गुणः" इति च ४-१-३, ५-२-४२ इत्यत्र भाष्योक्तेः ।

अतश्च तत्समूहस्य द्रव्यतया, समूहसमूहिनोरभेदस्वीकारेण, तदभिन्नाभिन्नस्य तदभिन्नत्त्वा-भ्युपगमे, क्रियादिषु गोशब्दत्त्वाशङ्कोपयुज्यते ।

'एकरसः' इति समस्ते पदे समानाधिकरणाधिकारे विहितकर्मधारयसमासोपपादनाय 'लिङ्गसङ्ख्याद्य-न्वयित्वं द्रव्यत्त्वम्' "सर्वनामपरामर्शयोग्यत्त्वम्" वा द्रव्यत्त्वम्, इत्येतद्द्रव्यलक्षणद्वयं व्याकरणशास्त्र-प्रक्रियानिर्वाहाय स्वीकृतम् ।

तत्र 'भेदः कल्पितः, अभेदो व्यावहारिकः' इति वाचस्पतिमिश्राः । अन्ये उभावपि व्यावहारिकौ, 'स्वर्णं कुण्डलम्' 'स्वर्णस्य कुण्डलम्' इत्युभयथा लोकव्यवहारात् स्वर्णे स्वर्णत्त्वेनाभेदस्य, कुण्डलत्त्वेन च भेदस्य सत्त्वेनात्र विरोधाभाव एव । अतएव -

"अन्यथानुपपत्तिश्चेदस्ति वस्तु प्रसाधिका –।

पिनष्टि दृष्टवैमत्यं सैव सर्ववलाधिका" ।। श्रीहर्षः ।

न च "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" इति भाष्योक्तशब्दलक्षणेन शब्दार्थयोर्भेद एव स्पष्टं प्रतिभातीति, तत्र अस्य भाष्यस्येदं तात्पर्यं यत्, – विवेकाख्यातिप्रयोज्यतादात्म्यावभासेऽपि चैतन्यजडयोः, यथा चैतन्यस्यैव प्रकाशकत्त्वम्= अवभासकत्त्वम्, जडस्यैव प्रकाश्यत्त्वमवभास्यत्त्वम्, तथैव शब्दस्य प्रकाशकत्त्वमर्थस्य प्रकाश्यत्त्वं स्वभावादेव=अनुपहितशब्दस्य अवभासकत्त्वमर्थस्यावभासतेति वदन्ति ।

चितः स्वप्रकाशत्त्वबोधके वाक्ये लक्षणया अप्रकाशत्त्वं न' इत्यर्थे पर्यवसानं बोध्यम् । यथा लोके 'पटस्य शुक्लः' इति न व्यवह्रियते, अपितु 'पटः शुक्लः' इत्येव व्यवह्रियते, 'घृतं गन्धः' इति न प्रयुज्यते, 'घृतस्य गन्धः' इति च प्रयुज्यते, तत्र को हेतुः शब्दस्वभाव एव कारणं मन्वते शिष्टाः । एवमेवात्रापि विजानीयुरिति ।

गुणक्रियादीनां गोशब्दत्त्वाय तादात्म्यस्वीकारापेक्षया महाभाष्यकारपतञ्जलिमतेनात्र सर्वत्र "राहोः शिरः" इतिवत्, बाह्यवस्तुशून्यत्त्वे सति, शब्दप्रयोगजन्यज्ञानप्रयोजकत्त्वे = जनकत्त्वे सति, अन्तःकरणवृत्तिविशेषे सति, बाधाबाधकालाविशेषेण सदैव जायमानत्त्वं विकल्पत्त्वमिति– "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति पातञ्जलसूत्रोक्तविकल्पात्मकज्ञानमेव स्वीकार्यम् ।

भ्रमात्मकज्ञानेन विकल्पात्मकज्ञानस्य गतार्थता तु न शङ्कनीया, भ्रमज्ञाने बाधोत्तरं शब्दार्थयोस्तद्विषययोरभावादिति ।

अत्र केचनेत्थं ब्रुवते–यत् क्वचित् भेदे अभेद आरोप्यते, क्वचिच्च अभेदे भेद आरोप्यते, क्रमशो यथा – 'अयो दुहति', 'राहोः शिरः' इत्यादाविति, तत्र भेदाभेदयोः वस्तुतोऽभावात्तदाभासो विकल्पो न प्रमाणम्, नापि भ्रमज्ञानं, व्यवहारस्य सम्वादित्त्वादिति मिश्राः ।

एवञ्च – शारीरमारुताभिहतकण्ठादिस्थानैस्तदवयवद्वाराऽभिव्यक्तेन येन सास्नालाङ्गूलक-कुदखुरविषाणिनां विषयाणां तैरवयवैर्गुणादीनां च संज्ञानं भवति, स शब्दः । एतादृशः स शब्दः,- अन्तःकरणपरिणामविशेषरूपायाः बुद्धेरद्वैतिमते घटादिवद् द्रव्यतया आकाशस्य अवच्छेदकत्त्व स्वीकाराद्, बुद्ध्यवच्छिन्नाकाशधर्मोऽयमान्तरः स्फोटः शब्दत्त्वेनाभ्युपगतो भवति ।

एष स्फोट आन्तरबाह्यभेदेन द्विविधोऽपि नानाविधः तत्तदुपाध्युपहितो वर्त्तते । यथा – "मायावच्छिन्नं चैतन्यं परमेश्वरः", "अन्तःकरणभेदाज्जीवानां भेदस्तद्वदत्रापि स्फोटविषये नाना-विधत्वमुपपाद्यते ।

तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।

यथाऽग्न्युत्था विस्फुलिङ्गा वारिराशेरिवोदकम् ।। इत्यादिकं सममेव ।

यथा बुद्धिदेशस्थस्फोट एव वाचको बौद्ध एव, तथैव शक्तिज्ञानीयविषयताश्रयो ज्ञानविषयीभूतोऽर्थोऽपि बुद्धिदेशस्थ एव, बौद्ध एव । अन्तःकरणस्येन्द्रियद्वारा यो विषयाकारेण परिणामः स एव वृत्तिः, तद्रूपमेव ज्ञानं बुद्धिधर्म एवेति शब्दार्थज्ञानानां बुद्धिरूपैकदेशस्थतया परस्परतादात्म्यापन्नत्वमास्ते, स चेतरेतराध्यासः अनादिवासनावशादनादिरेव ।

शब्दार्थयोस्तादात्म्ये 'अग्निशब्दोच्चारणे मुखदाहः स्यादित्यापत्तिः', 'अर्थे वर्णमालाद्यु-पपत्तिश्च'स्याद् 'अस्यायं वाचकः' इतिव्यवहारानुपपत्तिश्च भवति। एतदापत्तिवारणाय तादात्म्यम्, इतरेतराध्याससमूलकमेव स्वीक्रियते, इतरस्य इतरस्मिन् अभेदारोपः, इतरेतराध्यासः कथ्यते, अतः अत्र अभेदस्यारोपात् न तदापत्तिः। अयमध्यासः अनादिरेवेतिकृत्वा शब्दार्थयोर्यौ धर्मौ तयोः धर्मयोः, तयोः शब्दार्थयोः इतरेतराध्यासः अनादिवासनावशादनादिरेवेति स्वीकृत्य, शब्दे अर्थधर्मस्य, यथा "रामेतिद्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इत्यत्र, एवञ्च अर्थे शब्दधर्मारोपो यथा "अर्थं वदति, अर्थं शृणोति' इत्यादौ भवति, न तथा 'अग्निं वदति' इत्यादौ अग्निशब्दे, अग्निरूपार्थवृत्ति-धर्मदाहकत्त्वादेरारोपः। "योऽयम् शब्दः सोऽर्थः, योऽयमर्थः सोऽयं शब्दः" इत्येकाकारलोकव्यवहा-रादभ्युपगतो भवति, इतरेतराध्यासः।

शब्दार्थयोस्तादात्म्यात् शाब्दबोधे शब्दस्य प्रकारतया भानादेव, – उदेति सविता ताम्रस्ताम्र एवास्तमेति च।

सम्पत्तौ च विपत्तौ च महतामेकरूपता ।। इत्यादौ कथितपदत्त्वरूपदोषोऽपि न भवति।

अथ च निरवयवमेकमन्तःस्थं नादैः=मध्यमानादैः बहिः प्रकाशितम् = अभिव्यक्तं शब्दतत्त्वमाहुः, वैयाकरणाः तं शब्दमाहुः पदवाक्यविषयेऽपि तस्य शब्दस्य तथैव निरवयवत्त्वेनैकत्त्वं एवञ्च वाक्यस्य पदस्य अखण्डत्त्वं निर्धार्य्य तद्वाच्यार्थस्यापि अखण्डत्त्वमेव, –वैयाकरणानां नये अर्थभागैः अखण्ड एवार्थो अभिव्यज्यते आन्तरः, वाच्यवाचकावुभावपि, आन्तरावेव। यतोहि, – एकस्यैवात्मनोऽन्तःकरणस्य अभिन्नाविव शब्दार्थौ अवभासेते।

अन्तःकरणस्यैव शक्तिभेदात् – शक्तिवैचित्र्यात्, वैलक्षण्याद्वा अन्तःस्थितौ तौ शब्दार्थावभिन्नावपि, बहिर्भेदेन भासेते, एवञ्च वर्णक्रमरहिते निरवयवे वाक्ये पदे वर्णक्रमवत्त्वमपि=क्रमावभासोऽपि अन्तःकरणशक्तिवशादेव जायते, – इत्येतद्वाक्यपदीये भर्तृहरिः।(का.२ श्लो.३०) अत्रेदमाकूतम् –

यद्येवं तर्हि अन्तःकरणस्य विलक्षण शक्तिभेदवैचित्र्यादेव शब्दादर्थबोधोऽपि जायताम्, किं बहुविधार्थनिरूपितशक्तिकल्पनेन महल्लाघवं भवेत्। अस्तु –,

स चायं स्फोटात्मा शब्दः आन्तरप्रणव एव, सूतसंहितायां प्रणवद्वैविध्यमुक्तमस्ति,– तथाहि

परः परतरं ब्रह्म ज्ञानानन्दादि लक्षणम्।
प्रकर्षेण नवं यस्मात्परं ब्रह्म स्वभावतः ।।
अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्यतः।
प्रकर्षेण नवत्त्वस्य हेतुत्त्वात्प्रणवः स्मृतः ।।

"ओङ्कार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी – (वाक्यपदादिरूपा) नानारूपा-घटपटादिरूपा भवति" इति श्रुतेः।

निरूक्तेऽपि "व्याप्तिमत्त्वात्तु शब्दस्य" इत्युक्तमस्ति परबोधनेच्छया वक्त्रा प्रेर्य्यमाणा हृदयदेशावच्छिन्नाकाशे प्रतिष्ठिता बुद्धिः वाच्यवाचकभावापन्ना कण्ठादिषु वर्णभावमापद्य (अकारादिरूपम्) आन्तरस्यैव बाह्यरूपतया श्रोत्रद्वारेण श्रोतुर्बुद्धिमनुप्रविश्य सर्वार्थ- सर्वाभिधानरूपां श्रोतृबुद्धिं व्याप्नोति तत्र पुरुषप्रयत्नजा वक्तुरुच्चारितवर्णध्वनयो नश्यन्ति, न शब्दः। तथापि सर्वथाऽर्थबोधो न भवति, यतो

ध्वन्यनुरक्तोऽर्थप्रत्ययं जनयति, शब्दगतपदत्त्वादिकं वक्तुरुच्चारितध्वनिषु आरोपयन्ति, वक्तुरुच्चारितध्वनिगतनाशादि च शब्दे आन्तरे आरोपयन्ति ।

ततश्च पुरुषवुद्ध्यवस्थस्यैव = आन्तरस्यैवार्थस्य बोधमादधाति शब्दः, बौद्धार्थेनैव बौद्धान्तरशब्दस्य सम्बन्धात् ।

स च आन्तरः स्फोटात्मा शब्दो वस्तुत एकोऽपि अखण्डो निरवयवोऽपि, तत्तद्वर्णजन्या-भिव्यक्तिरूपसंस्कारैः, प्रतिबिम्बितं तत्तत् पदादिरूपं यस्य स एतादृशः सन्, अनन्त-पदादिरूपतामापन्न इव सर्वपदादिरूपः सर्वार्थाभिधानशक्तिः । "यत्रैव व्यवहारादिना शक्तिज्ञानं भवति, तत्रैवाऽर्थेऽस्माकं बोधः" इति मर्यादा ।

एवमेव, सर्वपदभवनशक्तिमत्त्वेन, सहकारिवर्णान्तरयोगाद् एकैकवर्णोऽपि अनन्तपदरूपः, इति सोऽपि वर्णः तत्तदर्थनिरूपितशक्तिमान्, इति, लोकस्य अविचारितरमणीये वर्णसमूहे वाचकत्त्व- ग्रहमभिलक्ष्य महाभाष्यकारेण अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्याख्यातः । अर्थात् लोके अर्थवोधकत्त्वेन परिगृहीतो वर्णात्मको ध्वनिः, वर्णसमूहः शब्दः इति तदर्थः । 'अखण्डः, आन्तरः, स्फोट एव वाचकः', इति व्याकरणसिद्धान्ते, वर्णपदादिवाचकत्वं कथमिव स्यादित्यत्र नागेशः,

निरवयवोऽपि स्फोटो अकाराद्यवस्थाप्रयोज्यभेदवान्, प्रतिबिम्बप्रयोज्यभेदाभाववांश्च, चरमावस्थया विसर्जनीयादिरूपया वर्णपदवाक्यादिरूपेण प्रतीयमानः अतस्तेष्वेव वाचकत्त्वव्यवहारो लोकस्येति । सर्ववर्णेषु,- पदादित्त्वशक्तिभवनवद्, पदान्तरसहकारेण नानावाक्यभवनशक्तिमत्त्वं, नानावाक्यार्थ-जननशक्तिमत्त्वञ्च सर्वपदेषु सुतरां सिद्ध्यति, यतोहि आन्तरस्फोट एव अर्थरूपेण प्रकाशते ।

प्रायः परस्य प्रवृत्त्यादिविषयकबुभुत्सितार्थप्रत्यायनाय शब्दः प्रयुज्यते । अतः सर्वे शब्दा वाक्यार्थपरा एव, क्रियाकारकान्तरनिवृत्त्यर्थो नियमाय च, यत्र तत्र क्रियापदानि, कारकपदानि, तद्विशेषणपदानि च प्रयुज्यन्ते । तथापि यौगिकेषु, अन्वाख्यानलाघवाय पदानि, तत्र प्रकृतिप्रत्ययादयः, तत्तदर्थविभागाश्च कल्प्यमाना एव सन्ति ।

अतएव 'डः सि धुट्' इति सूत्रभाष्ये ष्टुत्वमात्रापादनेन पदानामानर्थक्यं प्रतिपादितं, 'वाक्यार्थज्ञाने पदज्ञानं कारणम्' इत्यस्यापि नैयायिकोक्तनियमस्य, 'षट्त्सन्तः' इतिप्रयोगे वाक्यस्यैव वाक्यार्थबोधस्वीकाराद् व्यभिचारः ।

सर्वं वाक्यमखण्डमेव, पदानि कल्पितान्येव, पदसत्यत्त्वे तु हे राजपुरुष! इत्यादौ 'राज' इति क्रियाबोधापत्तिरपि स्यात्, 'हे पुरुष राज=दीप्यस्वे'ति । पदानि कल्पितानि, अत एव महाभाष्ये 'न लक्षणेन पदकारा अनुवर्त्याः' - इत्याद्युक्तं सङ्गच्छेत ।

विशिष्टार्थबोधायैव 'इदं रूढ़ं पदम्' 'इदं यौगिकम्' 'इदं योगरूढं पदम्' इति पदविभागोऽपिशास्त्रकृत्कल्पनामात्रमेव, विशिष्टार्थे ज्ञाते, तदुपायभूतव्याकरणाना-मनुपयोगस्तदनियतत्त्वात् ।

अस्मिन्व्याकरणे प्रकृत्यर्थत्त्वेन निर्दिष्टा येऽर्थास्ते अर्थाः अन्यस्मिन् व्याकरणे प्रत्ययार्थत्त्वेन निर्दिष्टाः अतः पदपदार्थादि सर्वमसत्यमेव । अन्यथा "त्वं ग्राममश्वः" "त्वम् अजापयः शत्रून्" "त्वम् अजापयः पिब" इत्यादि वाक्यानामसन्दिग्धार्थबोधनं न सम्भवेत्, 'अश्वः, अजापयः' इत्यत्र सुबन्ततिङन्तपदसारूप्यात् ।

अतो अखण्डवाक्यार्थबोधानन्तरमेव पदपदार्थबोधो निर्णयो भवति, तस्मादखण्डमेव वाक्यमखण्डार्थस्य बोधकम् । अतएव –

न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित् ।

पदानामर्थरूपं च वाक्यार्थादेव जायते ।। इत्युक्तम्,

वाक्येऽखण्डत्त्वञ्च – 'अपृथगुपस्थितिजनकत्त्वम्'

वाक्यार्थेऽखण्डत्त्वञ्च – 'अपृथगुपस्थितिविषयत्त्वम्' इति बोध्यम् ।

प्रकल्पितपदपदार्थाश्रयैर्व्याकरणमीमांसान्यायादिभिः एतादृशाखण्डार्थबोधनमेव क्रियते ।

एवञ्च सकलशास्त्रीयव्यवहारो, लोकव्यवहारश्च, कल्पनाश्रयेणैव=अपोद्धाराश्रयेणैव बोध्यः ।

शब्दार्थसम्बन्धप्रयोजनानां द्वैविध्येनाष्टावेव पदार्थाः व्याकरणेन प्रतिपाद्यन्ते, – तद्यथा अर्थो द्विविधः, १. अपोद्धारपदार्थः, – अपोद्ध्रियन्ते संसृष्टार्थाद् ये पृथक्क्रियन्ते, ते प्रकृतिप्रत्ययार्थपदार्थाः ।

२. स्थितलक्षणः, – स्थितं स्थिरं लक्षणं स्वरूपं येषान्ते, वाक्यार्थाः ।

एवं शब्दोऽपि द्विविधः, – १. अन्वाख्येयः, – प्रकृतिप्रत्ययादिद्वारा साधुत्त्वेन बोधनीयाः शब्दाः, पदावधिकान्वाख्यानपूर्वकं वाक्यान्वाख्यानमेव व्याकरणेन क्रियते, यतोहि लोकव्यवहारो वाक्येनैव सम्पाद्यते, 'सर्वं हि वाक्यं क्रियया परिसमाप्यते, इत्युक्तेः ।

२. प्रतिपादकाः – स्वस्वरूपबोधनद्वारा पदानि प्रतिपादयन्ति ये ते प्रतिपादकाः शब्दाः, पदरूपशब्दान्तरसमुदायप्रतिपत्तिप्रयोजकाः प्रकृतिप्रत्ययरूपाः, 'भूतिः' भूपतिः, – इत्यादयः ।

तत्सम्बन्धोऽपि द्विविधः – १. कार्यकारणभावः, – तादात्म्यमेव शब्दार्थयोः सम्बन्धः, ध्वन्यभिव्यक्तस्यान्तः-करणस्थितस्य शब्दस्यार्थबोधने कारणम्, वाच्यवाचकभावो वा सम्बन्धः । अथवा 'पाचकः' इत्यादौ पाकार्थं प्रति पच् धातुः, कर्तृबोधं प्रति ण्वुल् कारणमिति कार्यकारणभावः ।

२. योग्यभावेन, – साधुशब्दानां गवादीनां स्ववाच्यार्थेषु कर्तृव्यापारासाध्यत्त्वरूपं नित्यं योग्यत्त्वम् वृद्ध्यादिसंज्ञाभूतशब्दानान्तु सङ्केतोपाधिकं=वृद्धव्यवहाररूपसङ्केतज्ञानसापेक्षग्रहरूपं योग्यत्वम्, एवम्भूतो योग्यतालक्षणसम्बन्धः शब्दार्थयोरिति । स्वरूपयोग्यत्त्वेनापि योग्यभाव- सम्बन्धो भवति, – यथा 'मणिः' 'नूपुरः' इत्यादौ ।

एवं द्विविधोऽपि सम्बन्धः, शास्त्रप्रक्रियाज्ञानपूर्वकशब्दप्रयोगे धर्माभिव्यक्तावङ्गत्त्वं प्रतिपद्यते, अर्थबोधञ्च कारयति । परं सः सम्बन्धः साधुशब्देषु साक्षादेव भवति, असाधुषु सः परम्परया । अत एतस्मिन्नर्थेऽयं शब्दः साधुरिति व्याकरणेन साध्यते ।

ते च अपोद्धारपदार्थाः सूत्रकारादिभिः त्रिमुनिभिः कुत्रचित् लिङ्गैः=तत्तदर्थबोधकैः (कर्त्तरि कृत् लः कर्मणि ..) 'तस्यापत्यम्' 'जनपदे लुप्' 'भावे' इत्यादिसूत्रैः, कुत्रचिच्च 'प्रष्ठो अग्र-गामिनि' "कपिष्ठलोगोत्रे क्षुब्धस्वान्तध्वान्त ..." इत्यादिभिः स्वशब्दैः साक्षादेव अस्मिन् व्याकरणशास्त्रे प्रतिपादितः स्मृत्यर्थम्, = व्याकरणस्मृतिप्रणयनार्थं पाणिन्याद्याचार्यैः यथाशास्त्रं केचिदेव= साधुशब्दा एव 'नत्वसाधुशब्दाः' अनुगम्यन्ते= अन्वाख्यायन्ते । एतदष्टप्रकारेष्वेव शब्दतत्त्वं प्रपूर्यते, व्याकरणेनेति, एतावदेव व्याकरणप्रतिपाद्यम्, एतानि हि भाषातत्त्वानि एतावन्त एव पदार्था व्याकरणशास्त्रेऽनुसृताः सन्ति । तदेवाह

वाक्यपदीये –

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ।।
कार्यकारणभावेन योग्यभावेन च स्थिताः ।
धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु ।।
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः ।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ।।

एवञ्च व्याकरणशास्त्रप्रक्रियानिर्वाहायैव अपोद्धारपदार्थाः प्रकल्प्यन्ते ।

अतएव सङ्ग्रहग्रन्थेऽप्युक्तम् –

एकोऽयं शक्तिभेदेन भावात्मा प्रविभज्यते ।
बुद्धिवृत्त्यनुसारेण बहुधा ज्ञानवादिभिः ।। इति ।

सन्दर्भग्रन्थाः –

१. वै.सि.ल.म.,
२. तट्टीकाग्रन्थाः,
३. निरुक्तम्,
४. वा.पदीयम्,
५. म.भा.
६. कला,
७. कुञ्जिका
८. प्रभा,

वेदे मनुष्योत्पत्तिगतं विज्ञानम्

डॉ.हृदयरञ्जनशर्मा
अध्यक्षः वेदविभागः
का.हि.वि.वि.

विश्वस्मिन् जगति मनुष्यस्य उत्पत्तिकालविषये प्राच्यपाश्चात्यदेशेषु विविधानि मतानि उपस्थापितानि, प्रचलितानि च जायन्ते। तत्रास्य मनुष्यवर्गस्य उत्पत्तिविषये पाश्चात्यदेशीयैः प्राच्यैश्च कैश्चन आधुनिकैरन्यैर्विद्वद्भिः यानि मतानि उपस्थापितानि तेषु डार्विनमहोदयस्य मतम् अर्वाचीनेषु प्रायेण सर्वत्र उदाहृतः, स्वीकृतश्च दरीदृश्यते। एतन्मतानुसारेण मनुष्यवर्गस्योत्पत्तिः वानरजातिसकाशादभवत्, मनुष्यस्य पूर्वजा वानराश्चेति मतं महता समारोहेण भृशम् उद्घोष्यते। अर्थात् जगति जीवानाम् उत्पत्तिक्रमे वानरजातेरुत्पत्तिः यथाकथंचित् समधिगता। ततश्च शनैः शनैः जीवविकासरूपे कल्पिते नियतप्रक्रियाक्रमे केचन विशिष्टजातिपरा वानराः शारीरिकमानसिकपरिवर्तनपरिवर्द्धनदिशा च यथाकालं नरा इव रूपायितांऽभवन्निति व्याख्यायते। तत्र परिकल्पितेऽस्मिन् जीवविकासरूपे प्रक्रियाक्रमे कस्य देशीया वा वानरा नरा इव परिवर्तिताः, अन्ये च प्रकृतौ वानररूपेणैव यथावत् प्रवर्तिता इत्यात्मिका विचिकित्सा विदुषां मनः वारं वारं विक्षुब्धमेव करोति।

एतादृशस्य विचिकित्सितस्य, विक्षुब्धस्य च मनसः शान्तिभावाय, सुसमा–धानाय चाऽस्माकं ज्ञानविज्ञानराशिस्वरूपा वेदा एव शरणम्। तथा च पाश्चात्यानां, तदनुवर्तिनां केषांचन आधुनिकविदुषांच कृतेऽपि अन्ततः वेदा एव समाधानस्रोतःस्वरूपा, यतोहि विश्वस्य लिखितसाहित्येषु वेदशब्दराशेः प्राचीनतमत्वं वैज्ञानिकत्वं, प्रामाणिकत्वंच कैश्चन प्राधान्यैः, सर्वथा गुणग्राहिबौद्धिकैः, पाश्चात्यविकसितदेशीयै–र्विद्वद्भिः सबहुमानं साधितं, स्वीकृतंचेति।

वेदे तेषु तेषु सृष्टिविज्ञानगतेषु प्रकरणेषु, विशेषेण च शतपथब्राह्मणग्रन्थगते सृष्टिविज्ञानप्रक्रियास्वरूपे मनुष्यवर्गस्य उत्पत्तिः साक्षात् विराट्पुरुषरूपात् प्रजापतिसकाशात् सर्वादौ जाता इति स्फुटतया निदर्श्यते। अत्र विराट्पुरुषभावभावितः प्रजापतिः जीवात्मनोरुभयात्मकं पराऽपरसत्तारूपमभिधानं भजत इति विज्ञायते। अस्मिन् दिव्येऽ– भिधाने यत्र परारूपा सर्वव्यापनशीला ब्रह्मणोऽवस्था सर्वात्मभावेन विराजते, तत्रैव अपरा नामरूपात्मिका जगद्वासनावासिता परिच्छिन्नाऽवस्थाऽपि

मनोभावात्मिका सती सुसूक्ष्मत्वेन, अत्यन्तं अल्पीयसा कालांशेन च सहाधिराजत इति व्याख्यायितं भवति। एतामेव उभयभावसमन्विताम् अवस्थामभिलक्ष्य श्रुतिः "पुरुष" इति शब्दस्य निर्वचनं पराऽपरस्वरूपविवेचनदिशा एवं हि स्फोटयति, — "स यत्पूर्वोऽस्मात्सर्वस्मात् सर्वान् पाप्मन औषत् तस्मात् पुरुषः। ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद" इति। अर्थात् सः प्रजापतिः पूर्वस्मिन् जन्मनि साधकावस्थायां सम्यक् कर्मज्ञानभावनाऽनुष्ठानै— रहमहमिकया अस्मात् प्रजापतित्वप्रतिपित्सुसमुदायात् सर्वस्मात् प्रथमः सन् कर्मज्ञानाऽनुष्ठानक्लृप्तः आसङ्गाऽज्ञानलक्षणान् प्रजापतित्वप्रतिबन्धकारणभूतान् सर्वान् अपि परिच्छिन्न— भावरूपान् पापयुतान् दोषान् यस्माद् औषद् (अदहत्) तस्मात् पुरुष इति। तथा च यः कश्चित् पूर्वोक्तगुणगुणान्वितः शास्त्रोक्तकर्मज्ञानाऽनुष्ठानैरात्मानं विभाव्य परिच्छिन्नभाववासितोऽपि सन् प्रजापतिभावाय अवितथेन प्रयतते सोऽपि जीवविशेषो हि पुरुषपदवाच्यो जायत इति व्याख्यानमुखं बहु निगद्यते (श० ब्रा० 14.1.2.2)।

ततश्च सर्वात्मभूतोऽयं प्रजापतिः सृष्टिवासनावासिताऽन्तःकरणमनाः सन् यदा शिरःपाणिपादादिलक्षणः पुरुषविधोऽहमिति कदाचिदालोच्यते तदा मानसिकेनैव संकल्पेन अहम्भावानुकृतिरूपो विराट्पुरुषभावः तस्य आजायते। एतादृशः सर्वात्मभावात् कश्चन परिच्छिन्नांशयुतः पुरुषरूपः प्रजापतिः आत्मभावविपरीतदर्शनवत्वाद् किंचित् भयं, रमणाऽभावंच सत्वरम् आप्नोत्। अतः स द्वितीयभावमकल्पयत्। एतस्माद् मायामात्रसमन्विताद् द्वितीयभावालोचनप्रतिज्ञानादेव सः संवेशभावं (स्त्रीपुरुष— समन्वितरूपं)समन्वगात्। एतदनन्तरं स स्वकीयं स्त्रीपुरुषरूपं संपरिष्वक्तभावं द्वेधा पृथक्तया विभाजितवान्। एतेन स्त्रीपुरुषशरीरविशिष्टम् आकृतिद्वयं तस्य समधि— गतम्। अनयोरेव स्त्रीपुरुषरूपयोः परस्परं संसर्गात् सर्वप्रथमं हि मनुष्यवर्गः संवृत्तः कालान्तरे एतावेव स्त्रीपुरुषौ मनुशतरूपानामाख्यौ प्रसिद्धौ संजातौ।

अस्या मनुष्यसृष्टेरनन्तरं गोवृषभसृष्टिः, ततः वडवाअश्ववृषवर्गः, ततः अजा—बस्तवर्गः (बस्तः=अजः), ततश्च अवि—मेषवर्गः, क्रमेण उत्पत्तिसर्गमन्वगात्। अस्मिन्नेव सर्गविसर्गरूपे प्रसरे यथाक्रमं खलु आपिपीलिकान्तं सर्वमपि जीवजातं समुत्पन्नमिति। तत्र प्रजापतिसकाशाद् उत्पन्ना एषा सर्वाऽपि सृष्टिः कार्यकारणरूपा सती विविधेन भावेन राजमाना जाता इति विद्योत्यते। इयं हि कारणरूपा सृष्टिर्दिव्या, सूक्ष्मा, तथा च कार्यरूपा सर्वाऽपि स्थूला इत्यपि तत्र निरूपितम् (श० ब्रा० 14.2. 1.2—9)

उपर्युक्तविवरणानुसारेण मनुष्यवर्गादारभ्य मुख्यत्वेन अविपर्यन्तं सामान्यत्वेन च पिपीलिकान्तं सर्वमपि तत्तद्गुणविशिष्टं सृष्टिजातं यदुत्पन्नं, तदतिरिक्तत्वेनाऽपि केषांचन जीवानां सृष्टिरभिहिता भवति। सृष्टौ सर्वेषु चेतनाऽचेतनरूपेषु पदार्थेषु द्वन्द्वभावः परिनिष्ठितो दृश्यते। उदाहरणरूपेण सदसद्भावापन्नोऽयं पक्षः श्रुतौ रूपाप्रतिरूपशब्दाभ्यां यत्र वर्ण्यते, तत्रैवाऽयं, लोके, सुकृतविकृतभावाभ्यां निगद्यते।

अनया दिशा मुख्येषु जीवेषु मनुष्यपदवाच्यस्य पुरुषवर्गस्य विकृतरूपायां सृष्टौ किम्पुरुषवर्गः, अश्वस्य गौरपशुवर्गः, गोवर्गस्य गवयः, अविपशुवर्गस्य उष्ट्रः, अजवर्गस्य च शरभवर्गः समुत्पन्नः। एते सर्वेऽपि विकृतरूपाः पशवो मेधशक्तिरहिताः (प्राणनरूपदिव्यशक्तिरहिताः) सन्तो भुवि प्रवर्त्तिताः संजाताः। एषु किम्पुरुषरूपोऽयं जीववर्गः कालान्तरे किमि कुत्सितभावार्थकः मानसिकबोधशक्त्या पशुरूपः, शारीरिकाङ्गादिदिशा पुरुषाकृतिरूपः सन् ऋक्षवानरादिजीवविशेषभावेन परिणतो जात इति अनुमीयते।

एतावता विराड्रूपात् प्रजापतेःसकाशात् हि पुरुषाकृतिरूपस्य मनुष्यस्य उत्पत्तिः, पुरुषविकृतिरूपात् किम्पुरुषाच्च कथंचिद् वानरादिवर्गस्योत्पत्तिरिति स्फुटतया विज्ञायते।

वेदे जगत्कारणविमर्शः

कैलाशचन्द्र दवे
उपाचार्यःवेदविभागः
का.हि.वि.वि.

प्रतिकार्यं किमपि कारणं भवतीति सामान्यो न्यायः। जगदिदं महत्कार्यमस्ति अतोऽस्यापि केनचित् कारणेन भवितव्यमिति किमेतत्कारणमिति जिज्ञासायामत्र सं0वि0ध0वि0सङ्कायेऽखिलभारतीया शास्त्रसङ्गोष्ठी समायोजितासीत्। प्रतिशास्त्रं विषयविमर्शोऽयं निर्धारितः। वेदे किमस्ति जगतः कारणमिति यथाज्ञानं विमर्शयितुमहं समुपस्थितः।

वस्तुतो वेदे यत्कारणं समाम्नातं सूत्ररूपेण तस्यैव समुपबृहणं मीमासायां वैदिकदर्शने चास्ति। एतत्समुपबृंहणं वेदाङ्गेषु पुराणेषु सर्वत्रशास्त्रेषुचविस्तरेण कृतमस्ति वेदस्याङ्गित्वात् विषयविमर्शस्य प्रथममेतत्सूत्रमस्ति।

सृष्टेः पूर्वं तम एवासीदिति श्रुतिर्वदति – ''तमआसीत् तमसा गूलमग्रे'' प्रकृतिरपि ब्रह्मात्मनाऽव्याकृतासीत्। नासीदित्यपि वक्तुं न शक्यते तथा च श्रुतिः – ''तद्धेदं तर्ह्यव्याकृतमासीत्।'' इदं जगत् सदेवासीत् – सदेव सौम्येदमग्र आसीदिति श्रुतिः। तस्य ब्रह्मणः अप्रतिहतं सृष्टिसामर्थ्यमासीत्। प्रलये जाते स परमात्मा स्वेच्छया शरीरपरिग्रहं करोति। तथा च छान्दोग्यश्रुति :–

''तदैक्षत बहुस्यां प्रजायेय''। ब्रह्मैव अव्याकृतशक्त्यात्मना जगत्कारणमिति श्रुतिरुद्घोषयति।

पुरुषसूक्तेऽपि स विराट् पुरुष अमृतः सृष्टौ सर्वत्र अन्तर्यामी रूपेण वर्तमानो भवति। तथैव बृहदारण्यकश्रुतिः – ''यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः, यं पृथिवी न वेद। यस्य पृथिवी शरीरं यः पृथिवीमन्तरा यमयति। स त आत्माऽन्तर्याम्यमृतः। स एवामृतात्मा – योऽग्नौ, यदुआकाशे, यो यायौ, यऽआदित्ये, यश्चन्द्रतारके, यो दिक्षु, यः प्राणे यो विद्युति, यस्तनयित्नावित्यादिः।''

जगत्कारणरुपः स पुरुषः कथं जीवेषु प्रविष्टः – उच्यते

शुक्लयजुर्वेदसंहितायाः सप्तदशेऽध्याये य इमा विश्वा भुवनानि इत्यारम्य विश्वकर्मन् हविषाव0 इत्यन्तमष्टौ मन्त्राः सृष्टिविषये समाम्नाताः सन्ति। (शु0 17)

यदैव पूर्वं प्राणरूपा वसिष्ठादयः द्यावापृथिव्योरन्तप्रदेशान् अदृहन्त तदनु द्यावा पृथिव्यौ प्रति उदकमजनयत्। तेहि साध्याः ऋषयः प्राणरूपा भवन्ति यत्र

प्रदेशे साध्यानां लोकः। स विश्वकर्मा विधाता अस्ति। ''संप्रश्नं भुवनानि यन्त्यन्याः।'' वसिष्ठादयः भुवनानि सृजन्ति सर्वान् उदकदानेनेति। 'तमिद्गर्भं प्रथमं दध्र आपो यत्रदेवाः समगच्छन्तविश्वे'' तथैव मनुः अप एव ससर्जादौ (मनु0 1.8.9)

'अजस्यनाभावध्येकमर्पितं यस्मिन् भुवनानि तस्थुः।''

असूर्त्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि (शु. य. 17.31)

असूर्त्ते सप्तदशावयवै – लिंगशरीरैरीरिता असूर्ताः। सूर्ते – सुष्ठु ईरिते प्रेरिते विस्तीर्णे अन्तरिक्षे निषत्ते निरालम्बने स्थिताः सन्तः प्राणरूपा वसिष्ठादयः भूतानि सृजन्ति।

'विश्ववार्मा ह्यजनिष्ठ देव आदिद्गन्धर्वोऽअभवद्वितीयः। तृतीयः पिता जनितौ–षधीनामपां गर्भं व्यदधात्पुरुत्रा। (शु.य. 17.32)

प्रथमो विश्वकर्मा – स हि ब्रह्माण्डमध्ये प्रथमं देवतिर्यगादिजगद्भेदकर्ता सत्यलोकवासी चतुर्मुखो देवः अजनिष्ट–आदित्यान्तरणरूपेण जातः। तदनु स गन्धर्वोऽभवत् गां वाचं पृथिवीं वा धरतिगन्धर्वः अग्निः। गानाद्वा गन्धर्वः। तथा चश्रुतिः – ''अथो एवाहुरग्निरेवास्यै पृथिव्यै पृष्ठे सर्वः कृत्स्नो मन्यमानोऽगायत्।'' पूर्वोक्तद्वयापेक्षया तृतीयः ओषधीनामुत्पादकः पर्जन्य उत्पन्नः। उत्पन्नः सन्नपामाहुतिपरिणामभूतानां अपांगर्भं धारयति करोति वा। पुरू बहून् त्रायते बहुप्रकारं वा गायत इति तथा च श्रुतिः–

''सोऽकामयत बहुः स्यां प्रजायेय स तपोऽतप्यत सतपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत्'' इति

निरुक्तोक्तदेवताप्रकारपरिशीलनम्

डॉ.रामानुज उपाध्यायः
अध्यापकः, शुक्लयजुर्वेदस्य
पं.प.शा. वेदमीमांसानुसन्धानकेन्द्रम्

तत्रतावत् निरूक्तं वेदस्याङ्गत्वे श्रोत्रस्थानमर्हति। वैदिकपदानां निर्वचनं तत्र बहुधोपलभ्यते। निर्वचने हि पदानामर्था एव प्राधान्यरूपतां भजन्ते। तथा चोक्तं तत्र ''य एषां न्यायवान्कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथै–नान्याचक्षीरन्। पुरूषं पुरिशय इत्याचक्षीरन्। अष्टेत्यश्वं तर्दनमितितृणम्। प्रथनात्पृथि–वीत्याहुः।[1] व्याकरणं हि शिष्टोपदिष्टपदानां प्रकृतिप्रत्ययद्वारा व्याकृतिमेवकरोति। किन्तु निरूक्तं पदानां तत्तदर्थे प्रसिद्धानर्थानभिलक्ष्य निर्वचनं करोति। अतएव तत्र ''तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्र्यं स्वार्थसाधकं चेत्युक्तम्।

सैषा निर्वचनपद्धतिः देवानां नाम निर्वचनेष्वपि परिदृश्यते। प्रस्तुतेऽत्र देवता प्रकारपरिशीलने प्रथमं देवशब्दस्य निष्पत्तिः प्रस्तूयते – दीव्यतीतिव्युत्पत्त्या दिव्–धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः[2]'' इति सूत्रेण पचादित्वादचिप्रत्यये देवपदं सिध्यति, यस्यार्थो भवति कान्तिमानिति। यद्यपि दिव्धातुः क्रीडाविजिगीषा–व्यवहारद्युतिस्तुतिमोदस्वप्नकान्तिगतिषु'' पठितः। ततश्च अनेकार्थत्वमस्य प्रसिद्धम्। देवताविषये प्रायः सर्वे अर्थाः संगता भवन्ति। तथा चोक्तं ''यतः क्रीडति सर्गादिभि–र्विजिगीषते शत्रून्। व्यवहरति सर्वभूतेषु आत्मतया द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छतीति तस्मादेव इति।' तथापि प्राधान्येन कान्तिरूपार्थे देवपदस्य व्यवहारो लोके प्रसिद्धः।

आचार्ययास्केन निरूक्ते देवशब्दः चतुर्धा व्युत्पादितः। तद्यथा – 'देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवति।[3]'' एषु दीपनद्योतनद्युस्थान– रूपास्तिस्रो–व्युत्पत्तयः दिवुधातोरर्थमेवानुसरन्ति, यतोहि दीप्तिद्युतिद्युलोकानां सम्बन्धः कान्तिमता देवेन सह संघटते, किन्तु 'दा'धातुना देवशब्दस्य निर्वचनं विशेषार्थं व्यनक्ति, यतोहि यजमानः यज्ञानुष्ठानेन देवान् भावयति, देवश्च तस्मै स्वर्गादिभोग्य वस्तूनि प्रददाति। सैषा प्रदान– क्रिया यत्र विद्यते स देव इति 'दा' धातोः सम्बन्धो बोध्यः।

अत्र यास्काचार्यकृतदेवपद निर्वचनैः देवतानां कार्यं, स्वरूपं, स्वभावः, आवास–श्चेति क्रमतः प्रतीयते।

देवदेवताशब्दौ हि समानार्थकौ स्तः यतो हि देवशब्दादेव स्वार्थिक 'तल्' प्रत्यये सति देवता पदं निष्पद्यते। तदर्थं सूत्रमस्ति महर्षिपाणिनेः'देवात्तल्'[4] इति। सूत्रेणानेन तल्प्रत्ययो भवति स्वार्थिकः। स्वार्थिकतल्प्रत्ययश्च प्रकृत्यर्थमेवावगमयति। ततश्चेह देवशब्दस्यार्थे एव देवतापदमपि प्रयुज्यते। अस्तु।

देवताप्रकारः किल निरुक्ते त्रीन् लोकान् कृत्य सामान्येन त्रिधा प्रोक्तः। तद्यथा 'अग्निः पृथिवीस्थानो, वायुर्वेदोवा अन्तरिक्षस्थानः सूर्यो द्युस्थानः'[5]। तत्रापि तत्तद्देवानां कर्माणि अभिलक्ष्य तन्निर्वचनं तत् प्रकारश्च विशेषरूपेण प्रदर्शितः। तद्यथा 'अग्निःकस्मात् इति प्रश्नमुद्भाव्य अग्रणीर्भवति अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति सन्नममानः इति[6] निर्वचनानन्तरं ऋग्वेदस्य प्रथमः एष मन्त्रः अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।[7]'' उदाहृतः

मन्त्रेऽस्मिन् अग्निशब्दः स्पष्टमेव उपात्तः। अत्र तद्विशेषणे होतारं, रत्नधातमं हव्यदातये इत्यादि विशेषणैश्च तत्कर्मणां प्रतीतिर्भवति। अतो नाम्ना कर्मणा च अग्निस्तुतौ प्रमाणभूतः एष मन्त्रः अस्ति। यैः सह अयमग्निः स्तूयते ते च देवा अत्र संस्तविक पदेन व्यवह्रियन्ते। तथा चोक्तं निरुक्तकारेण दैवतकाण्डे 'अथास्यसंस्तविका देवाः। इन्द्रः सोमो वरुणः पर्जन्य ऋतव इति।[८]

अथ अन्तरिक्षस्थानीयः इन्द्रो निरुक्ते इत्थं व्याख्यातः 'इन्द्र इरां दृणातीतिवा इरां ददातीतिवा इरां दधातीति वा इरां दारयते इति वा इरां धारयते इति वा इन्दवे द्रवतीति वा इन्दौ रमत इति वा इन्धे भूतानीतिवा। तद्यदेनं प्राणैः समैन्धस्त–दिन्द्रस्येन्द्रत्वमिति''[9]। आसां निरुक्तीनामेषोऽभिप्रायः इरां (व्रीहिं) दृणाति विदारयति। वृष्टिं कुर्वन् व्रीहिबीजमार्द्रयति येन बीजप्रभवादिकं प्रसिद्धमेव। इरां ददातीति पदेन पर्जन्यादन्नसंभवत्वमपि इन्द्रे अस्तीत्यवगम्यते। सर्वभूतेषु आत्मगततया प्राणाः सन्दीप्यन्ते येन सोऽपि इन्द्रपदाभिधेयः। इन्दवे द्रवतीति अर्थात् इन्दुः (सोमः) तं पातुमसौ द्रवति गच्छति सोऽयमिन्द्रः इन्दौ सोमे क्रीडति (रमते) इतीन्द्रः। इन्द्रेभूतानि अन्नोत्पादनादिभिर्भूतानि दीपयति सोऽयमिन्धः इन्द्रः। एताभिर्व्युत्पत्तिभिरिन्द्रस्य प्रमुत्वं सर्वथा विज्ञातं भवति।

इन्द्रस्य ऐश्वर्यं ऋग्वेदेऽपि इत्थमुक्तम् यः पृथिवीं व्यथमानामदृंहथ
पर्वतान् प्रकुपितॉ अरम्णात्।
योऽन्तरिक्षं विममे वरीयो
योद्यामस्तभ्नात् सजनास इन्द्रः।।[10]

अस्यायं भावो यत् – हे जनाः। य इन्द्रः व्यथमानां चलन्तीं पृथिवीम् अदृंहत् शर्करादिभिः दृढामकरोत् यश्च प्रकुपितान् इतस्ततः चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमितवान्। स्वे स्वे स्थाने स्थापितवान्। यश्च वरीयः उरुत्तमं अन्तरिक्षं विममे निर्ममे विस्तीर्णं चकार इत्यर्थः। यश्च द्यां – दिवं अस्तम्भ्नात् निरुद्धामकरोत् स एव इन्द्रः।

अनेन इन्द्रस्य प्रभुत्वं स्पष्टं भवति। तदनु द्युस्थानीयसूर्यदेवस्य व्याख्यानं चेत्थमस्ति–

"सूर्यः सर्तेर्वा सुवतेर्वा स्वीर्यतेर्वा।[12] अर्थात् सरति आकाशे स सूर्यः। सुवति कर्मणि लोकं प्रेरयतीति वा सूर्यः। सु पूर्वस्य वा हीयते गत्यर्थस्य कर्मणि प्रत्यये सूर्यः। वायुना हि अयं सुष्ठु ईर्यते प्रेर्यत इत्यर्थः।

अस्य देवस्य महत्वमित्थमृग्वेदे उपवर्णितमस्ति –

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विश्वमाभासिरोचनम्।[13]

अस्यायं भावोयत्, हे सूर्य त्वं ज्योतिष्कृत् तेजसः कर्तासि। विश्वमाभासि प्रकाशयसि च। अग्निविद्युन्नक्षत्रचन्द्रग्रहतारकादिषु त्वदीयं तेज इत्यर्थः। कीदृशं विश्वं रोचनं दीप्यमानं त्वत् प्रकाशेनेति भावः। कीदृशस्त्वं तरणिः तरति अतिक्रामति नभोवर्त्मेति तरणिः। तदेवं निरुक्ते सामान्यतः देवानां त्रैविध्यमुपलभ्यते। तच्चेह यथाशक्ति परिशीलितम्।

सन्दर्भाः

1. निरुक्त 1–4–13
2. पा० सू० 3/1/134
3. नि० दैवतकाण्ड 7/4
4. पा० सू० 5/4/12
5. नि० दैवतकाण्ड 7/4
6. नि० दै० 7/4/15
7. ऋ० सं० 1/1/1
8. नि० 7/3
9. नि० 10/3
10. ऋ० सं० 2/1/12
11. नि० 12–2–18
12. ऋ० सं० 10/37/4

स्वात्म–महेश्वर–सपर्या

डा.कमलेशझाः
अध्यक्षः, धर्मागमविभागः
का.हि.वि.वि.

केचित् त्वामनिशं स्मरन्ति हृदये रामादिरूपं विभुं
केचिज्ज्योतिरुपासते च सततं शान्तं परं चिन्निभम्।
अन्ये ब्रह्म परं विदन्ति विषयव्यापारचित्तास्त्वहं
देव ! त्वामिह नित्यमेकमनघं पश्यामि सर्वात्मकम्।।

(1)

यत्पश्ययामि पुनः पुनः प्रतिदिनं बोद्धुं यतेहं च यद्
आदानक्रिययाऽऽकलय्य यदहो स्थातुं चिरं चेष्टये।
तत्सर्वं स्वविकल्पदर्शितमिदं स्वल्पं विनाशोन्मुखं
हि तवात्मानमुपैमि शान्तममलं ज्ञानक्रियाशक्तिकम्।।

(2)

यद् यद् भाति मयि प्रकाशवपुषि स्वच्छे स्वतन्त्रेऽद्वये
तत्तद्रूपतया विभामि सततं देहात्मना संस्थितः।
हित्वा कालकृताकृतेश्च कलनां तिष्ठन् स्वरुपे निजे
सर्वाधारतयाथ सर्वरहितो भासेऽहमेवाद्वयः।।

(3)

सर्वोऽर्थो मयि भासते स्वजनितो जानामि कुर्वे न तम्
भुञ्जे भोग्यमिदं यथागतमहं यद्भुज्यते केनचित्।
ज्ञातं ज्ञेयमनादिसत्यममलं ब्रह्म स्वभावात्मकं
किं वाञ्छामि मुहुर्मुहुश्च प्रतिदिनं स्वोच्छिष्टभूतं जगत्।।

(4)

यद् वाञ्छामि मुहुर्मुहुश्च भवितुं ज्ञातुं यतेहं च यद्
गाढं गाढमुपाहरामि सततं पूर्त्यै च यद् विभ्रमाद।
तत्सर्वं स्वविकल्पजालमधुना हित्वा स्वरूपं निजं
शान्तं शश्वदुपैमि बोधममलं सत्यं शिवं सुन्दरम्।।

(5)

निगमागमस्वरूपविमर्शः

राष्ट्रियपण्डितः श्रीव्रजवल्लभ–द्विवेदः
शैवभारतीशोधप्रतिष्ठाननिदेशकः

रामचरितमानसकारः सन्तबिरूदालङ्कृतः श्रीमान् तुलसीदासो ग्रन्थारम्भे नानापुराणनिगमागमसंमतत्वं स्वग्रन्थस्य प्रख्यापयति। अत्र निगमशब्दो वैदिकं वाङ्मयम् आगमशब्दश्च तन्त्रागमशास्त्रं सूचयति। शब्दयोरनयोः प्रवृत्तिविषये वर्तते मतानैक्यं शास्त्रकाराणाम्। "इतरेष्वागमाद् धर्मः" (1.82) इति मनुस्मृतिश्लोक आगमपदेन वेदो गृह्यत इति तद्भाष्यकारो मेधातिथिराह। निगमपदेन च वेदस्य ग्रहणं भवतीति निरूक्ते बहुषु स्थलेषु समुट्टङ्क्यते "इत्यपि निगमोभवति" इति वाक्यपुरस्सरम्। "आगमः खल्वपि– ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति च पस्पशाह्निके महाभाष्यकारः पतंजलिः। भर्तृहरिरपि – 'शिष्टेभ्य आगमात् सिद्धाः" (1.27) 'न चागमादृते धर्मः' (1.30), 'प्रणीतो गुरुणाऽस्माकमय–मागमसंग्रहः' (2.490), 'पुराणैरागमैर्विना' (2.493) इत्येवं बहुषु स्थलेषु प्रयुङ्क्ते तदागमपदम्। अत्र टीकाकारा आगमपदेन ऋषिप्रणीतानां शास्त्राणाम्, निगमपदेन चापौरुषेयाणं वेदानां ग्रहणं कुर्वन्ति। अमुमर्थमागमाचार्यस्तान्त्रिकप्रवरः काश्मीरकः श्रीमदभिनवगुप्तोऽप्युररीकरोतीव। स हि – वेद्यं [1] धर्माद्युपायं निश्चितं गमयतीति निगमो वेदः' इति निगमपदस्य व्युत्पत्तिमाचष्टे।

आगमपदस्य तु तेन किंचिद् भिन्नं व्याख्यानं प्रस्तुतम्। तद्यथा। मन्त्रालोके– "इह तावत् समस्तोऽयं व्यवहारः पुरातनः। प्रसिद्धिमनुसन्धाय सैव चागम उच्यते।।" (35.1–2) इति, " 'प्रसिद्धिश्चाविगानोत्था प्रतीतिः शब्दनात्मिका" (35.39) इति च। अपिच – "आगमो हि नामायं शब्दनसंक्रान्तिशरीरः। यथाह भगवाननन्तः – [2]'परत्र स्व– बोधसंक्रान्तये शब्देनोपदिश्यते' (पृ0 89), 'स च यो यस्य हृदये निरूढिमागतः स एव' (पृ0 96) 'नहि बुद्धो नाम नियतः कश्चित् अपि तु भावनाबलप्रतिलब्धक्षणिकादिदृढविमर्शः। तस्य क्षणिकादिभावनोपदेशी गुरुः पूर्वबुद्धः, तस्याप्यन्य इति क्रमेणानियतवक्तृकत्वात् पारमेश्वरविमर्शमयतैव वस्तुतः। एवं चतुर्विंशतितत्त्वभावनाभावितः कपिलो मन्तव्यः। अत एव सर्वागमा अनादय एव' (पृ0 97–98)इति च स एवागमपदं [3]विवृणोति। एवं च [4]'सांख्य–योग–पांचरात्रपाशु–पतादिशास्त्राणामागमपदाभिलाप्यत्वमिति बाढमत्र साधयितुं शक्यते, बाइबिल कुरान सदृशानां ग्रन्थानां च।

परिभाषान्तरनिरासः

''आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे। मतं च वासुदेवस्य तस्मादागम उच्यते। निर्गतं गिरिजावक्त्राद् गतं च गिरिशश्रुतौ । मतं च वासुदेवस्य तस्मान्निगम उच्यते।'' श्लोकद्वयमेतदागमनिगमलक्षणप्रतिपादकं बहुषु ग्रन्थेषु वाराहीतन्त्रवचनत्वेन स्मर्यते। लक्षणमेतदङ्गीकृत्यैव कुलचूडामणिग्रन्थस्य कुलचूडामणिनिगम इति नाम ख्याप्यते। परन्तु नैतत् प्राचीनाचार्यसंमतम्। न च दृश्यते तादृशो विभागः प्राचीनेषु क्रमसम्प्रदायग्रन्थेषु, येषां किल उपदेष्ट्री भवति काली कालसङ्कर्षिणी। नात्र कुत्रापि निगमपदप्रयोगो लब्धप्रसरः, किन्तु सर्वेऽपीमे ग्रन्था आगमाख्यामेव धारयन्ति। तस्मात् सम्पूर्णं तान्त्रिकं वाङ्मयमागमपदेन, वैदिकं च निगमपदेन बोध्यत इत्येव युक्तियुक्तम् पूर्वोक्तानि श्रीमदभिनवगुप्तवचनान्यप्यत्रैवानुगुणानि। अत्रैव चार्थे निबन्धेऽस्मिन् निगमागमशब्दौ प्रयुक्तौ मन्तव्यौ।

पुराणानामागमानुवर्तित्वम्

पुराणानां प्राचीनतमं स्वरूपं साम्प्रतमनुमानप्रमाणेनैव कल्पयितुं शक्यते। तच्च नास्य निबन्धस्य परिधिपतितमिति वर्तमानानामष्टादशमहापुराणानां स्वरूपमेव समालोचनीयताकोटिमाटीकते। एषामेव च नूनमागमानुवर्तित्वमपीति सिषाधयिषितं नः।

पुराणानां वेदार्थोपबृंहकत्वमिति विद्वद्भिः साधु चिन्तितं चिन्त्यते च, किन्तु कुत्रापि किल तेषामागमार्थोपबृंहकत्वं संग्राहकत्वं वा नैव विचार्यते। अस्माभिः [5]''आगम आणि तन्त्रशास्त्र'' इति शीर्षके मराठीभाषानिबद्धे निबन्धेऽग्निपुराणस्य 39–70 अध्याया [6]हर्षशीर्षपंचरात्रस्य आदिकाण्डस्य 2–44 पटलान्, 71–106 अध्यायांश्च [7]सोमशम्भुकृतकर्मकाण्डक्रमावल्याम् (पृ0 31–186) उद्धतान् लीलावती–शिवागमश्लोकाननुकुर्वन्तीति प्रतिपादितमासीत्। तथाहि – ''हयशीर्षः प्रतिष्ठार्थं देवानां ब्रह्मणेऽब्रवीत्'' (38–51) इत्येवं किलाग्निपुराणे विष्ण्वाराधनप्रकरणमिद–मारम्यते। हयशीर्षपंचरात्रं च हयशीर्षेण ब्रह्मणे समुपदिष्टम्। तत्रत्ये चादिकाण्डीये द्वितीये पटले पंचविंशति पांचरात्रसंहितानामथ च भागवतसंहितानां नामानि प्रदर्श्यन्ते। अग्निपुराणे (39.2–5) च पंचविंशतिपांचरात्रसंहितानामेव नामानि संगृहीतानि, न भागवतसंहितानाम्। अहिर्बुध्न्यसंहितासंपादकः शर्मण्यदेशीयो डॉ0 ओटोश्रादर–महोदयस्तस्यग्रन्थस्य भूमिकायां [8] भागवतसंहितानां नामान्यपि पांचरात्रसंहितासु समावेशितवान्। तन्नोचितमित्यग्निपुराणस्य प्रकरणेनानेन साधु सिद्ध्यति।

''स्कन्दायेशो यथा प्राह प्रतिष्ठार्थं तथा शृणु'' (70.9) इत्येव अग्निपुराणे शिवाराधनप्रकरणमारभ्यते। ''अथ संक्षेपतो दृष्टं लीलावत्यां शिवागमे''[9] (पृ0 31) इति च कर्मकाण्डक्रमावलीकारः सोमशम्भुः प्रवदति। अग्निुराणप्रामाण्येन कर्मकाण्डक्रमावलीवचनेन चानेन लीलावत्याख्यः शिवागमः स्कन्दायेशेन समुपदिष्ट इति स्पष्टीभवति। सोमशम्भुना कर्मकाण्डक्रमावली 1130 तमे वैक्रमे वत्सरे समाप्तिं

गमितेत्युभयोरग्निपुराण— कर्मकाण्डक्रमावल्योराधारभूतो ग्रन्थो लीलावत्याख्यः शिवागम इत्यकामेनापि मन्तव्यम्।

वैरोचनीये [10]प्रतिष्ठालक्षणसारसमुच्चये—
प्रतिष्ठाकल्पकौमारं किरणं पिङ्गलामतम्।
देव्या मतं मयं नन्दिं प्रतिष्ठापारमेश्वरम्।।
भास्करं लिङ्गकल्पं च विद्यापुराणबाहुलम्।
शक्राख्यं वामदेवं च द्विधा पैतामहं तथा।
बाणगर्गमतं याम्यं हंसाख्यं वैश्वकर्मकम्।
प्रतिष्ठातन्त्राण्येतानि शिवोक्तान्येकविंशतिः।। (र० 179–181)

इत्येवमेकविंशतिसंख्याकानां शिवोक्तानां प्रतिष्ठातन्त्राणां नामानि परिगणि–तानि। सर्वाण्येतानि प्रतिष्ठातन्त्राणां नामानि शिवागमेषु तदुपागमेषु वा, क्वचन उपपुराणेषु वा श्रूयन्ते।

न वेदे त्रिविधं लिङ्गं न च प्रासादलक्षणम्।
न द्वार मण्डपादिश्च स्थाधनं न शिवादिके।। (2.156)

इति च तत्रैव प्रोच्यते। तेंन त इमे विषयाः पुराणेष्वागमेभ्यो गृहीता इति स्वीकार्यम्।

न वेदे ग्रहसंचारो न शुद्धिः कालबोधिनी।
तिथिवृद्धिक्षयो वापि न पर्वग्रहनिर्णयः।।
इतिहासपुराणेषु कृतोऽयं निर्णयः पुरा।
यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ।।
उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रणीयते। (बृ० ना० 2.24.19–721)
इति च स्वयं पुराणान्यपि वर्णयन्ति।
अथ तन्त्रविधिं वक्ष्ये पुराणेष्वपि गीयते।
तन्त्रे चैव प्रतिष्ठां च कुर्यात् पुण्यतमेऽहनि।। (भ० पु० 2.1.11.1)

इत्यादिना भविष्यपुराणेऽपि वृक्षारामवापीकूपतटाकादीनां प्रतिष्ठा [11] तन्त्रानुसारिण्येव वर्णिता।

इष्टं पूर्तं च कर्म

द्विविधं कर्म भवति—इष्टं च पूर्तं चेति। तत्रेष्टं ज्योतिष्टोमादिकं वैदिकं कर्म आमुष्मिकम्। पूर्तं च वृक्षारामवापीकूपतटाकादीनां निर्माणमैहिकफलदं कर्म। "धर्मो द्विविधः — इष्टः पूर्त श्चेति। तत्रेष्टो वैदिकः, पूर्तस्तान्त्रिकः" (श्लोक 19) इति तत्त्वप्रकाशव्याख्याकारः [12] कुमारदेवो भणति। तेन पूर्तकर्मणां पुराणेषु कृतो विस्तरस्तन्त्रागमाननुसरतीति प्रासादमूर्तिनिर्माणप्रतिष्ठादयः, वापीकूपतटाकादि–निर्माणप्रतिष्ठादयश्च विषया नूनमिदम्प्रथमतया तन्त्रागमेष्वेव वर्णिता इत्यङ्गीकार्यम्।

पुराणेषु तान्त्रिकं दर्शनम्

त्रिपदार्थं चतुष्पादं महातन्त्रं प्रचक्षते।
भोगमोक्षक्रियाचर्याह्वयाः पादाः प्रकीर्तिताः। (बृ० ना० 1.63.13)

इत्यपि बृहन्नारदीये दृश्यते। पति–पशु–पाशात्मकपदार्थत्रयप्रतिपादका ज्ञान (विद्या)–योग–क्रिया–चर्याख्यपादचतुष्टयात्मकाः शैवागमा भवन्तीति मनीषिणाम–तिरोहितमेतत्। तेन वृहन्नारदीयेऽस्मिन् श्लोके भोगपदस्य स्थाने योगपदेन भाव्यम्। सम्पूर्णोऽयमत्रत्योऽशुद्धिभूयिष्ठः शैवागमीयतत्त्वप्रकाशादिग्रन्थसाहाय्येन शोधयितुं शक्यते। अत्र केचन श्लोकाः सद्योज्योतिःशिवाचार्यग्रन्थेषु भोगकारिकादि–ष्वष्टप्रकरणनाम्ना [13]मुद्रितेषु समुपलभ्यन्ते। कूर्मपुराणे उत्तरे भागे वर्तते ईश्वरगीता नाम। सा शैवागमसिद्धान्तान् सार्वात्म्येनानुसरति। तत्वप्रकाशटीकाकारः कुमारदेवस्तां प्रमाणत्वेनोद्धरति। पुराणागमयोः सांनिध्यं तेनानुमातुं शक्यतें तत्वप्रकाशव्याख्याकारः शैवोऽघोरशिवाचार्यः–

अद्वैतवासनाविष्टैः सिद्धान्तज्ञानवर्जितैः।
व्याख्यातोऽत्रान्यथऽन्यैर्यत् स ततोऽस्माकमुद्यमः।।

इति स्वव्याख्यानारम्भे भणति। अत्र स कुमारदेवकृतां टीकां स्मरतीव स्मार्तदृष्टिर्हि कुमारदेवस्य व्याख्यायां जागरूका विद्यते यतो हि स आगमशास्त्राणीव श्रुतिपुराणवचनान्यपि प्रमाणीकरोति। पंचदेवोपासनप्ररा एवैव दृष्टिः पुराणेष्वपि ज्ञागर्ति तराम।शिव नारायणयोरैक्यत्रत् तत्र शक्ति–स्कन्द–गणेश–सूर्यादीनां देवाना–मुपासना तथैव वर्णिता यथा हि प्रपंचसार–शारदातिलकप्रभृतिषु स्मार्ततन्त्रग्रन्थेषु दृश्यते। अग्रिपुराणादिषु सविशेषम्, अन्यत्रापि च सेयं दृष्टिः सर्वत्र प्रोन्मीलिता। एतेन सिद्धयति यत् पुराणानां न केवलं वेदार्थोपबृंहकत्वम्, अपि त्वन्येऽपि विषया अत्र संकलिताः, ये हि वेदेषु नोपलभ्यन्ते। ते च बाहुल्येन तन्त्रागमीया इति नूनं पुराणानामागमानुवर्तित्वमिति को नामाऽत्र सन्देहस्यावसरोऽवशिष्यते ?

डॉ० हाजरामतालोचनम्

उपपुराणेषु कृतभूरिपरिश्रामो [14]डॉ० आर० सी० हाजरामहोदयः पुराणेषु तान्त्रिकप्रभावं चिन्तितवान्। स पांचरात्रसंहिताः शैवागमांश्चात्रैवात्तर्भावयतीति तदुचितमेव, किन्तु तन्त्राणां ब्राह्मणविरोधित्वमवैदिकत्वं चेत्यादिप्रतिपादनं तत्कृतं नैवास्मभ्यं रोचते। भारतीये वाङ्मये विरोधपरिहारप्रवणायां समन्वयात्मिकायां दृष्टौ जागरूकायां ब्राह्मण–बौद्ध–जैनादयो विभागा भगवतो महाकालस्य कलनात्मिकां वृतिमेव सूचयन्ति। सर्वासामासां दृष्टीनां विस्तारकाः प्रायो ब्राह्मणा एव सन्ति। तेन केवलं वैदिकवाङ्मस्य कृते कृतो ब्राह्मणशब्दप्रयोगो भारतीये समाजे विद्वेषोत्पादक इव, संकोचोन्मीलक इव भवतीति साहित्येतिहासे भ्रान्तिभरितोऽयं शब्दः सर्वथा प्रयोगानर्ह इति विशेषतोऽवधेयोऽयं विषयो विपश्चिद्भिः। अतएव पण्डितसुख–लालजीसंघवीसदृशा जैनविद्वांसस्तत्स्थाने वैदिकशब्दं प्रयुंजते। विचारितमेतद–

स्माभिरन्यत्र। [15]

किंच, बादरायणीये ब्रह्मसूत्रे तर्कवादे सांख्य–योग–पांचरात्र– पाशुपतादि–मतानामवैदिकत्वमुद्घोष्यते। महाभारते च शान्तिपर्वणि नारायणीयोपाख्याने–

सांख्यं योगः पांचरात्रं वेदाः पाशुपतंतथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै।। (म0 शा0 349.6)

इत्येवं सर्वेषां प्रामाण्यमूरीक्रियते। ''स्वयंप्रमाणान्येतानि न हातव्यानि हेतुभिः इति हि तत्रत्यस्योत्तरार्धस्य पाठान्तरं दृश्यते। कृतान्तपंचकस्यैतस्य प्रामाण्यप्रति–पादकानि भूयांसि वचांसि पुराणागमेषु धर्मशास्त्रटीकानिबन्धेषु च समुपलभ्यन्ते। महाभारते पूर्वोक्त एवे प्रकरणे मतानामेषां प्रवक्तार एवं निर्दिष्टाः–

सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते।
हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः।।
अपान्तरतमाश्चैव वेदाचार्यः स उच्यते।
प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन।।
उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः।
उक्तवानिदमव्यग्रो ज्ञानं पाशुपमं शिवः।।
पांचरात्रस्य कृत्स्नस्य वक्ता च भगवान् स्वयम्।
इति। (म0 शा0 349.65–68)

सर्वेषामेषां मतानां प्रामाण्यं च तत्रैवैवं निर्दिश्यते–

सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते।
यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः।। इति। (म0 शा0 349. 68–69)

तदत्र श्रीमद्भगवगीता सांख्य–योग–उपनिषत्–पपांचरात्रसिद्धान्तान् सम्यक् प्रतिपादयतीति को नाम विद्वान् न जानीते। एकान्तभावोपपादकमेकायनं धर्ममेव प्राधान्येन समर्थयति सेत्यपि केचन वदन्ति। शिवपुराणे [16] श्रौतः स्वतन्त्रश्रेति द्विविधाः शिवागमः प्रतिपाद्यते। तत्र श्रौतः शतकोटिप्रविस्तरः, यत्र पाशुपतं व्रतं ज्ञानं च वर्ण्यते। एवं च सांख्ययोगयोरिव पांचरात्रपाशुपतमतयोरपि प्रामाण्ये न कश्चन विसंवादो महाभारतपुराणादिषु। पुराणेषु यथा केषांचन मतानां मोहकत्वमुक्तम्, तथैव तत्र– ''मायावादसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते'' (पद्म0 6. 263.71) इत्यप्युच्यते। तेनार्थवादन्यायेन संगमनीयानि तादृशानि पुराणवचनानि। शाक्तागमेषु समबृंहिता भगवत्यास्त्रिपुरसुन्दर्याः श्रीचक्रस्य च वरिवस्या शाङ्करेषु मठेषु सबहुमानं प्रवर्तत इति जानन्त्येव मनीषिणः।

पांचरात्रपाशुपतमतयोः प्राचीनता विषये डॉ0 आर0 जी0 भाण्डारकर– डॉ0 हेमचन्द्ररायचौधरीप्रमृतिभिर्विद्वद्भिर्विचारितम्। कृतान्तपंचकमुपजीव्यैव रामायण–महाभारतयोर्वर्तमानानां महापुराणानां च प्रवृत्तिः समजायतेति तत्र तत्र सिद्धान्तानामेषां

समासेन व्यासेन चोपवर्णनदर्शनादङ्गीकर्तव्यम्। तेन 800 ई0 वर्षेभ्यः पूर्वं पुराणेषु तान्त्रिकः प्रभावो नैव दृश्यत इत्युक्तिर्हाजरामहोदयस्य नैव क्षोदक्षमा। न केवलं मन्त्रन्यास–अभिचारकर्म–यन्त्रमण्डलनिर्माणादय एक तान्त्रिका आगमिका वा विषयाः, यावत् पूर्वोद्धतप्रतिष्ठालक्षणसारसमुच्चयवचनप्रामाण्येन प्रासादमूर्तिनिर्माणप्रतिष्ठादयो विषया इदम्प्रथमतया तत्रैव प्रतिपादिताः। दृश्यन्ते च त इमे विस्तरेण वर्णिता विविधेषु पुराणेषु। डॉ0 हाजरामहोदयः स्वयमपि [17] वराहादिपुराणनिर्दिष्टान् पांचरात्रशैवागमान् तद्विषयांश्च निर्दिशति। साम्प्रतिका ऐतिहासिकास्तन्त्रागमशास्त्राणां प्रवृत्तिमष्टमशताब्दीपरवर्तिनीं साधयन्ति। तेषामेवात्र प्रभावः प्रतीयते।

कृष्णयजुर्वेदसंहितारण्यकयो रूद्रस्याघोरवामदेवादिपंचमुरखानां भस्योद्धूल–नादिविधीनां च दृश्यते तादृगेव स्वरूपम्, यादृशं हि प्रतिपादितं पाशुपतसूत्रकारेण लकुलीशेन। सहि रूद्रस्याघोरादिस्वरूपपंचकप्रतिपादिकां पंचाध्यायीं प्रणीतवान्। भाष्यकारः कौण्डिन्यस्तानि सूत्राणि व्याकृतवान्। लाकुलाः, मौसुलाः, कारूकाः, वैमलाश्चेति चतु– र्विधाः पाशुपताः स्वच्छन्दादिशास्त्रेषु वर्ण्यन्ते, व्याख्यातारंच तेषां स्वरूपं विशदयन्ति। लकुलीशशिष्यो मुसुलेन्द्रो हृदयप्रमाणारव्यं ग्रन्थं जग्रन्थेति [18]रामकण्ठप्रामाण्येन प्रतीयते। ''श्रीलकुलीशशिष्येण मुसुलेन्द्रेण कारोहणस्थाना–वतीर्णेनचापरेण...................... क्षेमेशब्रह्मस्वामिप्राप्तिहेतुक्रियाबहुलाः स्वे स्वे शास्त्रे व्रतविशेषा उक्ताः'' इति च [19]क्षेमराजो वक्ति। पाशुपताद्यागमनिर्दिष्टाः केचन विषयाः साम्प्रतिकैतिहासिकदृष्टया प्राचीने [20]वायुपुराणे समुपलभ्यन्ते। तेनाष्टमशताब्दीतः पूर्वं तन्त्रागमशास्त्राणां प्रवृत्तिर्नासीदिति [21]विकल्पप्रायमिदं वचः। अग्निपुराण गरूडपुराणयोरिवान्येष्वपि पुराणेषु तन्त्रागमशास्त्रीयाणि प्रकरणानि समानामानु–पूर्वीमनुसरन्ति समुपलभ्येरन्नित्येतदर्थं प्रयसमानैरस्माभिर्भवितव्यम्। पौराणिका हि पुराणान्तरेभ्यः शास्त्रान्तरेभ्यो वा गृहीतानि प्रकरणान्यानुपूर्व्या केवलं संबोधना–दिपरिवर्तनपुरस्सरं परिगृह्णन्तीति पूर्वमेवाग्निपुराणप्रामाण्येन प्रपंचितम्।

पुराणानां स्वीयंवैशिष्ट्यम्

इदमत्रावधेयम् – पुरणानि निगमागभोभयमूलकानीति सुनिश्चितम्, अथापि तत्र निगमाख्याया वैदिक्या दृष्टेरेव प्राधान्यं वर्तते। तत्र हि वेदानां परमं प्रामाण्यम्, वर्णाश्रमव्यवस्थायाश्च सार्वात्म्येन स्वीकार इत्यत्र नास्ति [22]संशीतिलवलेशोऽपि।

शैवागमा वैष्णवागमाश्च परस्परं विरोधमुखेन प्रवर्तन्ते। आगमीयोऽयं दोषः पुराणेषु न दृश्यते। पुराणेषु शैववैष्णवादिविभागे जागरूके सत्यपि सर्वत्राव्याहतं शिवनारायणयोरैक्यं प्रतिपाद्यते। पुराणानां सात्त्विकादिविभागः – 'रजोजुषेजन्मनि, सत्ववृत्तये स्थितौ, प्रजानां प्रलये तामः स्पृशो इति कादम्बरीकारमहाकविबाण–भणितिसरण्या व्याख्येयः। यथा एकमेव ब्रह्म कृत्यभेदेन समाख्याभेदमनुभवतीव, तथा पुराणान्यपि सात्विकादिविभागवन्ति भवन्ति। 'अन्योन्याभिभवाश्रयजनन–मिथुनवृत्तयश्च गुणाः'' इति सांख्यकारिकासरण्या गुणानामिव पुराणानामपि

प्रवृत्तिर्मन्तव्या। तेन नात्राधरोर्ध्वीभावः कश्चिन्मन्तव्यः। एवंच वामन–वराह–कूर्मादि विष्णववतारनामाङ्किकतानि पुराणानि सात्विकानि, तत्र च विष्णोरेव महिमा गीयत इति प्रायोवादमात्रम्। तेन कूर्मपुराणं पूर्व वैष्णवमासीत्, अधुना तत्र शैवोपादानानां प्राबल्यं संजातमित्येवंप्राया [23] उक्तयो नैवोचिताः प्रतीयन्ते। वृहन्नारदीये पूर्वभागे 63 तमेऽध्याये पाशुपतं ज्ञानं वर्ण्यते, किन्तु तस्य प्रकरणस्योपक्रम एवं क्रियते – शृणु नारद वक्ष्यामि तन्त्रं भागवतं तव।

यज्ज्ञात्ताऽमलया भक्त्या साधयेद् विष्णुमव्ययम्।। (बृ0 ना0 1.63.12)

अत्र पाशुपतं तन्त्रं भागवतनाम्ना, भगवान् शिवश्च विष्णुनाम्नाऽमिधीयते। शिवनारायणयोरैवयप्रतिपादिका सैष दृष्टिर्न केवलं कूर्मपुराणे, माहभारतादिष्वन्येषु पुराणेषु च सर्वत्राप्रतिहता विराजते।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा।। (वि0 पु0 6.5.74)

इत्येवं षड्मिरेभिर्गुणैरन्वितो भगवानित्युच्यते विष्णुपुराणे बौद्धेषु तन्त्रेषु च, व्यूहवासुदेवश्च पांचरात्रागमेषु।

सर्वज्ञता तृप्तिरनादिबोधः।
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्विधिज्ञाः
षडाहुरङ्गानि महेश्वरस्य। (12.13)

इति च माहेश्वरं षाड्गुण्यं वर्ण्यते वायुपुराणे। भक्तिस्तोत्रकारोऽवधूतसिद्धोऽपि गायति –

ऐश्वर्यमप्रतिहतं सहजो विराग –
स्तृप्तिर्निसर्गजनिता वशितेन्द्रियेषु।
आत्यन्तिकं सुखमनावरणा च शक्ति–
र्ज्ञानं च सर्वविषयं भगवॅस्तवैव।। 36।।

वैष्णव्यां शैव्यां च दृष्टौ समन्वयाधायकः काश्मीरक उत्पलवैष्णवः – "भेदः सर्वज्ञतादीनां ज्ञानादीनां च नास्त्यमी" (पृ0 103) इत्यादिना स्पन्दप्रदीपिकायां शैवेषु सर्वज्ञतादिषु वैष्णवेषु ज्ञानादिषु च गुणेषु सामंजस्यमुन्मीलयति। सेयं सामंज–स्याधायिका दृष्टिः पुराणेष्वपि सर्वत्राऽव्याहता प्रसरतीत्यनुपदमेवोक्तम्। अस्यां स्थितौ पुराणेषु शेववैष्णवादिसम्प्रदायदृष्टीनामुद्भावनं बुद्धिविलसितप्रायमेव मन्तव्यम्।

लाकुलादिशस्त्राणां [24]मोहकत्वमित्यत्र ब्रह्मसूत्रतर्कपादव्याख्यातृणां प्रभावः, मायावादमसच्छात्राभित्यत्र च दाक्षिणात्यानां वैष्णवानां प्रभावोऽन्वेषणीयः। मायावाद–स्यासच्छास्त्रत्वं नाद्याप्युरीक्रियते, यद्यप्याधुनिकास्तत्र बौद्धदर्शनप्रीाावं गवेषयन्ति। एवमेव पांचरात्रपाशुपताद्यागमानां मोहकत्वं नाद्यापि केनाप्यङ्गीक्रियते, प्रत्युत तेषु तेषु पुराणेषु स्मृतिनिबन्धेषु च तत्रत्या विषया व्यूहवाद–षाड्गुण्यवादादयो

विधिमुखेनैव वर्णिताः।

अतिमार्गशास्त्राणि

शैवशाक्ताद्यागमान्तर्गतानां कौलिकादिमतानां मोहकत्वं प्रत्युतावश्य–मेवाङ्गीकार्यम्। सत्यं कौलमतप्रायं वज्रयानमारूढा बौद्धा मोहग्रस्ता भगवतो बुद्धस्योपदेशान् सर्वथा विस्मृत्य विलयं गता भारते वर्षे। "जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्यमहान् व्यतिक्रमः" (1.5.15) इति श्रीमद्भागवतीये पद्ये कौलिकेषु वज्रयानीयेषु च तन्त्रेषु प्रदर्शिता [25]अर्घ्य– निष्पादनमुखा विधयः समालोचिता इव दृश्यन्ते। अतएव धर्मशास्त्रीयनिबन्ध– कारेण वल्लालसेनेन केषंचान पुराणोप–पुराणादीनामपि प्रामाण्यश्रौते स्मार्ते च कर्मणि हेतुप्रदर्शनपुरस्सरं सर्वथा परिहृतम्। सर्वात्मशम्भुना [26]विरचिते सिद्धान्तप्रकाशिकाख्ये ग्रन्थे कामिकाद्यागमप्रामाण्येन लौकिक– वैदिक – आध्यात्मिक–अतिमार्ग–मान्त्रभेदेन पञ्चधा विभक्तानि शास्त्राणि पुनः प्रत्येकं पंचधा विभज्य पंचविंशतिभेदात्मकानि निदर्शितानि। अतिमार्गविभागेऽत्र पाशुपत– कापाल– महाव्रतानां शाक्त–सन्त्राणां कौलयामलादिशास्त्राणां च समावेशो दृश्यते। तेनातिमार्गशास्त्रत्वेन तदेतेषां प्रामाण्यमङ्गीकर्तव्यम्। अतिमार्गपद–व्युत्पत्तिश्चात्र स्वच्छन्द तन्त्रे (11.182–183) निदर्शिता।

शाक्ततन्त्राण्यपि नार्वाचीनानि

एतेन सर्वेषां शाक्ततन्त्राणामप्रामाण्यमर्वाचीनत्वं वा न साधयितुं शक्यते। ब्रह्माण्डपुराणान्ते वर्तमानस्य ललितोपख्यानस्य खिलभागत्वं भवतु नाम। मत्स्यपुराणे (13.26–54) देवीभागवते च स्थलद्वये (7.30.55–84;7.38.5–31) स्थापिताऽष्टोत्तरशत–पीठनामावली मध्यभागसंनिविष्टा नैव तथा कल्पयितुं शक्यते। [27]मार्कण्डेयपुराणे देवीमाहात्म्यम्, कूर्मपुराणे च देव्या अष्टोत्तरसहस्रनामस्त्रोत्रं तदङ्गभूतमेव मन्तव्यम्। सप्तशतीपाठाङ्गतया स्वीकृतस्य कीलकस्तोत्रस्य विशुद्धज्ञानदेहायेत्याद्यः श्लोकः श्लोकवार्त्तिकस्य भट्टकुमारिलकृतस्य मङ्गलश्लोकतां धत्ते। "सर्वमङ्गलमाङ्गल्ये" (11.7) इत्यादिकोदुर्गासप्तशतीश्लोकः 608 तम– ई0 वत्सराङ्किते दाधिमती (मातृ) शिलालेखे "देवीं दाधिमतीं विज्ञापयति" इत्युक्त्वा समुट्टङ्क्यते। षष्ठशताब्दीभवेन महाकविना सुबन्धुना [28]वासवदत्तयाम् – "भिक्षुकीव तारानुराग–रूपाम्बरधारिणी भगवती सन्ध्या समदृश्यत 'इत्येवं बौद्धानां देवी भगवती तारा स्मर्यते। उदयपुरस्ये पुरातत्त्वसंग्रहालये संरक्षिते 490 तम0 ई0 वर्षे समुत्कीर्णे उदयपुरमण्डलान्तर्गते छोटी सादड़ी इत्याख्यस्थान समीपवर्तिनि गिरौ चित्रकूट (चितौड़) दुर्ग निकषा वर्तमाने भ्रमराम्बामन्दिरस्य गर्भगृहे स्थापिते [29]शिलालेखे भगवती भ्रमराम्बा स्तूपते , या हि भ्रामरीति नाम्ना दुर्गासप्तशत्यां (11.55) स्मृता। एवं च पुराणेषु शैवाः, वैष्णवाः, शाक्ताश्व आगमाः प्रायः प्रामाण्यमुखेनैवोपन्यस्ता इत्येव युक्तियुक्तं प्रतिभाति।

न चेदं पुराणरचनाकार्यं पांचरात्र – पाशुपत– शाक्ताद्यागमतन्त्रानुयायिभिः

कृतम्। वैदिके वाङ्मये परमश्रद्धालुभिरागमानुशीलनपरायणैः पौराणिकैः स्मार्त–धर्मप्रतिष्ठापनप्रवणैः शिवनारायणयोरैक्यमित्येवंप्रायां समन्वयात्मिकां दृष्टिमुन्मीलय–द्भिस्तदिदं महत्कार्यं सम्पादितम्। तदत्र वायुपुराणस्य कानिचन वचनानि विशेष–तोऽवधेयानि सन्ति – ''पुराणे संप्रवक्ष्यामि ब्रह्मोक्तंवेद संमितम्। धर्मार्थन्याय–संयुक्तैरागमैः सुविभूषितम्।।' (1.19) इति ''योगधर्मा बहुविधाः सांख्या भागवतास्तथा। ...... ब्राह्मं शैवं वैष्णवं च सौरं शाक्तं तथार्हतम। षड् दर्शनानि चोक्तानि स्वभांव नियतानि च।।'' (104.14.16) इति, ''नातः परतरं किंचिन्निगमागमयोरपि'' (104. 54) इति च। वायुपुराणसदृशानां प्राचीनानां पुराणानामेभिर्वचनैस्तेषां निगमागमानु–वर्तित्वमिव स्वतन्त्रं वैशिष्टयमपि सममेव ख्याप्यते। इमानि चात्र समुपास्यन्ते समन्वयात्मिकायाः परमोदाराया भारतीयायाः संस्कृतेर्जीवातुभूतानि त्रीणि वचनानि बौद्ध–जैन–वैदिकदृष्टीनां प्रतिनिधिभूतानि–

तापाच्छेदाच्च निकषात् सुवर्णमिव पण्डितैः।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात्।।
पक्षपातो न मे वीरे न द्वेषः कपिलादिषु।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः।।

आगमादनुमानाच्च प्रत्यक्षादुपपत्तितः।
परीक्ष्य निपुणं भक्त्या श्रद्धातव्यं विपश्चिता।।

टिप्पण्यः

1. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी (भा० 1, पृ० 15) द्रष्टव्या।

2. अभिनवगुप्तेन तन्त्रालोके (28.313) अनन्तकारिका स्मर्यते। भगवता शेषेण पृथ्व्याधारभूतेन सोपदिष्टा। सा परमार्थसारनाम्ना सांख्य–वेदान्त–वैष्णवदर्शनग्रन्थत्वेन प्रसिद्धा सटीका मुद्रितोपलभ्यते। तदाधारेणाभिनवगुप्तः परमार्थसाराख्यं शैवग्रन्थं जग्रन्थ। तत्र तृतीये श्लोकेऽभिनवगुप्तोऽनन्तकारिकामेव आधारकारिकानाम्ना स्मरति, 'स्वशास्त्रे चाप्यहीशानो विश्वाधारधुरन्धरः (28.309) इति च स तन्त्रालोकेऽनन्तं सादरं स्मरति। अतोमहाभाष्ये गवेषणीयमेतद्वचनम् पातंजलयोगसूत्राणामपि कर्ता भगवान् शेषावतारभूतोऽनन्तः पतंजलिरेवेति भारतीया परम्परा। 'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन। योऽपाकरोत् तं प्रवरं मुनीनां पतंजलिं प्रांजलिरानतोऽस्मि।।'' इति वचनमत्र प्रमाणम्। वैद्यकपदेन चरकसंहिताऽत्रगृह्यते। तदिदं वाक्यं योगभाष्ये व्यासकृते (1.7) आनुपूर्व्या समुपलभ्यते।

3. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामेव तृतीये भागे सर्वमेतद् द्रष्टव्यम्।

4. शास्त्राणामेषां प्रामाण्यादिकमनुपदमेव चिन्त्यते।

5. पुण्यपत्तन (पूना) स्थवेदशास्त्रोत्तेजकसभया शताब्दीस्मारकग्रन्थत्वेन

प्रकाशिते 'प्राचीनभारतीय विद्येचे पुनर्दर्शन'' इत्याख्ये ग्रन्थे (पृ0 181–196) द्रष्टव्योऽयं निबन्धः।

6. हयशीर्षपंचरात्रस्य आदिकाण्डस्य भागद्वयात्मकं संस्करणं 'वारेन्द्र रिसर्च सोसाइटी'' इति संस्थथा साम्प्रतं बंगलादेशीयराजशाही नगरस्थया सन् 1952, 1956 इति ई0 वत्सरयोः प्रकाशितम्।

7. अस्य ग्रन्थस्य साम्प्रतं संस्करणत्रयमुपलभ्यते। देवकोट्टैनगरतः 1931 ई0 वर्षे प्रकाशितं प्रथमम्, काश्मीरग्रन्थावल्यां 1947 ई0 वर्षे प्रकाशितं द्वितीयम्, पांडीचेरीतश्च भागत्रयेषु (1963, 68,77 ई0) प्रकाशितं तृतीयम्। अत्र पृष्ठसंख्या काश्मीरसंस्करणस्य द्रष्टव्या।

8. इण्ट्रोडक्शन टू दि पांचरात्र एण्ड दि अहिर्बुध्न्यसंहिता'' (पृ0 5–11) इत्याख्यस्तस्य ग्रन्थोऽवलोकनीयः।

9. लीलावत्याख्यः शिवागमः शिवागमोपागमसूचीषु न दृश्यते। पांडीचेरी–संस्करणेऽप्यस्य परिचयो नैव दत्तः। डॉ0 आर0 सी0 हरजरामहोदयः स्टडीज इन उपपुराण्स'' इत्यस्य ग्रन्थस्य प्रथमे भागे (पृ0 13) एकाभ्रपुराणीयोपपुराणनामावल्यां लीलावतीपुराणं निर्दिशति, द्वितीये च भागे (पृ0 626–627) नाद्याप्यस्य कुत्राप्युद्धरणा–दिकमुपलभ्यत इति वक्ति। शिवधर्म–शिवधर्मोत्तरप्रभृतीनामुपपुराणानां नामान्युपागमेषु दृश्यन्ते। तेन केषांचनोपा गमानामुपपुराणेषु समावेशः समजायत गच्छता कालेनेति वक्तुं शक्यते।

10. वैरोचनशिवाचार्यविरचितोऽयं ग्रन्थो भागद्वयात्मको नेपालराजकीय–पुस्तकालय–काठमांडुतः 2023, 2025 वैक्रमाब्दयोः प्रकाशितः।

11. चित्रकूट (चित्तौड़) दुर्ग निकषा घोसुण्डीनामके ग्रामे समुपलब्धे प्राचीने ब्राह्मीलिप्युत्कीर्णे शिलाशासने सशिलाप्रकारा वाटिका वासुदेवसङ्कर्षणाभ्यां समर्पितेति वर्ण्यते। सात्वतसंहिता च पांचरात्रीया निर्दिशति – "यः सप्राकारमारामं संप्रयच्छति वै विभोः। नानापुष्पफलोपेतं वापी द्रुमसमाकुलम्। साब्जतोयाशयोपेतं नक्रखड्ग–समन्वितम्। सनन्दनवने भोगान् भुक्त्वा यात्यच्युतालयम्।।'' (25.366–367) इति। सात्वतसंहिताया उपोद्घातोऽस्मदीयोऽत्र द्रष्टव्यः। (पृ07)।

12. कुमारदेवोऽयं गुर्जरदेशे चालुक्यराजसंस्थापकस्य भूलराजस्य नृपतेर्गुरूः कुमारशिवः प्रतीयते, येन हि सिद्धपुरे सहस्रौदीच्या नुदीचीलः समाहूय स्मार्त–धर्मप्रतिनिधिभूतो रूद्रमहालयाख्यो देवप्रासादः (1090 ई0) प्रतिष्ठापितः।

13. देवसालपुरीशिवागमासिद्धान्तपरिपालनसंघेन प्रथमे भागे तत्त्वप्रकाश तत्त्वसंग्रह–तत्त्वनिर्णयाख्याः सव्याख्या ग्रन्थाः 1923 ई0 वर्षे, द्वितीये च भागे रत्नत्रय– भोगकारिका – नादकारिका – मोक्षकारिका– परमोक्षनिरास–कारिकारव्याश्च सव्याइत्या ग्रन्थाः 1925 ई0 वर्षे वाणीविलासमुद्रणालये मुद्राप्याऽष्टप्रकरणनाम्ना प्रसिद्धिमानीताः। अत्र प्रथमचतुर्थषष्ठान् विहाय शिष्टाः

सर्वे ग्रन्थाः सद्योज्योतिः शिवाचार्यप्रणीताः सन्ति। शिवदृष्टिकारसोमानन्दतोऽपि प्राचीन एष आचार्यः। अष्टप्रकरणस्य परिष्कृतं संस्करणं वाराणसीतः 1988 ई0 वर्षे प्रकाशितम्। अत्र कुमारदेवकृता तत्त्व प्रकाशतात्पर्यदीपिका विशेषतः समावेशिता आस्ते। उपोद्घातोऽत्रत्यो विशेषपरिचयाय द्रष्टव्यः।

14. स्टडीज इन दि पुराणिक रिकार्डस ऑन हिन्दु राइट्स एण्ड कस्टम्स'' इत्याख्यस्तस्य ग्रन्थो द्रष्टव्यः। (अ0 5, पृ0 260–264) डॉ0 करुणा एस0 त्रिवेद्विना ''कूर्मपुराणः धर्म और दर्शन ''इत्याख्ये ग्रन्थे नैकत्र (पृ0 42–46, 307–8 इत्यादिषु स्थलेषु ग्रन्थ एष समालोचितः।

15. ''तन्त्रागमीय धर्म–दर्शन' इत्याख्योऽस्मदीयो ग्रन्थो द्रष्टव्यः (पृ0 784)

16. वायुसंहितायाः पूर्वभागे (23.11) द्रष्टव्यमेतत्।

17. वराहपुराणे (71.54–56) सिद्धान्तागमीया निःश्वाससंहिता स्मर्यते। अत्रोभयोः समानानुपूर्वीकाः श्लोकाः स्युरिति संभावयामः (सप्तमाष्टमशताब्दी भवस्य बौद्धसिद्धस्य पद्मवज्रस्य गुह्यसिद्धावपि (8.12) तदेन्नत्राम दृश्यते।)

18. परमोक्षनिरासकारिकाव्याख्यानं (श्त्रो) 3 तस्य द्रष्टव्यम्।

19. स्वच्छन्दतन्त्रं (10.1134–35) तद्वयाख्यानं चावलोकनीयम्।

20. वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित् समम्।। श्रुत्यर्थैरध्यवसितं पशुपाश–विमोक्षणम्। सर्वेषामाश्रमाणां तु मया पाशुपतंव्रतम्। उत्पादितं शुभं दक्ष सर्वपापविभोक्षणम्। (31.294–93) इत्यत्र पाशुपतव्रतस्य पशुपाशविमोचन–पूर्वकपतित्वसम्पादकत्वं वर्ण्यते।

21. ''शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः'' (1.9) इति हि योगसूत्रे विकल्पलक्षणमुदीर्यते।

22. 'नलिनीपत्रसंहत्यां सूक्ष्मसूच्यभिवेधने। दले दले तु यः कालः स कालो लववाचकः।।'' (1.29) इत्येवं प्रपंचसारे लववाचकस्य सूक्ष्मतमस्य कालस्य लक्षणं वर्ण्यते।

23. डॉ0 हाजरामहोदयः पूर्वोक्तेग्रन्थे कूर्मपुराणविवरणप्रसङ्गे (पृ0 64) प्रतिपादयत्येतत्।

24. 'अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनानि तु वेदवादविरूद्धानि मयैव कथितानि तु ''वामं सोमं पाशुपतं लाकुलं चैव भैरवम्।'' (2.27.145–46) इत्यादिना कूर्मपुराणदिषु।

25. उभयसामरस्यसमुत्थः कुण्डगोलकाख्यो द्रव्यविशेषोऽर्ध्यत्वेन परिकल्प्यते (तन्त्रालोकविवेके 15.166)। स्वयम्भुकुसुमादीनि चात्र पूजायामुपादीयन्ते। जुगुप्सुतानि तान्येतानि कर्माणि।

26. ग्रन्थोऽयं काशीजङ्गमवाडीमठस्थित–शैवभारतीशोधप्रतिष्ठानतः 1996 तम–ईशवीययवत्सरे प्रकाशितः। विशेषजिज्ञासुभिः प्रस्तावनाऽत्रत्या द्रष्टव्या।

27. ''अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः'' (1.74) इति दुर्गासप्तशतीपद्येऽर्धमात्राया अनुच्चार्यत्वमुच्यते। प्रणवादिपिण्डमन्त्रेषु स्थितानाम–र्धचन्द्रादिसमनान्तानां ध्वनीनामर्धमात्रात्मकत्वमनुच्चार्यत्वं च शैवशाक्तागमेषु सविशेषं प्रतिपाद्यते। तेन तत्प्रतिपादकानां तन्त्राणां दुर्गासप्तशतीतः पूर्वं स्थितिरवश्यमेव स्वीकार्या।

28. 'दी कल्ट आफ तारा'' (पृ. 7) इत्याख्यो ग्रन्थोऽवलोकनीयः।

29. शिलालेखस्य परिचयः 'एपिग्राफिया इण्डिका'' इत्याख्यपत्रिकाया 30 तमवर्षीये चतुर्थेऽङ्के 130–27 पत्रेषु प्राप्तव्यः।

सांख्यसिद्धान्ते शब्दस्य प्रामाण्यं तत्स्वरूपञ्च

डॉ.अमलधारी सिंहः

'आत्मा वा अरे द्रष्टव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इति श्रुतिवचनम्। दर्शनशब्दस्य अर्थोऽप्यस्ति आत्मस्वरूपसाक्षात्कारः। यस्मिन् विज्ञाते सर्वं विज्ञातं भवति। 'यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते'। ज्ञानस्य सर्वाधिकं महत्वपूर्णं स्थानमस्ति। इदं तु पवित्रतमम्

'नहि ज्ञानेन सदृशं पवित्रमिह, विद्यते (गीता 4.38) तथा सर्वविधज्ञानेषु आत्मज्ञानं तु श्रेष्ठं विद्यते। सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। (मनु0 12–85) ज्ञानास्य ह्येषा पराकाष्ठा यदात्मैकत्वविज्ञानम्।

सांख्यसिद्धान्ते ज्ञानस्य विशिष्टो महान् महिमा विद्यते –

ज्ञानं च लोके यदिहास्ति किंचित्।
सांख्यागतं तच्च महन्महात्मन्।।
नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्।
अत्र ते संशयो मा भूज्ज्ञानं सांख्यं परं मतम्।
एकमेव दर्शनं ख्यातिरेव दर्शनम्।

अस्मात्कारणात् सांख्यं तु मोक्षदर्शनमस्ति – मोक्षमध्यापयामास सांख्य–ज्ञानमनुत्तमम्।

सांख्यशब्दस्य अर्थोऽपि विद्यते आत्मज्ञानम्। सांख्यम् आत्मज्ञानम्। सांख्यं सम्यगात्मबुद्धिः।

शुद्धात्मतत्वविज्ञानं सांख्यमित्यभिधीयते।

इदमात्मज्ञानं सांख्यज्ञानं दुःखत्रयमोचकं पुरुषार्थसंपादकं परमं पवित्रमस्ति। इदं रहस्यात्मकमपि पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्। एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।। इति आचार्येश्वरकृष्णः

सांख्यं तु प्रमेयशास्त्रम्। प्रकृतिपुरुषौ द्वावेव प्रमेयौ। प्रमेयाणां सिद्धिर्ज्ञानं भवति प्रमाणैः इति प्रमेयशास्त्रत्वादपि दृष्टमनुमानम् आप्तवचनं च त्रिविधं प्रमाणमत्र स्वीकृतमस्तिं। पं0 वाचस्पतिमिश्रमहोदयैः आचार्यविज्ञानभिक्षुमहोदयैरेषां प्रमाणानां सुविशदरूपेण निरूपणं कृतमस्ति। एषु प्रमाणेषु अनुमानान्तर्गत– सामान्यतोदृष्टाद् अनुमानाद् द्वयोः प्रमेययोः प्रकृतिपुरुषयोः सिद्धिर्ज्ञानं भवति। आप्तागमात् शब्दप्रमाणात् 'स्वर्गापूर्वदेवतादौ च सिद्धिर्भवति। एवं शब्दप्रमाणस्य प्रमेयत्वं विरलं वर्ततेत्र।

आप्तश्रुतिराप्तवचनम्। अत्र आप्तवचनं शब्दप्रमाणम्। आप्तश्रुतिरस्य लक्षणम्। आप्ताः आचार्याः ब्रह्मादयः, श्रुतिर्वेदः, आप्ताश्च श्रुतिश्च, आप्तश्रुतिः इति गौडपादाचार्यः आप्ता ब्रह्मादयः आचार्याः श्रुतिर्वेदस्तदेतद् उभयम् आप्तवचनम्। आप्तिः साक्षादर्थप्राप्तिर्यथार्थोपलम्भः तथा वर्तत इत्याप्तः साक्षात्कृतधर्मा इति आचार्यमाठरः। आप्ता प्राप्ता युक्ता इति। आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः। श्रुतिः वाक्यजनितं वाक्यार्थज्ञानम्। एवं वाक्यश्रवणेन जनितः बुद्धेः विषयाकारपरिणामः आगमः। एवमत्र चित्तवृत्तिरेव प्रमाणं तथा अस्याः चित्रवृत्तेः फलं यः पौरुषेयः पुरुषवर्ती बोधः पुरुषबोधः सः प्रमा, प्रमाणफलम्। 'असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः प्रमाणं बोधश्च पौरुषेयः फलं प्रमा। इति वाचस्पतिमिश्राः।

अत्र सर्वाणि वाक्यानि न आप्तानि प्रमाणभूतानि अपितु वेदवाक्यानि। वेदास्तु अपौरुषेयाः एवं सकलदोषविनिर्मुक्ताः सन्ति। एवं वेदमूलकं स्मृतीतिहास–पुराणवाक्यमपि युक्तं दोषरहितम् आप्तम्।

परमर्षिकपिलदेवेन प्रोक्तं सर्वमपि वचनं युक्तमाप्तमस्ति। परम्पराप्राप्तानि आसुरिपंचशिखादि– आचार्याणां वचनानि अपि युक्तानि आप्तानि सन्ति। अतः प्रामाणिकानि सन्ति।

वेदमूलकत्वात् सांख्यदर्शनस्य वेदेषु महती श्रद्धा विद्यते। वेदास्तु सन्ति अपौरुषेयाः। ऋषयो मन्त्रद्रष्टारः, न मन्त्रकर्तारः। ऋषिर्दर्शनात् साक्षात्कृतधर्माण ऋषयो बभूवुः। तपसाऽध्यवसायेन साक्षात्कृतं प्रत्यक्षीकृतं ज्ञानमेव श्रुतिः। एवमत्र प्रामाण्यम्। अत्र स्वतःप्रामाण्यमभिमतमस्ति। स्वप्रामाण्यहेतोः कस्यापि अन्यस्य प्रमाणस्य अपेक्षा नास्ति। इदं निरपेक्षं स्वतन्त्रं प्रमाणम्।

एवं प्रमाणेषु शब्दप्रमाणं ज्येष्ठं विद्यते। यतोहि प्रत्यक्षीकृतं ज्ञानमेव श्रुति–द्रष्टुर्वचनं श्रुतिः।

एवमत्र आत्मनः पुरुषस्य प्रमुखप्रमेयस्य सिद्धिस्तु भवति सामान्यतोदृष्ट–प्रमाणेन। परन्तु शब्दप्रमाणेन इदमात्मतत्त्वं तु सिद्धं विद्यते। चिन्मयो नित्यशुद्धबुद्ध–मुक्तस्वभावोऽयं पुरुषः।

आत्मा वा अरे द्रष्टव्यः इति श्रुतिवचनं सिद्धं भवति।

द्वितीयार्थे व्याकरणमीमांसयोः तुलना

- डॉ. एन् . आर्. रङ्गनाथताताचार्यः

भाट्टरहस्योक्तरीत्यानव्यनैयायिकमतानुवादः तत्समालोचनं च

"[1]कर्मणि द्वितीया" इति सूत्रात् कर्मत्वं द्वितीयार्थः । तत्र नव्यनैयायिकाः धात्वर्थानधिकरणत्वे सति धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति वदन्ति । ओदनं पचतीत्यादौ विक्लृत्त्यादिरूप-फलावच्छिन्नव्यापारः धात्वर्थः । तत्र फलमोदनवृत्ति, व्यापारश्च देवदत्तादिवृत्तीति धात्वर्थानधिकरणोदनादिवृत्तित्वं विक्लृप्तिरूपफलस्य धात्वर्थतावच्छेदकस्य अस्तीति लक्षणसमन्वयः । चैत्रो ग्रामं गच्छतीत्यादौ संयोगानुकूलव्यापाररूपगमनजन्यफलस्य संयोगस्य ग्राम इव चैत्रेपि सत्त्वात् धात्वर्थतावच्छेदक-फलशालित्वमात्रस्य कर्मत्वे चैत्रपदोत्तरमपि द्वितीयापत्तिः । अतः धात्वर्थानधिकरणत्वे सतीति विशेषणं देयम् । तथा सति चैत्रस्य संयोगानुकूलव्यापाररूप धात्वर्थाधिकरणत्वात् तदनाधिकरणत्वं नास्तीति न तदुत्तरं द्वितीयापत्तिः । धात्वर्थानधिकरणत्वे सति क्रियाजन्यफलशालित्वं कर्मत्वमिति यदि लक्षणमुच्यते तदा वृक्षात् भूमौ पर्णम् पततीत्यत्र पतनक्रियाजन्यसंयोगरूपफलस्य भूमौ सत्वात् तदुत्तरं द्वितीयापत्तिः । एवं विभागरूपफलाश्रयत्वात् वृक्षपदोत्तरमपि द्वितीयापत्तिः स्यात् । उभयोः धात्वर्थानधिकरणत्वमस्तीति तत्र अतिव्याप्तिः । अतः तद्वारणाय प्रकृतधात्वर्थताव-च्छेदकं सत् प्रकृतधात्वर्थरूपक्रियाजन्यं यत् फलं तच्छालित्वं कर्मत्वमिति विवक्षणीयम् । तथासति पततेः किञ्चित् फलं न धात्वर्थतावच्छेदवमिति न तत्रातिव्याप्तिः । धात्वर्थतावच्छेदकफलशालित्वमित्यत्र फलपदमपि धात्वर्थरूपक्रियाजन्यफलपरं, तेन धात्वर्थे फलावच्छिन्नव्यापारे विशेषणीभूतस्य व्यापारत्वस्य धात्वर्थतावच्छेदकत्वस्य सत्वेपि क्रियाजन्यत्वाभावात् न तदादाय तच्छालित्वेन व्यापारे अतिव्याप्तिः । व्यापारत्वस्य धात्वर्थक्रिया-जन्यफलत्वाभावात् । तथा च धात्वर्थाऽनधिकरणत्वे सति क्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति निष्कृष्टलक्षणम् ।

अथैवं सति ग्रामं गमयति चैत्रो मैत्रमित्यत्र मैत्रे कर्मत्वलक्षणस्य अव्याप्तिः । मैत्रस्य गमनरूप-धात्वर्थाधिकरणत्वात् , धात्वर्थानधिकरणत्वाभावात् । यदि अत्र "[2]सनाद्यन्ता धातवः" इति वचनात् णिजन्तस्य धातुत्वमभ्युपेत्य णिजन्तगमिधात्वर्थस्य गमनानुकूलव्यापारस्य चैत्र एव सत्वात् मैत्रे अभवात् न अव्याप्तिः । णिजन्तधात्वर्थतावच्छेदकस्य गमनाख्यफलस्य मैत्रे सत्वेन धात्वर्थतावच्छेदकफल-शालित्वरूपविशेष्य दलस्यापि मैत्रे सत्वेन न तत्र अव्याप्तिः ।

अथ उक्तस्थले णिजन्तोपि धातुः गमिरपि धातुः । तत्र गम्धात्वर्थसंयोगरूपफलशालित्वं ग्रामे अस्तीति ग्रामस्य गमिकर्मत्वं उपपद्यते इति चेत् तथासति पाचयति चैत्रो मैत्रेण इत्यत्र मैत्रस्यापि

---

१. पा.सू. २.३.२ ।

२. पा.सू. ३.१.३२ ।

पचिधातुकर्मत्वापत्तिः । तत्र इष्टापत्या परिहारो दुर्घटः । ''गतिबुद्धिप्रत्यवसानार्थशब्द-कर्माऽकर्मकाणामणिकर्ता स णौ' इति सूत्रेण गत्यादीनां धातूनामण्यन्तानां यः कर्ता सः ण्यन्तानां कर्मेत्यर्थकेन गत्यादिभिन्नधातुयोगे कर्मसंज्ञा निषिध्यते । तथा च पाचयति चैत्रो मैत्रेण इत्यत्र पच् धातोः अण्यन्तावस्थकर्तुः मैत्रस्य ण्यन्तावस्थायां कर्मसंज्ञा नास्तीति निषेधः णिजर्थस्य अकर्मकत्वं सूचयति, तेन मैत्रस्य प्रयोज्यकर्तुः णिजुत्तराख्यातेन अनभिधानात् तृतीयैव ।

परसमवेतत्वं द्वितीयार्थः

अत तत्तत् क्रियाव्यक्तिभेदेन तत्तत्कर्मत्वानां भिन्नत्वात् (अनन्तत्वात्) द्वितीयायाः कर्मत्वरूपार्थे शक्तिग्रहः नोपपद्यते । अतः लाघवेन वृत्तित्वे अभावे च द्वितीयायाः शक्तिः । संयोगादिरूपफलस्य तदवच्छिन्नव्यापारस्य च धातुत एव लाभात् न तत्र शक्तिकल्पना । तथा च ग्रामं गच्छतीत्यत्र द्वितीयार्थः वृत्तित्वं धात्वर्थतावच्छेदके संयोगरूपफले अन्वेति । तादृशसंयोगरूपफलजनकं गमनम् (संयोगानु-कूलव्यापारः) । तत्र द्वितीयार्थः अभावश्च प्रतियोगितासंबन्धेन अन्वेति । ग्रामादिप्रकृत्यर्थः द्विविधेपि द्वितीयार्थे अन्वेति । इत्थं च ग्रामनिष्ठसंयोगानुकूलव्यापारा-भावप्रतियोगिग्रामवृत्तिसंयोग-जनकव्यापारः (गमनं) तदनुकूलकृतिमान् चैत्रः इति शाब्दबोधः । यदि गमनात्यन्ताभावोऽपि गमनकाले असम्भाविततया तत्कालावच्छेदेन चैत्रे अभावात् गमनात्यन्ताभावस्य कालिकाव्याप्यवृत्तित्वमेवेति विभाव्यते, तदा परसमवेतेति अन्योन्याभावघटितलक्षणमादाय भेदः द्वितीयार्थः, प्रतियोगितासमवायोभय-घटितसामानाधिकरण्यसम्बन्धेन तस्य धात्वर्थे गमने अन्वयः । इत्थं च ग्रामानुयोगिकभेदप्रतियोगि-कर्तृसमवेतः (चैत्रादि समवेतः) ग्रामवृत्तिसंयोगजनकः यः व्यापारः तदाश्रयः चैत्रः इति शाब्दबोधः ।

अथ गमनकालावच्छेदेन चैत्रस्य गमनवत्त्वात् गमनवद्भेदासंभवेपि गमनरहितकालावच्छेदेन गमनरूपक्रियायाः परिच्छिन्नकालावच्छिन्नत्वात् (अव्याप्यवृत्तित्वात्) गमनवद्भेदस्यापि गमनाश्रयकर्तरि संभवापत्त्या स्वं गच्छतीति प्रयोगापत्तिः । अतः द्वितीयार्थो भेदः अभावीयविशेषणतासमवयोभय-घटितसामानाधिकरण्यसम्बन्धेन धात्वर्थे व्यापारे अन्वेति । प्रकृत्यर्थः ग्रामः द्वितीयार्थे भेदे प्रतियोगिता-सम्बन्धेनान्वेति । ततश्च ग्रामप्रतियोगिकभेदाश्रयचैत्रादिसमवेतग्रामवृत्तिसंयोगानुकूलव्यापारवान् चैत्रः इति बोधः । अत्र धात्वर्थस्य व्यापारस्य समवायेन चैत्रादिकर्तृवृत्तित्वात् तत्र ग्रामभेदस्याभावीयविशेषणता-रूपस्वरूपसम्बन्धेन विद्यमानत्वाच्च द्वितीयार्थभेदविशिष्टत्वमुक्तसामानाधिकरण्येन व्यापाररूपधात्वर्थस्य संपद्यते । आधेयत्वस्य द्वितीयार्थत्वे सप्तम्यर्थस्यापि आधेयत्वापरपर्यायवृत्तित्वात्मकतया तुल्यार्थकत्वेन द्वितीयासप्तम्योः भेदो न स्यादिति चेन्न, द्वितीयार्थस्य वृत्तित्वातिरिक्तभेदाद्याधिक्यात् । अपि च द्वितीयार्थः वृत्तित्वं धात्वर्थतावच्छेदके फले एवान्वेति । सप्तम्यर्थः वृत्तित्वं तु धात्वर्थे, नामार्थे वेति अनयोः भेदः ।

कर्माख्यातस्थले शाब्दबोधप्रकारः

'चैत्रेण ग्रामो गम्यते' इत्यत्र आत्मनेपदेन फलं भेदश्च अभिधीयते, प्रथमान्तपदोपस्थाप्यः ग्रामः आत्मनेपदार्थभेदे प्रतियोगिताकत्वसम्बन्धेनान्वेति । भेदश्च धात्वर्थगमने पूर्वोक्तसामानाधिकरण्यसम्बन्धेन, धात्वर्थगमनं च आत्मनेपदार्थे फले जन्यत्वसम्बन्धेन, फलं च आश्रयतासम्बन्धेन नामार्थे ग्रामे अन्वेति । इत्थं च चैत्रकर्तृकं ग्रामभिन्न(चैत्र)समवेतसंयोगजनकं यद् गमनं तज्जन्यसंयोगरूपफलाश्रयः ग्रामः

१. पा.सू. १.४.५२ ।

इत्येवं शाब्दबोधः ।

पक्वः ओदनः इति कर्मकृत्प्रत्ययस्थले कृत्प्रत्ययार्थः प्रतियोगिभेदः वृत्तित्वं आश्रयश्च । प्रतियोगिरूपकृदर्थे प्रथमान्तार्थस्य ओदनस्य अभेदसम्बन्धेन, प्रतियोगिनः कृदर्थस्य अन्यस्मिन् कृदर्थे भेदे, भेदस्य च धात्वर्थक्रियायां, क्रियायाः च फलद्वारा वृत्तित्वे कृदर्थे, तस्य च वृत्तित्वस्य अपरकृदर्थे आश्रये, आश्रयस्य च अभेदेन पुनः ओदने अन्वयः । तथा च ओदनाभिन्न प्रतियोगिभिन्नपाकजन्य-विक्लत्त्याश्रयाभिन्न ओदनः इति बोधः । ग्रामादिप्रतियोगिनः द्वितीयार्थे भेदे किं प्रतियोगितामात्रेणान्वयः, अथवा अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन? आद्ये स्वस्मिन्नपि चैत्राद्यर्थे चैत्रघटोभयभेदस्य सत्वेन चैत्रस्स्वं गच्छतीति प्रयोगापत्तिः । अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकः भेदः इति व्युत्पत्तेर्भङ्गापत्तिश्च । उक्तदोषनिवारणाय द्वितीयपक्षाङ्गीकारे चैत्रघटोभयभेदस्योभयत्वावच्छिन्नप्रतियोगिता-कत्वात् अन्वयितावच्छेद-ककेवलचैत्रत्वाच्छिन्नप्रतियोगिताकत्वाभावेन चैत्रः स्वं गच्छतीति प्रयोगापत्ति-वारणसम्भवेपि जलं गच्छति जलमित्यत्र अन्वयितावच्छेदकजलत्वावच्छिन्नप्रतियोगिताकभेदस्याभावात् तादृशप्रयोगानापत्तिः । अतः जलपदं जलविशेषे लाक्षणिकं, तथासति धात्वर्थतावच्छेदकफलाश्रयत्वं यादृशजलविशेषस्य तादृशजलविशेष-व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्य तत्र सुलभत्वात् न कश्चिद्दोषः, न वा व्युत्पत्तिभङ्गः । इत्थं च वृत्तित्वं भेदश्च द्वितीयार्थः ।

सविषयकधातुयोगे कर्मत्वस्वरूपविचारः

घटं जानाति, मैत्रः इच्छति, घटस्य ज्ञाता इत्यादौ द्वितीयाषष्ठ्योः विषयत्वे लक्षणा । घटविषयकज्ञानाश्रयः मैत्रः इति बोधः, ज्ञातो घटः इत्यादिकृदन्तस्थले कर्मकृतः विषये लक्षणा, तस्य च घटे अभेदेनान्वयः, ज्ञानविषयाभिन्नो घटः इति बोधः । सविषयकधातुयोगे च भेदो न द्वितीयार्थः "स्वात्मानं जानामि", "आत्मानमात्माना वेत्सि" इत्यादि प्रयोगस्य सम्प्रतिपन्नत्वात् । तथा च नव्यनैयायिकानां सविषयकधातुयोगे विषयत्वादौ लक्षणैवेति हृदयम् ।

नव्यनैयायिकमतनिरासः

वृत्तित्वं भेदश्च द्वितीयार्थः, फलावच्छिन्नव्यापारः धात्वर्थः । सविषयकधातुयोगे विषयत्वादौ लक्षणा इति यदुक्तं तत्रेमा अनुपपत्तयः दृश्यन्ते । द्वितीयार्थस्य धात्वर्थैवकदेशे फले अन्वयाङ्गीकारे "पदार्थः पदर्थेनान्वेतीति" व्युत्पत्तिभङ्गः, द्वितीयार्थभेदस्य अभावीयविशेषणता (स्वरूप) समवायोभय-घटितसामानाधिकरण्यसम्बन्धेन संयोगानुकूलव्यापारात्मकधात्वर्थे अन्वयः । वृत्तित्वरूपद्वितीयार्थस्य धात्वर्थतावच्छेदके फले अन्वयः इति व्युत्पत्तिद्वयकल्पनापत्तिः । एवं ग्रामरूपप्रकृत्यर्थस्यापि प्रत्ययार्थे वृत्तित्वे निरूपितत्वसम्बन्धेन, भेदरूपापरार्थे प्रतियोगितासम्बन्धेन च अन्वय इति व्युत्पत्तिद्वयकल्पनापत्तिः । स्वं गच्छतीति प्रयोगवारणाय भेदः द्वितीयार्थः अथवा समवायः इति विनिगमनाविरहोऽपि प्रसज्यते । चैत्रानुयोगिकधात्वर्थव्यापारप्रतियोगिक समवाये ग्रामस्य स्वप्रतियोगिकभेदवत् वृत्तित्वसम्बन्धेन समवायस्य च साक्षात्सम्बन्धेन धात्वर्थव्यापारे अन्वयः इत्यस्यापि सुवचत्वात् ।

एवं फलावच्छिन्नव्यापार इत्यत्र फलस्य व्यापारं प्रति किं रूपमवच्छेदकत्वं ? धातुशक्यतावच्छेदकत्वं वा, व्यापारे प्रकारत्वं वा, स्वरूपसम्बन्धात्मकं वा, पदार्थान्तरं वा तत्र न तावत् धातुशक्यतावच्छेदकं फलावच्छिन्नव्यापारे विशिष्टे शक्तौ प्रमाणाभावात् फले व्यापारे च खण्डशः शक्त्यङ्गीकारे पदार्थैकदेशान्वयप्रयुक्त

व्युत्पत्तिविरोधोपि न स्यात्। अतः धातुशक्यतावच्छेदकत्वं फलस्यावच्छेदकत्वमिति पक्षः नोपपद्यते। एवं प्रकारत्वं अवच्छेदकत्वमिति पक्षोपि नोचितः। यद्यपि व्यापाररूपे धात्वर्थे विशेष्ये संयोगादिरूपफलस्य धात्वर्थस्य प्रकारत्वेन गच्छतीत्यादौ प्रकारत्वरूपावच्छेदकत्वसम्भवेपि "चैत्रेण पाचयति" इत्यत्र णिजर्थविशेषणीभूते पाके अतिव्याप्तिः। अतः स्वरूपसम्बन्धरूपावच्छेदकत्वमेव फलस्येति वक्तव्यम्। तच्च यदाश्रये द्वितीया धर्मिग्राह प्रमाणेन प्रामाणिकी तत्रैव कल्प्यते। धर्मिग्राहक प्रमाणं च शाब्दव्यवहारातिरिक्तं किमपि नास्ति। अतः तदेव तत्तत्फलावच्छिन्न व्यापारवृत्ति पाकत्वगमनत्वादि तत्तद्धातु शक्यतावच्छेद-कमखण्डोपाधिरूपं कर्मत्वमेव परसमवेतक्रियाजन्य फलशालित्वसमनियतं द्वितीयार्थः इति स्वीकर्तव्यम्। तथा सति द्वितीयायाः वृत्तित्वे, भेदे च शक्तिः धातोश्च फलावच्छिन्नव्यापारे एका, फले व्यापारे च पृथक् शक्तिरिति नानाशक्तीनामकल्पनान्न गौरवमपि भवति।

इत्थं व्यापारमात्रं धात्वर्थः फलं भेदश्च द्वितीयार्थः। द्वितीयार्थे फले प्रकृत्यर्थस्य आधेयतासम्बन्धेन द्वितीयार्थफलस्य च अवच्छेद्यत्वेन जनकत्वेन वा धात्वर्थे व्यापारे अन्वयः। भेदश्च पूर्वोक्तसामाना-धिकरण्यसम्बन्धेन धात्वर्थे व्यापारे अन्वेति इति कैश्चिदुक्तं, तदपि अनेकशक्तिकल्पनापत्त्या गौरवपराहतम्। एवं "ग्रामस्य गन्ता" इत्यादि कर्मणि षष्ठीस्थलेपि अनेकशक्तिव्युत्पत्तिकल्पनं, विनिगमनाविरहश्च दोषः अपरिहार्यः।

"ग्रामो गम्यते" इति कर्माख्यातस्थलेपि आत्मनेपदस्य फले भेदे च शक्तिः। ग्रामस्य प्रथमान्त-पदोपस्थाप्यस्यापि आख्यातार्थे भेदे अन्वयः, प्रत्ययार्थस्य भेदस्य धात्वर्थव्यापारे अन्वयः, धात्वर्थ-व्यापारस्य धातूपस्थापितफलं प्रति विशेष्यभूतस्यापि आत्मनेपदार्थे फले जन्यत्वसम्बन्धेनान्वयः। तस्य च फलस्य आश्रयतासम्बन्धेन प्रथमान्तपदोपस्थाप्ये ग्रामे अन्वयः। तथा च ग्रामप्रतियोगिक-सामानाधिकरण्यसम्बन्धावच्छिन्नभेदीयानुयोगिताकधात्वर्थव्यापारजन्यफलाश्रयः ग्रामः इति बोधः फलतीति यदुक्तं, तत्रोच्यते–आत्मनेपदस्य फलाश्रयो ग्रामः इत्यंशे (फलरूपार्थस्य) प्रकारतया बोधजनकत्वं, (भेदरूपार्थस्य) विशेष्यतया बोधजनकत्वं, एवं ग्रामपदस्य आत्मनेपदार्थभेदं प्रति प्रकारतया बोधकत्वं, आत्मनेपदार्थफलं प्रति विशेष्यतया बोधकत्वं च युगपद्विरोधात् विशेषणता–वच्छेदकप्रकारकनिश्चयासम्भवेन पूर्वोक्तविशिष्ट वैशिष्ट्यावगाहिबोधानुपपत्तिः। यदि युगपदेव प्रकारतया बोधासम्भवे क्रमेण बोधं जनयति, तथासति नोक्तानुपपत्तिः। प्रकारतया विशेष्यतया वा एकवार–मन्वयबोधे जाते आकाङ्क्षायाः निवृत्तेः पुनः अन्वयबोधो न भवेत् इति एकतरशाब्दबोधवेलायां अपरशाब्दबोधानुत्पत्तौ प्रतिबन्धकान्तरकल्पनापत्तिश्च।

<u>रहस्यमतेन अखण्डोपाधिरूपकर्मत्वसमर्थनम्</u>

केचित्तु भेदो न द्वितीयार्थः, "स्वं गच्छतीति" प्रयोगापत्तिश्च "[1]आकडारादेकासंज्ञा" इति सूत्रेण एकसंज्ञाप्रयुक्तकार्यसत्त्वे संज्ञान्तरप्रयुक्तकार्यनिषेधात् "चैत्रो ग्रामं गच्छती"त्यादौ चैत्रप्रातिपदिकस्य परत्वात् कर्तृसंज्ञा प्रयुक्तकार्यस्यावश्यकत्वात् कर्मसंज्ञाप्रयुक्तद्वितीयायाः बाधात् प्रथमैवेति परिहृता। अतः आधेयत्वादिकमेव द्वितीयार्थः इति।

एतदपि न युज्यते – "चैत्रोहं स्वात्मानं जानामि, स्वं जानामि, आत्मानमात्मना वेत्सि" इत्यादौ एकस्यैव कर्तुः एकसंज्ञावरोधेऽपि संज्ञान्तरप्रयुक्तकार्यस्य दर्शनात्। तत्र शरीरावच्छेदेन कर्मसंज्ञा, मनोवच्छेदेन कर्तृसंज्ञा चेति अवच्छेदेकभेदेन तत्तत्संज्ञाप्रयुक्तकार्यं भवतीति चेत् तर्हि स्वपदप्रयोगा–नुपपत्तिः, स्वपदेन

१. पा.सू. १.४.१।

च ऐक्यं विवक्षितम् । इत्थं "चैत्रश्चैत्रं गच्छति" इत्यत्रापि शरीरप्रदेशान्तरा-विच्छन्नात्मादिभेदकल्पना स्यात् । अनवच्छिन्नस्य शुद्धस्य आत्मनः गमनासंभवात् चैत्रो मैत्रं गच्छतीति प्रयोगोपि न स्यात् । अतः यत्किञ्चिदवच्छिन्नस्यैवात्मनः गमनादिक्रिया सम्भवतीति संयोगादिरूपफलाश्रयत्वस्य चैत्रे सत्त्वेपि द्वितीयाप्रसक्तौ संज्ञान्तरप्रयुक्तकार्योपस्थितेः तत्प्रतिबन्ध-कत्वकल्पने गौरवमपरिहार्यमेव । अतः कर्मत्वंपरसमवेतक्रियाजन्यफलशालित्वसमनियतम-खण्डोपाधिरूपमेवेति स्वीकर्तुमुचितम् । तथासति तादृशस्य चैत्रे (स्वास्मिन्) असम्भवादेव न पूर्वोक्त प्रतिबन्धप्रतिबध्यभावकल्पनाया आवश्यकता । अतो लाघवात् अखण्डोपधिरूपकर्मत्वं द्वितीयार्थः, गोकर्मकमानयनं, ओदनकर्मकः पाकः, ग्रामकर्मकं गमनं इति व्यवहारात् तत्तत्फलावच्छिन्नव्यापारविशेष-त्वसमनियताखण्डोपाधिरूपपाकत्वगमनत्व-रूपशक्यतावच्छेदकधर्मावच्छिन्नव्यापारविशेषात्मक-तत्तद्धात्वर्थनिरूपितकर्मत्वानां भिन्नत्वेपि कर्मत्वत्वस्याधेयत्वत्वस्य भवन्मत इव स्वीकारात् तस्यैव शक्यतावच्छेदकत्वेन नाऽनेक शक्तिकल्पना । कर्मत्वविशेषलाभश्च चैत्रस्य घट इतिवत् कर्मत्वनिरूप-कीभूतधात्वर्थतावच्छेदकावच्छिन्नगमनाद्यन्वयवशात् सिध्यति । अतः निरुक्तपरसमवेतक्रिया-जन्यफलशालित्वसमनियताखण्डोपाधिरूपकर्मत्वस्य स्वस्मिन्नसम्भवेन "चैत्रश्चैत्रं गच्छति, चैत्रः पाचयति मैत्रम्" इत्यादि प्रयोगापत्तिः न प्रसज्यते । एवं च द्वितीयायां एकैव शक्तिः । प्रातिपदिकार्थस्य च सुबर्थे कर्मत्वादावन्वयात् तृतीयादिसाधारण्येन एकैव व्युत्पत्तिः ।

सविषयकधातुसमभिव्याहारे ईदृशकर्मत्वबाधात् नैयायिकरीत्यैव विषयत्वादिकं द्वितीयादिना लक्षयित्वा आख्यातेन च आश्रयत्वं लक्षयित्वा चैत्रो घटं जानातीत्यत्र घटविषयकज्ञानाश्रयत्वं चैत्रीयमित्येव नैयायिकवत् शाब्दबोधः । सविषयकधातुयोगे परसमवेतत्वस्यावश्यकता नास्ति । "स्वात्मानं जानामि" इत्यादि प्रयोगः तत्र गमकः । अत्र क्रियाजन्यफलाभावात् मुख्यं कर्मत्वं नास्ति । अपि तु विषयित्वे लक्षणा । साऽपि गङ्गायां घोष इतिवत् साम्प्रतिकी ।

प्राचीन वैयाकरणमत विमर्शः

केचित्तु कर्मत्वमाश्रयत्वं वा न द्वितीयार्थः, कर्मत्वादिरूपाखण्डोपाधिसत्त्वे प्रमाणाभावात्, आश्रयत्वादेः गुरुभूतस्य शक्यतावच्छेदकत्वापत्तेः । अपि तु आश्रय एव द्वितीयार्थः, तस्य च धातूपात्ते फले अन्वयः । एवं च "कर्मणि द्वितीया" इत्याद्यनुशासनमपि धर्मिपरं संगच्छते इति । अत्राभिधीयते – संबन्धवाचिषष्ठीस्थले प्रातिपदिकार्थस्य प्रत्ययार्थसम्बन्धे निरूपितत्वादिभेदसम्बन्धेनान्वयाङ्गीकारात् इहापि (द्वितीयादिविभक्तावपि) व्युत्पत्त्यन्तरकल्पनागौरवपरिहारार्थं भेदसम्बन्धबोधाय द्वितीयादेः कर्मत्वादावेव शक्तिः कल्प्यते ।

न विभक्तौ लक्षणेतिवार्तिकारः

ननु सविषयकधातुयोगे घटं जानातीत्यादौ द्वितीयादिविभक्तेः विषयत्वादौ या लक्षणा उक्ता सा न युज्यते ।

सुपां कर्मादयोप्यर्थाः संख्याश्चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ।। इति

कात्यायनवार्तिकविरोधात् । तत्र कर्मणि एव द्वितीया , एकत्वे एव एकवचनं इत्याकारकः प्रत्ययनियमश्च प्रसिद्धः । तत्र सुपां कर्मादयोर्थाः नियम्यन्ते तिङां च संख्याः । उक्तनियमद्वयेन कर्मादिव्यतिरिक्तार्थे द्वितीया न भवतीति अर्थात् सिद्ध्यतीति 'घटं जानाती'त्यादौ विषयत्वाद्यर्थे द्वितीया नोपपद्यते । अन्यथा

'छन्दसि सुपां सुपो भवन्ती'ति लक्षणाप्रतिप्रसवरूपं व्यत्ययानुशासनं व्यर्थं स्यात् । एवं लोकवेदसाधारण्येन 'कर्मणि षष्ठी'ति लाक्षणिकानुशासनमपि व्यर्थं स्यात् । अतः लोके विभक्तौ अनुशासनं विना क्वापि न लक्षणा इति ।

वार्तिकाशयविवेचनम्

अत्राभिधीयते – कात्यायनवार्तिके 'कर्मणि द्वितीयै'वेति अर्थनियमपक्षे तृतीयादिविभक्त्यन्तरं कर्मणि नास्तीति सजातीयशब्दान्तर (विभक्त्यन्तर) निवृत्तिरेवाभिप्रेता, न तु विषयत्वाद्यर्थान्तरे द्वितीयायाः निवारणम्, एवं करणत्वादौ तृतीयैवेत्यस्मादपि नियमात् विभक्त्यन्तरार्थे विभक्त्यन्तरस्य लोके लक्षणा नास्ति । वेदे तु व्यत्ययानुशासनबलात् विभक्त्यन्तरार्थे विभक्त्यन्तरस्य लक्षणा भवति । एवं च करणत्वादिवत् विषयत्वादेः विभक्त्यन्तरार्थत्वाभावात् लक्षणायां न किञ्चित् बाधकम् । कर्मण्येव द्वितीया एकत्वे एव एकवचनमिति प्रत्ययनियमपक्षेपि प्रकृतकर्मत्वादिरूपसुबाद्यर्थापेक्षयैव प्रत्ययनियमकरणात् अप्रकृतविषयत्वादिलक्षणायां न कश्चिद्दोषः । अत एव "घटं जानाती"त्यादौ तिङोपि आश्रयत्वादौ लक्षणा इत्युक्तम् ।

वस्तुतस्तु "ज्ञातो घट" इत्यादि प्रतीत्या ज्ञानजन्या ज्ञेयनिष्ठा ज्ञाततापरनामविषयता फलम् । तच्छालित्वं घटे अस्तीति क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वमेवोपपद्यते इति रहस्यकर्तुः "खण्डदेवाचार्यस्य" आशयः ।

मञ्जूषाग्रन्थरीत्या द्वितीयाविभक्त्यर्थविमर्शः

"[१]कर्मणि द्वितीया" इति सूत्रेण कर्मत्वादिशक्तिमान् तद्गतं विशेषणत्वं क्रियाकारकभावः, सम्बन्धश्च द्वितीयार्थः इति भाष्यग्रन्थप्रामाण्येन बोध्यते इति मञ्जूषायां नागेशैः प्रतिपादितम् ।

"[२]समर्थं" सूत्रे (भाष्ये) "कष्टंश्रितो भवती"त्यत्र क्रियाकारकयोः अभिसम्बन्धस्य द्वितीया वाचिका भवतीति ("राज्ञः पुरुषः" इत्यत्र राजा विशेषणं, पुरुषो विशेष्यः तयोः अभिसम्बन्धस्य षष्ठी वाचिकेति) भाष्यसन्दर्भेण क्रियाकारकभावसंबन्धः द्वितीयार्थ इति सिद्ध्यति । सम्बन्धाकाङ्क्षा च भेदसमानाधिकरणविशेषणत्वज्ञाने सत्येव भवतीति विशेषणत्वमपि द्वितीयावाच्यम् । विशेषणत्वञ्च शक्तिमत्त्वे एव भवतीति शक्तिरपि द्वितीयावाच्या । कर्मत्वादिशक्तिमानित्यत्र कर्मत्वं च व्याकरणशास्त्रे बोधितकर्मसंज्ञकत्वम् । तथाहि "[१]कर्तुरीप्सिततमं कर्मेति" सूत्रबोधितं कर्मत्वं कर्तृकृतप्रकृत-धात्वर्थव्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वम् । "तण्डुलम् पचति", "ग्रामं गच्छती"त्यादौ विक्लत्त्युत्तरदेशसंयोगादिफलाश्रयत्वात् तण्डुलग्रामादीनां कर्मत्वम् । उद्देश्यत्वं च धात्वर्थे साक्षात्फले क्रियायाः फलेच्छापूर्वकेच्छाविषयत्वात् तण्डुलादीनामपि फलाश्रयत्वात् उद्देश्यत्वं, फलस्यापि तज्ज्ञानपूर्वकं क्रियोत्पादनात् क्रियाजनकत्वमिति कारकत्वम् । अत्र फलाश्रयत्वं च फलतावच्छेदक-सम्बन्धेन विवक्षितम् । तेन कालिकादिसम्बन्धेन पर्वतादेः विक्लत्तिरूपफलाश्रयत्वे सत्यपि पर्वतं पचतीति प्रयोगापत्तिः न । विक्लत्त्यादिरूपफलं धात्वर्थः स्वाश्रये येन सम्बन्धेन वर्तते स संबन्धः फलतावच्छेदकसंबन्धः । तण्डुलादिरूपाश्रये विक्लत्त्यादिरूपफलस्य समवायेन विद्यमानत्वात् स एव समवायः फलतावच्छेदकसम्बन्धः । तेन समवायसम्बन्धेन पर्वते अभावात् न पूर्वोक्त प्रयोगापत्तिः । "चैत्रं ग्रामं गमयती"त्यत्र ग्रामस्य कर्मत्वाय णिजन्तस्थलसाधारण्येन व्यापारप्रयोज्येति कर्मत्वलक्षणे प्रयोज्यत्वनिवेशः । प्रयोज्यत्वं च जन्याजन्यसाधारणम् । विषयता यदि अजन्या तदा स्वविषयज्ञान-

---

१. पा.सू. २.३.२ ।

२. पा.सू. २०.१.१ ।

सामग्रीप्रयोज्यज्ञानविषय-साधारणी प्रयोज्यता निवेश्या । एतेन जानाति, इच्छतीत्यादौ विषयतानिरूपक ज्ञानेच्छादिरेव व्यापारः इति पक्षे विषयतायाः ज्ञानाऽजन्यत्वेन कथं फलाश्रयत्वमिति शङ्का निरस्ता । कर्मत्वलक्षणे कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यफलेत्युक्तेः "अग्नेर्माणवकं वारयती"त्यादौ संयोगाद्यनुकूल-व्यापाराभानुकूलव्यापारात्मकवारयति धात्वर्थप्रयोज्यसंयोगानुकूलव्यापाराभावरूप-फलाश्रयत्वस्य अग्नावभावेन अग्न्यादेः न कर्मत्वम् । इत्थं गच्छतियोगे गम्यर्थसंयोगरूपफलाश्रयस्यापि चैत्रादिरूपकर्तुः न कर्मत्वम्, परया कर्तृसंज्ञया बाधात् । अतः स्वं गच्छतीति प्रयोगापत्तिः न भवति । "आत्मानमहं जानामि" इत्यादि प्रामाणिकप्रयोगोपपत्त्यर्थं शरीरान्तःकरणरूपावच्छेदकभेदेन आत्मनि भेदमारोप्य कर्मत्वकर्तृत्वोपपादनं भाष्ये कृतमाश्रयितव्यम् । [2]प्रकृतधात्वर्थेति फले व्यापारे च विशेषणम् । तेन "माषेष्वश्वं बध्नाती"त्यत्र यदा पुष्ट्यर्थं माषभक्षणाय माषक्षेत्रे एव अश्वबन्धनं तदा माषाणां बन्धनरूपप्रकृतधात्वर्थप्रयोज्यभक्षण-रूपफलाश्रयत्वात् कर्मत्वापत्तिः निरस्ता । भक्षणरूपफलस्य बध्नातीति प्रकृतधात्वर्थफलत्वाभावात् । फलत्वं च कर्तृप्रत्ययसमभिव्याहारे [3]तद्धात्वर्थनिष्ठ-विशेष्यतानिरूपितप्रकारताश्रयतद्धात्वर्थत्वम् । गच्छती-त्यादौ संयोगानुकूलव्यापाररूपधात्वर्थनिष्ठ-विशेष्यतानिरूपितप्रकारता संयोगरूपफले तद्धात्वर्थे वर्तत इति समन्वयः । "पश्य मृगो धावती"त्यादौ दृशिधात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वस्य धावनादौ सत्त्वेन तत्रफलत्ववारणाय प्रकारताश्रय-तद्धात्वर्थत्वमिति विशेषणं दत्तम् । तथासति फलाश्रयः कर्म, फलस्य धातुना लाभात् आश्रयः द्वितीयार्थः, तत्र प्रकृत्यर्थः ग्रामादिः आधेयतया विशेषणं, फलं विशेष्यम्, आश्रयत्वं शक्यत्वावच्छेदक-मखण्डोपाधिरूपम् । तस्य च निरूपकत्वसम्बन्धेन फलेऽन्वयः । तथा च ग्रामनिष्ठाश्रयतानिरूपक-फलानुकूलव्यापारः इति शाब्दबोधः इति वदन्ति । तन्न समीचीनम् । आश्रयत्वस्य संयोगरूपफलाश्रये, विक्लृत्तिरूपफलाश्रये, विभागादिरूपफलाश्रये च नानाश्रये सत्त्वात् अतिप्रसक्ततया शक्यतावच्छेदकत्वं न संभवति । अतः संयोगादिरूपतत्तत्फलनिरूपितत्वविशिष्टमाश्रयत्वं शक्यतावच्छेदकमिति यद्युच्यते तदा तद्रूपेणावच्छेदकत्वे गौरवं स्यात् । किञ्च "वैकुण्ठमध्यास्ते" इत्यादौ उक्ततादृशाश्रयत्वाभावेन तस्य न्यूनवृत्तितया शक्यतावच्छेदकत्वं न संभवति । अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वात् । अपि च " वैकुण्ठमध्यास्ते" इत्यत्र शुद्धाश्रयत्वं, ग्रामं गच्छतीत्यादौ फलनिरूपितत्वविशिष्टमाश्रयत्वमर्थ इत्यङ्गीकारे अमादेः नानार्थत्वापत्तिः । अतः फलाश्रयः न कर्म । किन्तु कर्माणि विहित द्वितीयायाः कर्मत्वशक्तिमानर्थः "कर्मणि" इति सूत्रस्वरसात् । एवं सर्वविभक्तीनां तत्तत्कारकशक्तिमद्धर्मिबोधकत्वम् । तत्र शक्तौ प्रकृत्यर्थः विशेषणं, धात्वर्थः विशेष्यं, तत्र (विशेष्ये) शक्तेः निरूपकत्वसम्बन्धेनान्वयः । तथा च "हरिं भजतीत्या"दौ हरिरूपं यत्कर्म तन्निष्ठशक्तिनिरूपकप्रीत्यनुकूलव्यापारः भजनमिति ।

अत्रेदं तत्त्वम् — रहस्यकृता परसमवेतक्रियाजन्यफलशालित्वसमनियतः अखण्डोपाधिः कर्मत्वं, तच्च द्वितीयार्थः इति । मञ्जूषाकृता कर्मत्वशक्तिमान् द्वितीयार्थः, शक्तिश्च परसमवेतक्रिया-जन्यफलशालिनिष्ठेति, अनयोः समीक्षणे कृते खण्डदेवाचार्यैः यदेव अखण्डोपाधिरूपेण विवक्षितं, तदेव नागेशभट्टाचार्यैः शक्तिरूपेण विवक्षितमतो नाम्नि एव भेदः प्रतीयते ।

नैयायिक-प्राचीनवैयाकरणमतयोः अनुपपत्तिप्रदर्शनविषये उभयोः साम्यमेव । द्वितीयार्थविषये आधिक्येन साम्यमेव । परसमवेतत्वस्य स्वं गच्छतीति प्रयोगापत्तेः कर्तृसंज्ञायाः परत्वेन बाधादेव निराससंभवेन आवश्यकता नास्तीति नागेशानामभिप्रायः । अतः क्वाचित्कः सौक्ष्मिको मतभेदः, प्रायेण साम्यम् ।

१. पा.सू. १.४.४९ ।

२. ३. कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वमिति कर्मत्वलक्षणे।

[1]रषाभ्यां नो णः समानपद–
इतिसूत्रार्थविचारः

श्री एस्. वेङ्कटेशताताचार्यः

नत्वा श्रीवाक्पतेः पादौ तथैव गुरुतातयोः।
रषाभ्यां नो ण इत्यादेः सूत्रस्यार्थं लिखाम्यहम्।।

[2]'यूष्ण' इत्यादिणकारघटितप्रयोगाणां साधुत्वबोधनार्थं भगवता पाणिनिना साध्व –साधुशब्दपृथक्कृतिप्रयोजके व्याकरणशास्त्रे 'रषाभ्यां नो णः समानपदे' इति सूत्रं प्रणीतम्। अत्र रश्च षश्च रषौ ताभ्यां रषाभ्यामिति पञ्चम्यन्तं, न इति षष्ठयन्तं, ण इति प्रथमान्तं, समानं च तत्पदं तस्मिन् समानपदे इति सप्तम्यन्तमिति चत्वारि पदानि। सूत्रे रेफषकारण– कारोत्तराकाराः शाब्दबोधविषयत्वेनाविवक्षिताः। रेफः षकारश्च निमित्तं, नकारः स्थानी णकारश्चादेशः। निमित्तप्रतिपादकपदस्थाकारस्य शाब्दबोधविषयत्वेन विवक्षितत्वे सूत्रेण रेफपूर्वकाकारोत्तरनकारस्यैव णकारादेशलाभात् [3]आस्तीर्णमिति न सिद्ध्येत्। तत्र रेफोत्तरम् अकारस्यैवाभावात्। रेफषकारोत्तरा–काराविवक्षायां प्रमाणन्तु 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञाया'मिति सूत्रे [4]दक्षिणपदनिर्देशः। अकारविवक्षायाम् 'अट्कुप्वाङि'त्युत्तरसूत्रे अनुवृत्तस्यापि रषाभ्यामितिपदस्य रेफषकारोत्तराकारादित्येवार्थः स्यात्। दक्षिणेत्यत्र च इनन्प्रत्यय–स्थनकारस्य षकारोत्तराकारात्परत्वाभावेन णत्वं न स्यात्। यदि चास्य निर्देशस्य षकारोत्तरस्यैवाकारस्य उच्चारणार्थत्वबोधकत्वं, तर्हि उच्चारणार्थाकारघटितपद–बोध्यषकारसाहचर्येण तादृशस्यैव रेफस्य ग्रहणम्।

---

1. पा० सू० (अ० 8/पा० 4/सू० 1)

2. मण्डार्थकयूषशब्दात् 'शस्'विभक्तौ 'पद्दन्नोमास्' (पा० सू० 6/1/63) इत्यादिसूत्रेण प्रकृतेः यूषन्नादेशे भसंज्ञायां 'अल्लोपोऽनः' (पा० सू० 6/4/134) इत्यकारलोपे यूष्+न्+अस् इति स्थिते रषाभ्यामित्यनेन नकारस्य णादेशे सकारस्य रुत्वविसर्गयोः 'यूष्णः' इति सिद्ध्यति।

3.आङ्पूर्वकात्स्तृञ्धातोः क्तप्रत्यये 'ॠत इद्धातो' रिति इति इत्वे तस्य च'उरण्रपरः' इति रपरत्वे 'हलि च' इति इकारस्य दीर्घे प्रत्ययस्थतकारस्य 'रदाभ्यां निष्ठातो नः पूर्वस्यचदः' इति नकारादेशे तस्य रषाभ्यामिति णकारादेशे अस्तीर्णमिति सिद्ध्यति।

4. 'दक्ष वृद्धौ' इतिधातोः 'द्रुदक्षिभ्यामिनन्' (उ० 208) इति इननि नकारस्य अट्कुप्वाङिति णत्वे दक्षिणशब्दसिद्धिः।

'अर्वणस्त्रसावनञ' इत्यादिलिङ्गं वा रेफोत्तराकारस्योच्चारणार्थत्वज्ञापकम्। तथा हि – [5]'अर्वण' इति प्रयोगे 'रषाभ्यां नो णः' इति सूत्राद्रषाभ्यामित्यनुवर्त्य अट्कुप्वाङित्यादिना णकारादेशो जातः। रेफोत्तराकारविवक्षायाम् अट्कुप्वाङ्सूत्रेण रेफोत्तराकारात् अडादिमात्रव्यवहितस्य नस्य णादेशविधानात् अर्वण इत्यत्र च रेफोत्तरमकारस्यैवाभावेन णत्वं न स्यात्।

विधेयबोधके 'ण' पदे अकारस्य शाब्दधीविषयत्वेन विवक्षायान्तु 'यूष्ण' इत्यत्र 'यूष्+न्+अस्' इत्यवस्थायां नकारस्य साकारणकारादेशे 'यूष्ण+अस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'यूष्णाः' इत्यनिष्टं रूपं स्यात्। अकाराविवक्षायां प्रमाणन्तु 'ष्णुह उद्गिरणे, ष्णिहप्रीतौ' इत्यादिर्धातुपाठस्थो निर्देशः। तथा हि –

[6]नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारजःशकारश्चेर्षाट्टवर्गस्तवर्गजः।।

इत्यभियुक्तोक्त्या अत्र नकारघटित एव धातुः। णकारस्तु षकारनिमित्तकः रषाभ्यामि त्यनेन संजातः। अत्र यदि अकारो विवक्षितः स्यात् तर्हि अकारसहितणादेशे 'ष्ण+उह, ष्ण+इह' इति स्थिते गुणे 'ष्णोह, ष्णेह' इत्येव रूपं स्यात्। न ह्येवं श्रूयते धातुपाठे, तस्मात् अकारोऽविवक्षित एवादेश इति विज्ञायते। न च षकारनिमित्तक–णत्वस्थले सर्वत्रैव ष्टुत्वेन रूपं सेत्स्यति , अतोऽत्रापि [7]'ष्टुनाष्टुः' इत्यनेनैव अकाररहितणकारादेशे निर्देशोपपत्तौ नाऽयं निर्देशः अकाराविवक्षाज्ञापक सूत्रे षग्रहणन्तु अग्रेऽनुवृत्त्यर्थम् इति वाच्यम्। ष्टुनाष्टुरित्यस्य प्राप्तिसत्वेऽपि तस्य त्रिपादीस्था–द्रषाभ्यामित्यस्मात् परत्वेन असिद्धत्वात्। न च 'ष्णुह' इत्यादौ विभक्त्यश्रवणात् तस्य सुप्तिङन्तत्वरूपपदत्वस्यैवाभावेन समानपदत्वस्य निस्संशयमभावात् रषाभ्या–मितिसूत्रस्य अप्राप्तेः ष्टुत्वस्यैव निर्बाधं प्रवृत्तिरिति वाच्यम्। 'समानपदे' इत्यत्र पदपदस्य परिनिष्ठितार्थकत्वात्, 'ष्णुह' इत्यस्य च [8]परिनिष्ठितत्वेन

---

5. अर्वन्शब्दानुकरणात् अर्वन्नित्यस्मात् ङसि नकारस्य अङ्कुप्वाङिति णत्वे अर्वण इति सिद्ध्यति। न चात्र अनेनैव सूत्रेण 'तृ' इत्यादेशे 'अर्वतः' इत्येवोचितं, न त्वर्वण इति वाच्यम्। स्वंरूपमिति सूत्रबलात् अश्वरूपार्थविशिष्टस्यैव आदेशविधानात्, सूत्रस्थार्वशब्दस्य अनुकरणत्वेन अश्वार्थकत्वाभावात्।

6. लघुशब्दरत्ने पृष्ठ सं० 65 (पण्डितसभापतिशर्मोपाध्यायसम्पादिते पुस्तके)

7. पा० सू० (8/4/41)

8. अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वं परिनिष्ठितत्वम्। 'ष्णुह' इति लक्ष्यस्थध ातोरनुकरणम्। अनुकरणस्य अनुकार्यादभेदपक्षे बोध्यबोधकयोरभिन्नत्वात् तयोः वृत्तिरूपस्सम्ब–न्धो नास्ति। वृत्तेः परस्परभिन्नशब्दार्थनिष्ठत्वात्। अतः 'ष्णुह' इत्यस्य वृत्तिमत्त्वरूपार्थवत्त्वाभावाद–प्रातिपदिकत्वात् न तत्र स्वौजसमौडित्यादिप्रत्ययविधिप्राप्तिः। तेन अप्रवृत्तो यो नित्यो विधिः स्वौजसित्यादिः तदुद्देश्यतावच्छेदकं यत् प्रातिपदिकत्वं तेन अनाक्रान्तत्वस्य 'ष्णुह' इत्यत्र सत्वात् तस्य परिनिष्ठितत्वम्।

तत्र रषाभ्यामितिसूत्रप्राप्तिसम्भवात्। तथा च णादेशष्टुत्वयोरुभयोः प्राप्तौ ष्टुत्वस्यासिद्धत्वाण्णादेशस्यैव प्रवृत्तिः, आदेशे चाकारस्य विवक्षायां ष्णोह' इति रूपापत्तिरिति 'ष्णुह' निर्देशानुपपत्तिः। तस्मादकारोऽविवक्षित एव। समानपदे इत्यत्र पदपदस्य परिनिष्ठितार्थकत्वे 'षण सम्भक्तौ' इति निर्देशो मानम्। सुप्तिङन्तार्थकत्वे तु 'षन' इत्यस्य सुबन्तत्वाभावेन अट्कुप्वाङिति णत्वं न स्यात्। अट्कुप्सूत्रेऽपि 'समानपदे' इत्यस्यानुवृत्तेः।

रषाभ्यामित्यवधिताबोधकपञ्चम्यन्तपदश्रुत्या 'तस्मादित्युत्तरस्ये'ति परिभाषा उपतिष्ठते। तया चात्र अव्यवधानांशः परत्वांशश्चोपस्थाप्यते। ननु 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इत्यनेनैवात्र पञ्चमी वक्तव्या। सा च विना दिग्वाचकशब्दं न स्यादिति दिग्वाचकशब्दस्याध्याहार आवश्यकः। स च प्रकृते 'उत्तर' पदरूपः। तथा च तस्मात्परिभाषया उत्तरत्वांशोपस्थापनं व्यर्थम्। न च परिभाषयोपस्थापितं दिक्शब्दमुपजीव्यैव पञ्चमी जातेति वाच्यम्। पञ्चम्यन्तपदरूपलिङ्गस्य पूर्वं सिद्धत्वाभावे परिभाषाया एवाप्रवृत्तेरिति चेन्न। पाणिनिना उत्तररूपदिक्शब्दयोगेऽत्र पञ्चमी कृता। परन्त्वस्माभिरिदं परिभाषां विना ज्ञातुं न शक्यते। पञ्चम्यन्तपदश्रवणे 'यत्किंचिद्दिक्शब्दयोगे पञ्चमीयं जाता' इत्येतावदेव कल्पयितुं शक्यते। कोऽसौ दिक्शब्द इति विशेषापेक्षायां परिभाषया उत्तरपदं समर्प्यत इति भवति तस्याः सार्थक्यम्। परिभाषाप्रापयिष्यमाणदिक्शब्दयोगे सम्भाविते एव पञ्चमी जातेति वा मन्तव्यम्। नः इति स्थानषष्ठी। समानपदे इत्यत्र अधिकरणे सप्तमी। अधिकरणस्य कारकत्वात् क्रियां विना च कारस्याभावात् विद्यमानाभ्यामिति योग्यक्रियाया अध्याहारः। समानशब्दः एकपर्यायः। न च '[1]समानास्सत्समैकेस्युः' इति कोशात् एकपदस्य समानार्थकत्वेऽपि समानपदस्य एकार्थकत्वाभावात् कथमुभयोः पर्यायत्वमिति वाच्यम्। एकमधिकरणं यस्य तदित्यर्थे समानाधिकरणशब्दप्रयोगरूपवृद्धव्यवहारेण समानपदस्यापि एकार्थकत्वावसायात्।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।। इत्यभियुक्तोक्त्यनुसारेण वृद्धव्यवहारस्यापि शक्तिग्राहकत्वात्। तथा च एकपदे विद्यमानाभ्यां रेफषकाराभ्यामव्यवधानेन परस्य नकारस्य स्थाने णकारः स्यादिति सूत्रार्थः।

ननु प्रातर्नमनमित्यादावपि नमनशब्दघटकप्रथमनकारस्य णत्वापत्तिः। तथा हि– एकपदं नाम एकत्वसंख्याविशिष्टं पदम्। तच्च प्रकृते प्रातरिति तत्र विद्यमानाद्रेफात् परस्य नस्य अस्ति णत्वप्राप्तिरिति चेन्न। पदे संख्यारूपैकत्वस्य केवलान्वयितया समानपदोपादानवैयर्थ्यापत्तेः। सर्वस्यापि पदस्य समानत्वेन (एकत्वेन) व्यावर्त्यस्यैवाभावात्। अतोऽत्र समानपदेन अभिन्नत्वं विवक्ष्यते। अभिन्नत्वं भेदाश्रयप्रतियोगिकभेदवत्त्वम्। तत्र प्रथमभेदप्रतियोगि स्थानिभूतनकाराधिकरणं पदम्। तथा च स्थानिभूतनकाराधिकरणपदाभिन्नपदे विद्यमानाद्रेफात्परस्यैव नस्य णत्वलाभेन प्रातर्नमनमित्यादौ च रेफस्य

---

1. अमरकोशे नानार्थवर्गे

स्थानिनकाराश्रयनमनपदाद्भिन्ने प्रातरितिपदे विद्यमानत्वेन तदभिन्नपदे विद्यमानत्वा–भावेन न णत्वापत्तिदोषः।

अथ उक्तविधस्य एकत्वस्य 'पदे' इत्यत्रैकवचनादेव लाभात् तदर्थं समानग्रहणं व्यर्थम्। न च 'सूत्रे लिङ्गवचनमतन्त्रम्' इति वचनात् एकत्वस्य अविवक्षितत्वेन एकत्व–बोधार्थं समानपदमावश्यकमिति वाच्यम्। "अपदं न प्रयुञ्जीतेति" भाष्यात् अपदस्य असाधुत्वेन प्रयोगासम्भवात् (शास्त्रप्रवृत्तियोग्यत्वेन प्रयोगासम्भवात्) तद्वृत्तिनकारस्य णत्वाप्राप्त्या तद्व्यावृत्त्यर्थस्य पदपदस्य वैयर्थ्यापत्त्या तत्सार्थक्याय 'सूत्रे लिङ्गवचनमतन्त्रमि' ति परिभाषाबाधेन एकवचनार्थो विवक्ष्यते। तेन अनेकपदव्यावृत्त्यर्थं 'पदे' ग्रहणं सार्थकम्। तथा च एकत्वस्य विभक्त्यैव लाभात् समानपदवैयर्थ्यमिति चेन्न। अनुकरणस्य अनुकार्यादभेदपक्षे[10] 'कुर्वन्' इत्यनुकरणे अपदभूते णत्वव्यावृत्त्यर्थं [11]पदपदस्य चारितार्थ्येन तत्सामर्थ्येन परिभाषाबाधापूर्वकमेकत्वविवक्षणासम्भवेन एकत्वलाभर्थं समानपदस्यावश्यकत्वात्। न च पदत्वाभावे 'अपदं न प्रयुञ्जीते' ति भाष्यात् कुर्वन्नित्यनुकरणस्य प्रयोग एव न स्यादिति वाच्यम्। 'भू सत्तायामि'त्यादिनिर्देशे भ्वादिशब्देभ्यो विभक्तेरदर्शनेन तेषामपदत्व–निश्चयात् एतादृशानामपदानां प्रयोगोपपत्त्यर्थमपदं न प्रयुञ्जीतेति भाष्यस्य अपरि–निष्ठितं न प्रयुञ्जीतेत्यर्थकल्पनात्। अपरिनिष्ठितं नाम अप्रवृत्तनित्यविध्युद्देश्य–तावच्छेदकाक्रान्तम्। अनुकरणाभेदपक्षे 'भू' इत्यादिशब्दानां प्रातिपदिकत्वाभावेन तेभ्यः स्वादिविभक्तीनामप्राप्त्या तेषां परिनिष्ठितत्वेन निर्देशा उपपद्यन्ते। एवमेव कुर्वन्नित्याद्यनुकरणानामपि परिनिष्ठितत्वेन प्रयोगः साधुः।

अथैवमपि समानग्रहणं व्यर्थम्। तथाहि – पदग्रहणाभावे अपदभूतकुर्वन्नित्यनु–करणे प्राप्तस्य णत्वस्य पदान्तस्येति सूत्रेण निषेधात् तत्र णकारश्रवणापत्त्यभावेन तन्निवृत्त्यर्थस्य पदग्रहणस्य वैयर्थ्यापत्त्या विभक्त्यर्थैकत्वविवक्षा क्रियते। अतश्च एकत्वरूपविभक्त्यर्थबोधनाय समानग्रहणं नावश्यकम्। न च कुर्वन्नित्यनुकरणस्य पदत्वाभावे कथं तत्र पदान्तस्येति सूत्रेण णत्वनिषेधः ? पदान्तनस्यैव तेन णत्वप्रतिषे–धादिति वाच्यम्। पदान्तस्येति सूत्रस्य परिनिष्ठितान्तस्य नस्य णत्वं नेत्यर्थकरणेन कुर्वन्नित्यस्य च परिनिष्ठितत्वेन तेनात्र णत्वनिषेधसम्भवादिति चेदुच्यते –

---

10. अनुकरणस्य अनुकार्याद्भेदः, अभेदः इति पक्षद्वयम् "प्रिकृतिवदनुकरणं भवति, न भवती'तिपरिभाषायाः। अनुकरणानि अनुकार्यबोधकानि। भेदपक्षे शक्त्या अनुकरणस्य अनुकार्यबोधकत्वम्। अभेदे तु सादृश्येनैव, न तु शक्त्या अन्यया वृत्यावा त्वृत्तेः परस्परभिन्नपदपदार्थसम्बन्धत्वात्। सादृश्यन्तु वैयाकरणमते एकस्मिन्नपि भवितुमर्हति। वृत्त्या अर्थवत एव प्रातिपदिकसंज्ञाविधानात् अभिन्नानुकरणस्य च वृत्त्यभावात् न प्रातिपदिकत्वम्। अतो न तस्माद्विभक्त्युत्पत्तिरिति तस्य सुप्तिङन्तत्वरुपपदत्वमपि असम्भवि।

11. अस्य अट्कुप्वाङितिसूत्रे अनुवृत्तस्येत्यादिः। तथा च तत्रानुवृत्त्यर्थं रषाभ्यामित्यत्रापि सार्थकमिति भावः।

समानपदमखण्डार्थबोधकत्वेन चरितार्थम्। एकवचनार्थस्य एकत्वस्य विवक्षणेऽपि अखण्डत्वबोधार्थं समानपदावश्यकत्वात्। एवं च समानपदे इत्यस्या- खण्डपदे इत्यर्थः। एतादृशार्थाभावे 'रामनामे' त्यादौ अट्कुप्वाङित्यादिना णत्वापत्तिः स्यात्। तत्रापि रेफस्य स्थानिभूतनकारश्रय 'रामनाम' पदाभिन्नपदे रामनामेत्यस्मिन् विद्यमानत्वात्। अखण्डपदे विद्यमानाद्रेफादित्युक्तौ तु रामनामेत्यस्य अखण्ड- पदत्वाभावेन तत्र विद्यमानाद्रेफात् परस्य नस्य न णत्वापत्तिः। पदाघटितपदं हि अखण्डपदम्। रामनामेत्यस्य तु पदद्वयघटितत्वेन नाखण्डपदत्वम्। अथैवमपि रामपदस्य पदाघटितत्वेन अखण्डत्वात् तत्र विद्यमानाद्रेफात् परस्य नामपदघटकनस्य अट्कु- प्सूत्रेण णत्वापत्तिस्तदवस्थैवेति चेन्न। यद्यपि अखण्डार्थ- बोधनाय समानग्रहणं कृतं, पदग्रहणं च समानपदार्थस्य विशेष्यसमर्पणेन चरितार्थम् (अन्यथा समानवाक्ये इत्यप्यर्थः स्यात्), अतः 'पदग्रहणसामर्थ्येन तदुत्तरैकवचनार्थैकत्वं विवक्षित' मिति न वक्तुं शक्यते, तथापि समानपदेन अखण्डार्थबोधनेऽपि रामनामेत्यत्र दोषतादवस्थ्येन तच्चारितार्थ्याभावेन 'यावता विना यदनुपपन्नं तत्सर्वं तेन ज्ञाप्यत' इत्युक्त्या समानग्रहणमेव अभिन्नत्वरूपैकत्वविवक्षायामपि ज्ञापकम्। तथा च स्थानिभूतनकारा- श्रयाभिन्ने अखण्डपदे विद्यमानाद्रेफात् परस्य नस्य ण इत्यर्थो लभ्यते। रामनामेत्यत्र रामेत्यखण्डपदस्य स्थानिनकाराश्रयनामपदभिन्नत्वेन तदभिन्नत्वाभावात् न तत्र विद्यमानाद्रेफात्परस्य नस्य णत्वापत्तिः।

अथात्र अखण्डपदत्वं परिष्क्रियते – पदाघटितपदस्याखण्डपदत्वे [12]मातृभोगीणेत्यत्र अव्याप्तिः। तस्य मातृपदघटितत्वेन पदाघटितत्वाभावात्। अतो निमित्तिमत्पदाघटितत्व- मखण्डपदलक्षणम्। निमित्तमत्ररेफः, षकारो, ऋवर्णश्च, [13]निमिती नकारः। मातृपदस्य नकाररूपनिमित्तिमत्त्वाभावेन 'मातृभोगीणे, त्यस्य तद्घटितत्वेऽपि निमित्तिमत्पदाघटितत्वेन न क्षतिः। ईनेति प्रत्ययांशस्य भोगो नेत्यस्य वा निमित्तिभूतनकारवत्त्वेऽपि पदत्वाभावान्न मातृभोगीनेत्यस्य तद्घटितत्वेऽपि निमित्तिमत्पदाघटितत्वहानिः। एवं सति [14]'सुपर्वणा' इत्यत्र णत्वानापत्तिः। तस्य नकाररूपनिमित्तिमत्पर्वपदघटितत्वात्। न च 'सुपर्वणे' त्यस्य अखण्डपदत्वाभावेऽपि पर्वमात्रस्याखण्डपदत्वेन तद्वृत्तित्वेनैव नस्य णकारादेशलाभः। तत्र निमित्तनिमित्तिनौ तु पर्वन्नित्यखण्डे सुपर्वणेत्यनखण्डे च स्तः। यदि च अनखण्डे

12. मातुर्भोगः मातृभोगः, मातृभोगाय हितः इत्यर्थे मातृभोगपदात् 'भोगोत्तरपदात्खः' इति खप्रत्ययः, यस्येतिच इति भोगपदस्थस्य अकारस्य लोपः, प्रत्ययस्थस्य खकारस्य आयनेयीनीयियः .....' इति सूत्रेण ईनादेशे नस्य णत्वे मातृभोगीणेति सिद्ध्यति।

13. यद्यपि निमित्तमस्ति अस्मिन्निति व्युत्पत्या णकार एव निमित्ती, तस्यैव रेफषकाररूपनिमित्तसत्त्वात्, न तु नकारः तस्य रेफषकाररूपनिमित्ताभावात्। तथापि निमित्तित्वेन णकारस्य ग्रहणे सूत्रप्रवृत्तिवेलायां णकारस्याविद्यमानत्वात् सूत्रमेव न प्रवर्तेत। अतः नकारे एव निमित्तित्वमारोप्यते। णत्वविधानोत्तरकालं चेत् समानपदस्थौ निमित्तनिमित्तिनौ भवतः' इत्यर्थे वा सूत्रतात्पर्यम्।

14. सुष्ठुपर्व यस्मिन् तत् सुपर्व, तेन सुपर्वणा

अविद्यमानाद्रेफादित्युक्तं स्यात्तर्हि रेफस्य अनखण्डे सुपर्वणेत्यस्मिन् विद्यमानत्वात् नस्य णत्वानापत्तिः। न हि तथा उक्तम्। अतः पर्वन्नित्यखण्डपदवृत्तित्वमात्रेण णत्वं सेत्स्यति इति वाच्यम्। तथापि पर्वन्नित्यस्य पदत्वात् नकारस्य तदन्तत्वात् पदान्तस्येति णत्व– निषेधापत्तेः। अतः निमित्तिमत्पदाघटितत्वमित्यत्र पदे निमित्तानधिकरणेति विशेषणान्तरं दातव्यम्। तथा च सुपर्वणेति पदस्य निमित्तिभूतन–कारवत्पर्वन्निति पदेन घटितत्वेऽपि पर्वन्नित्यस्य निमित्ताधिकरणत्वेन तदनधिकरणत्वाभावात् निमित्तानधिकरण– निमित्तिमत्पदाघटितत्वं विद्यत एव। अतस्तत्र विद्यमानाद्रेफात्परस्य नस्य णत्वसिद्धिः। इदानीं पदान्तस्येति णत्वनिषेधस्तु न। ''यस्मिन् पदे वृत्तित्वेन नस्य णत्वप्राप्तिः तस्य पदस्य अन्तस्य नस्य णत्वं ने''ति सूत्रार्थस्वीकारेण अत्र सुपर्वणेत्याकारान्तपदवृत्तित्वेनैव णत्वप्राप्तेः नस्य च तदन्तत्वाभावात् निषेधाप्राप्तेः। उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति प्रत्ययलक्षण–निषेधेन पदान्तत्वाभावाद्वा न निषेधः वस्तुतस्तु पदान्तस्येत्यस्य परिनिष्ठिता–न्तस्येत्यर्थस्य पूर्वं कथितत्वेन सुपर्वणेत्यत्र समासैकदेशस्य पर्वन्नित्यस्य अपरिनिष्ठि–तत्वेन तदन्तस्य नस्य णत्वनिषेध एव न प्राप्यते। अतः पदे निमित्तानधि–करणेतिविशेषणं व्यर्थमेव।

निमित्तिमत्पदाघटितपदत्वमित्यत्र उभाभ्यां पदशब्दाभ्यां विभक्तीतरसमभि–व्याहारानपेक्षया लोके अर्थविषयकबोधजनकं गृह्यते। अन्यथा प्रथमेन उभाभ्यामपि वा पदपदाभ्यां सुप्तिङन्ततदादेर्ग्रहणे गन्धर्वगानमित्यत्र अट्कुप्सूत्रेण णत्वापत्तिः। तत्र ''[15]गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक्सुबुत्पत्तेः' इति वचनेन ग्रनपदात्कृदन्ताद्विभक्त्युत्पत्तेः प्रागेव समासेन गानशब्दस्य निमित्तिमत्त्वेऽपि सुबन्तत्व–रूपपदत्वाभावेन निमित्तिमत्पदं न गानशब्दः अपि तु उदासीनं नरेणेत्यादिपदमेव, तदघटितत्वं गन्धर्वगानमित्यत्र वर्तते इति तस्याखण्डपदत्वात्। द्वितीयपदपदेनापि सुप्तिङन्तग्रहणं न युक्तम्। तथा सति धातुपाठे 'षण संभक्तौ' इत्यत्र षणेत्यस्य सुबन्तत्वाभावेन तस्य अखण्डपदत्वाभावाण्णत्वानापत्त्या निर्देशानुपपत्तिः।

अत्र प्रथमपदग्रहणाभावे निमित्तिमदघटितपदत्वमखण्डपदत्वं स्यात्। एवं सति मातृभोगीणेत्यस्य निमित्तिभूतनकारवदीनघटितत्वेन तदघटितत्वाभावात् अखण्डं–पदत्वाभावेन तत्र णत्वं न स्यात्।

द्वितीयपदग्रहणाभावे निमित्तिमत्पदाघटितत्वमात्रमखण्डपदत्वं स्यात्। एवं सति रामनामेत्यादौ अखण्डपदत्वाण्णत्वं स्यात्। तत्र निमित्तिमत्पदं नामेति तदघटितं 'रामना' इति, तत्र विद्यमानाद्रेफात्परस्य नस्य णत्वप्रसक्तेः। ननु 'रामना' इत्यस्य अखण्डत्वेऽपि रामनामेत्यस्य अखण्डत्वाभावात् अनखण्डे विद्यमानत्वेन न नस्य ण इति चेत्–स्यादेवं यदि 'अनखण्डे अविद्यमानस्य नस्य ण' इत्युक्तं स्यात्। न हीत्थमुक्तं, किंतु अखण्डवृत्तित्वमात्रेण णत्वमुक्तम्। अतः नकारस्य अखण्डानखण्डोभयवृत्तित्वेऽपि अखण्डवृत्तित्वाक्षतेः प्रसज्यत एव णत्वम्। पदग्रहणे तु 'रामना' इत्यस्य पदत्वाभावेन न

15. अत्र प्रयोजनं प्रमाणं (ज्ञापकं) च 100 पृ0 बालमनोरमातत्त्वबोधिन्योः द्वितीयभागे स्पष्टम्।

तत्र विद्यमानत्वेन नकारस्य णत्वम्। यच्च पदं रामनामेति, तस्य नामपदघटितत्वेन अखण्डत्वाभावात्, तत्र विद्यमानत्वेनापि न नस्य णः।

ननु निमित्तिमत्पदाघटितपदस्याखण्डपदत्वेऽपि 'करण' मित्यादौ णत्वं न स्यात्। तत्र 'करन+अम् (प्रथमाद्वितीयैकवचनम्)' इत्यवस्थयां [16]करनेतिशब्दस्य निमित्तिमत्त्वेन तद्घटितत्वेन 'करनमि'तिशब्दस्य अखण्डत्वाभावात् तद्वृत्तिनस्य णो न भवेत्, अतस्तदर्थं निमित्तानधिकरणेति विशेषणं दातव्यम्। न च लोके करनेतिशब्दस्य अप्रयोगेण करणपदस्यैव प्रयोगेण णकारघटितशब्दस्यैव लोके अर्थबोधकत्वरूपपद–त्वसत्त्वेन नकारघटितस्य पदत्वमेव नास्तीति न तद्घटितत्वेऽपि करनमित्यस्य अखण्डत्वहानिरिति वाच्यम्। करनशब्दस्यैव णत्वानन्तरं करणरूपेण परिणतत्वेन उभयोरेकत्वेन णकारघटितस्य अर्थबोधकत्वे नकारघटितस्यापि तत्त्वाङ्गीकारात्। अस्तु वा तयोर्भेदः, करनेत्यस्य पदत्वाभावश्च; तथाऽपि रामेणेत्यादावेव रामेनेत्यस्य निमित्तिमत्पदत्वेन तस्यैव च व्यपदेशिवद्भावेन तदघटितत्वेन तदघटितत्वाभावेन अखण्डपदत्वाभावान्नस्य णत्वं न स्यादितिचेन्न। व्यपदेशिवद्भावेन निमित्तिमत्पदघटि–तत्वोपपादने कस्यापि पदस्य अखण्डत्वासंभवात् समानविशेषणस्यैव वैयर्थ्यापत्तेः, ससहाये व्यपदेशिवद्भावाश्रयणस्य अयुक्तत्वाच्च। करणमित्यत्र च करनेत्यखण्ड–पदघटकत्वेनैव नस्य णत्वम्। न तु 'करनमित्ये'तद्वृत्तित्वेन।

ननु निमित्तिमत्पदाघटितपदस्याखण्डपदत्वेऽपि 'नाथरघुणा' इत्यत्र निमित्तिमन्नाथपदघटितत्वेन अखण्डपदत्वाभावात् विभक्तिस्थस्य नस्य णो न स्यात्। न चात्र सूत्रार्थनिष्पत्त्यनन्तरं पूर्वनकारस्य णकारादेशाभावेन तत्र निमित्तित्वमेव नास्तीति वाच्यम्। निमित्तिपदेन नकारमात्रस्य ग्राह्यत्वात्। यस्य णादेशो भविष्यति तस्यैव निमित्तिपदेन ग्रहणे रामनामेत्यत्रापि सूत्रार्थबोधानन्तरं णकारादेशाभावेन तत्र नकारस्य निमित्तित्वाभावे नामेत्यस्य निमित्तिमत्त्वाभावात् तदघटितस्यापि रामनामेत्यस्य अखण्डपदत्वप्रसक्तेरिति चेन्मैवम्। 'यदीदमखण्डपदं स्यात्तर्हि एतदघटकस्यास्य नकारविशेषस्य णकारादेशः स्यात्' इत्येतादृशाहार्यप्रमा–साधारणज्ञानविषयनकारस्य निमित्तिपदेन ग्रहणेनादोषात्। यत्तूक्तं रामनामेत्यस्य अखण्डपदत्वं स्यादिति, तत् अखण्डपदत्वे सूत्रेण णकारादेशप्राप्तेः सत्वात् तत्रत्यनकारस्य निमित्तित्वेन तद्वन्नामपदघटितत्वेन अखण्डपदत्वासम्भवात् वदतो व्याहतम्। उक्तज्ञानविषयत्वरूपनिमित्तित्वाङ्गीकारे तु आञ्जस्येन रामनामेत्यत्र अखण्डपदत्वाभावः सिद्ध्यति, तद्घटकनामपदावयवनस्य निमित्तित्वात्। नाथरघुणेत्यत्र तु अखण्डपदत्वे आरोपितेऽपि पूर्वनकारस्य रेफात्परत्वाभावेन णकारासम्भवात् न तस्य निमित्तित्वम्।

अथैवमपि [17]'गीर्नाथरघुणा' इत्यत्र विभक्तिनकारस्य णत्वानापत्तिः। गीर्नाथ–

16. ननु 'करने'त्यत्र करन' शब्दानुकरणे कथं णत्वं न जातमितिचेत् – एतादृशस्थले 'कर' शब्दः करेत्येतदनुकरणं, नशब्दश्च नशब्दनुकरणमित्यङ्गीक्रियते। तथा च करेत्यस्य विभक्तीतरसमभिव्याहारानपेक्षया बोधकत्वरूपं पदत्वं, तथैव नशब्दस्यापीति रेफनकारयोः भिन्नपदस्थत्वेन एकपदस्थत्वाभावात् णत्वाभावः समर्थयितुं शक्यते।

17. गिरां नाथो गीर्नाथः, स चासौ रघुः गीर्नाथरघुः, तेन गीर्नाथरघुणा।

रघुनेत्यस्य निमित्तिभूतनकाराधिकरणनाथपदघटितत्वेन अखण्डपदत्वाभावात्। न च नाथपदस्थनस्य निमित्तित्वं नास्तीति वाच्यम्। गीर्नाथरघुनेत्यस्याखण्डपदत्वे आरोपिते प्रमिते वा नाथघटकनस्य रेफात्परत्वेन णत्वप्राप्तिरस्तीति तस्यापि निमित्तित्वासन्देहात्। यत्तवत्र 'करिष्यमाणणत्वनिमित्तानधिकरणं निमित्तिमच्च यत्पदं तदघटितत्व'स्य अखण्डपदलक्षणत्वाङ्गीकारेण कैश्चित्समाहितं, तस्याशयं न विद्मः। णत्वे करिष्यमाणत्वनिश्चयस्य लक्षणैकचक्षुष्काणामस्माकमससम्भवात्। करिष्यमाण–पदस्य चिकीर्षिते तात्पर्याङ्गीकारेऽपि नाथघटकनकारस्य णकारादेशे– च्छायां बाधकाभावेन चिकीर्षितं णत्वं–नाथघटकनकारस्थानिकं णत्वं, तन्निमित्तं–गीः पदघटको रेफः; तदनधिकरणं नकाररूपनिमित्तिमच्च पदं नाथेति, तद्घटितत्वेन गीर्नाथरघुनेत्यस्य अखण्डपदत्वासम्भवः।

अतः एवं वक्तव्यम् – निमित्तिभूतो यो नकारः, तदधिकरणपदाघटितपदत्वं तस्य णत्वे कर्त्तव्येऽखण्डपदत्वम्। एवं च गीर्नाथरघुणेत्यत्र विभक्तिनकारस्य निमित्तित्वेन ग्रहणे तदधिकरणं पदं 'गीर्नाथरघुने'ति, [18]तदघटितं पदं गीर्नाथरघुनेत्येव, तत्र रेफाद्रघुघटकादडादिव्यवधानेन परस्य विभक्तिस्थनस्य णत्वं सिद्धयति। नाथघटकनस्य निमित्तित्वेन ग्रहणे तु गीर्नाथेत्यस्य गीर्नाथरघुणेत्यस्य च तद–धिकरणनाथपदघटितत्वात् तस्य णत्वे कर्तव्ये नाखण्डपदत्वमिति तस्य णत्वाभावोऽपि सिद्धयति।

उक्तप्रकारे निमित्तानधिकरणेत्यस्य अप्रवेशात् 'परमाग्नीध्रेणे'त्यत्र न आ–ग्नीध्रघट–कनकारस्य णत्वापत्तिरित्यपरमनुकूलम्। अन्यथा चिकीर्षितणत्वनिमित्ता–नधिकरण–निमित्तिमत्पदाघटितत्वस्याखण्डत्वे, आग्नीध्रविभक्त्युभयघटकनस्य णत्वचिकीर्षायां, चिकीर्षितं णत्वं विभक्तिस्थनकारस्थानिकमाग्नीध्रघटकनकारस्थानिकं च तन्निमित्तं परमघटकः आग्नीध्रघटकश्च रेफः तदनधिकरणं पदं न परमपदं न वा आग्नीध्रपदं किन्तु उदासीनमेव किंचित्, तदघटितत्वस्य परमाग्नीध्रेणेत्यत्र सत्वात् आग्नीध्रपदस्थस्य नस्य णत्वापत्तिः।

एवमपि यत्तत्पदप्रवेशेन अननुगमो दुरुद्धरः। अतः समानपदपदार्थपरिष्करणं विहाय एवं सूत्रार्थः परिष्करणीयः – रेफषकारान्यतरविशिष्टस्य नस्य णकारादेशः। वैशिष्ट्यं च स्वाव्यवहितोत्तरत्व– स्वाघटितपदाघटकत्वोभयसम्बन्धेन। एतादृशार्थे च समानपदग्रहणं रषाभ्यामिति पञ्चमी च तात्पर्यग्राहकम्। 'अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेऽपि रषाभ्यामित्यादेः सम्पूर्णसूत्रस्यानुवृत्तेः तत्रापि उक्ततात्पर्यग्राहकेण ''अडादिमात्रव्यवधानेन स्वोत्तरत्व–स्वाघटितपदाघटकत्वाभ्यां रेफषकारान्यतर–विशिष्टस्य नस्य णः'' इत्यर्थो लभ्यते। अत्रापि पदपदेन विभक्तीतरसभभिव्याहारान–पेक्षया अर्थबोधजनकं गृह्यते।

अथैतादृशसूत्रार्थाङ्गीकारेऽपि अट्कुप्वाङ्'सूत्रस्य '[19]व्रीहिवापाणि' इत्यत्र प्रवृत्त्यापत्तिः। नुमो नकारे अडादिव्यवधानेन व्रीहिघटकरेफोत्तरत्व– तदघटित–वापपदाघटकत्वयोः सत्त्वात्। नच नुमः वापपदावयवत्वमस्तीति वाच्यम्। ''[20]समुदाय–

18. अत्र व्यपदेशिवद्भावाश्रयणस्य असंभवः पूर्वमुपपादितः।

19. व्रीहीणां वापानि व्रीहिवापाणि।

20. मिदचोऽन्त्यात्पर इति सूत्रे इदं भाष्यम्।

भक्तोऽसौ नोत्सहते अवयवस्य इगन्ततां विहन्तुमि'ति भाष्यदिशा समुदायावयवस्य अवयवावयवत्वनैयत्याभावेन नुमः व्रीहिवापावयवत्वेन वापपदा– वयवत्वाभावात्। तथा च व्रीहिवापाणीत्यत्र अट्कुप्वाङ्सूत्रस्य 'प्रातिपादिकान्तनुम्वि– भक्तिषु चे'ति सूत्रस्य च प्राप्तौ प्रातिपदिकान्तेत्यस्य परत्रिपादीस्थत्वेन असिद्धत्वात् अट्कुप्वाङित्यनेन नित्यणत्वं स्यात्। इष्यते परं प्रातिपदिकान्तेत्यादिना नुम्निमित्तं वैकल्पिकं णत्वम्। न चात्र अट्कुप्वाङिति नित्यणत्वे कृते प्रातिपदिकान्तेतिनुम्निमित्तकवैकल्पिकण– त्वस्यावकाशाभावात् प्रातिपदिकान्तेतिसूत्रे नुम्ग्रहणवैयर्थ्यापत्तिरिति वाच्यम्। नुमः 'प्रहिण्वन्' इति लक्ष्ये वैकल्पिकणत्वार्थं चरितार्थत्वात्। तत्र नकारे स्वाघटितपदा– घटकत्वरूपद्वितीयसम्बन्धाभावेन अट्कुप्वाङ्सूत्रस्य प्राप्त्यभावात्। यत्तु– स्वा– नधिकरणपदघटितसमुदायनिरूपितावयवत्वाभाववत्त्वरूपतृतीयसम्बन्धनिवेशेन अदोषः। नुमः रेफानधिकरणवापपदघटितव्रीहिवापसमुदायावयवत्वादिति; तत् मातृभोगीणेत्यत्र नकारस्य [21]रेफानधिकरणभोगपदघटितमातृभोगीनेतिसमुदायावयवत्वेन तदनवयवत्वा– भावेन णत्वानापत्तेर्नादरणीयम्। किं च 'तृतीयसम्बन्धे'ति वचनमप्ययुक्तम्। स्वा– नधिकरणेत्यादिसम्बन्धदाने स्वाघटितपदाघटकत्वसम्बन्धस्य वैयर्थ्यात्। यदपि– उक्ततृतीयसम्बन्धाङ्गीकारेऽपि 'वारिणिशयः' इत्यत्र नुमो नकारस्य रेफा– नधिकरणशयपदघटित–वारिणिशयेतिसमुदाय– निरूपितावयवत्वेन तदनवयवत्वाभावेन णत्वं न स्यात्। अतः "स्वानधिकरण– पदघटितसमुदाय– निष्ठोद्देश्यतानिरूपितावय– वत्वावच्छिन्नविधेयतानाश्रयत्व" रूपेण तृतीय– सम्बन्धो विपरिणम्यते। तेन 'वारिणिशय' इत्यत्र नुमः वारिपदनिष्ठोद्देश्यतानिरूपिता–वयवत्वावच्छिन्न[22]विधेय– ताश्रयत्वेऽपि शयघटितवारिणिशयेतिसमुदायनिष्ठोद्देश्य– तानिरूपित– विधेयत्वा– नाश्रयत्वेन णत्वं सिद्ध्यतीति; तदपि 'शीतवारीणि' इत्यत्र णत्वानापत्तेरयुक्तम्। तत्र नुमः रेफानधिकरणशीतपदघटित 'शीतवारि'निष्ठोद्देश्यता–निरूपितावय– वत्वावच्छिन्नविधेताश्रयत्वेन तदनाश्रयत्वाभावात् इति चेदत्रोच्यते–स्वानधिकरण– स्वोत्तरार्थवच्छब्द– घटितसमुदायनिष्ठोद्देश्यतानिरूपितावयवत्वा– वच्छिन्नविधेयता– नाश्रयत्वस्य तृतीसम्बन्धत्वेनाङ्गीकाराददोषः। व्रीहिवापाणीत्यत्र व्रीहिघटकरेफा– नधिकरणं रेफोत्तरश्चार्थवच्छब्दः वापेति, तद्घटितः समुदायः व्रीहिवापेति, तन्निष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रय एव नुम्रूपोनकारः, न तु तदनाश्रय इति तत्र तृतीयसम्बन्धाभावात्। 'शीतवारीणि' इत्यत्र तु शीतेत्यस्य रेफानधिकरणत्वेऽपि रेफोत्तरत्वाभावात् न तद्घटित 'शीतवारि' समुदायनिष्ठोद्देश्यता–

---

21. इदं ऋवर्णो रेफघटित इति भाष्यकारमतेन। 'ऋवर्णान्नस्य णत्व'मिति वार्तिकारम्भपक्षे तु ऋवर्णविशिष्टस्य नस्य णत्वं, वैशिष्ट्यं पूर्वोक्तमेव। प्रकृते ऋकारानधिकरणं पदं भोगपदमिति योजनीयम्।

22. नुमः मित्त्वात् 'मिदचोऽन्त्यात्पर' इति परिभाषया तस्य स्वोद्देश्यभूत– समुदायनिरुपितावयवत्वमारोप्यते। अतो नुम्निष्ठा विधेयता अवयवत्वावच्छिन्ना।

निरूपितावयवत्वावच्छिन्नविधेयताश्रयत्वेऽपि नुमो नकारस्य णत्वे बाधा। नरः इत्यादौ नकारस्य णत्ववारणाय नकाररेफवैशिष्ट्यनियामकसम्बन्धत्रये स्वोत्तरत्वरूपः प्रथमः सम्बन्धः। रामनामेत्यादौ णत्ववारणाय स्वाघटितपदाघटकत्वरूपो द्वितीयः, व्रीहिवा–पाणीत्यादौ नित्यणत्ववारणाय (अट्कुप्वाङ्सूत्रप्रवृत्तिवारणाय) तृतीय इति न कस्यापि वैयर्थ्यम्।

इदं तु तत्त्वम् – समानपदे इत्यस्य एकपदे इत्येवार्थो न त्वखण्डपदे इति, न वा सूत्रस्य 'रेफषकारान्यतरविशिष्टस्य नस्य ण' इत्यर्थे तात्पर्यम्। किन्तु रेफषकारान्यतरात् [23]परस्य एकपदस्थस्य नस्य ण इत्येव सूत्रार्थः। न चैवं रामनामेत्यत्र रेफनकारयोः रामनामेत्येकपदस्थत्वेन नस्य णत्वापत्तिरिति वाच्यम्। एकमेव यत्पदं तत्र निमित्तस्थानिनोः सतोर्णत्वमित्यर्थाङ्गीकारात् रामनामेत्यत्र निमित्तस्थानिनोः समासभूतैकपद–पूर्वोत्तरपदरूपभिन्नपदोभयवृत्तित्वात्। उक्तार्थश्च 'पूर्वपदात्संज्ञा–यामगः' इति सूत्रस्थभष्याल्लभ्यते।

पूर्वपदात्संज्ञायामगः' इतिसूत्रभाष्यार्थविचारेण रषाभ्यामिति, अट्कुप्वाङिति च सूत्रयोरर्थनिर्णयः कर्त्तुं शक्यत इति पूर्वपदादितिसूत्रभाष्यार्थः उपपाद्यते।

रषाभ्यामट्कुप्वाङ्सूत्राभ्यां रेफषकारान्यतरात्परस्य एकपदस्थस्य नस्य णत्वं विधीयते। एवं च अनेनैव शूर्पणखेत्यादौ शूर्पणखेति समस्तस्य पदस्य एकत्वेन णत्वसिद्धौ पूर्वपदादितिसूत्रं सिद्धे सत्यारभ्यमाणो विधिर्नियमाय कल्पते इति न्यायेन पूर्वपदस्थान्निमित्तात्परस्य नस्य णत्वं चेत्संज्ञायामेवेति नियमार्थम्। अनेन नियमेन रामनामेत्यादौ णत्वं वार्यते, संज्ञात्वाभावात्। परन्त्वेवं नियमे सति [24]खारपायणः, [25]करणप्रियः इत्यादावपि संज्ञात्वाभावात् नकारस्य पूर्वपदस्थनिमित्तात्परत्वेन णत्वं न स्यात्। अतो वार्तिकमारब्धम् – पूर्वपदात्संज्ञायामुत्तरपदग्रहणमिति। पूर्वपदस्थ–निमित्तात्परस्य उत्तरपदस्थनस्य णत्वं चेत्संज्ञायामेवेति वक्तव्यमिति तदाशयः। तथा च नस्य खारपायण इत्यत्र तद्धितस्थत्वात्, करणप्रिय इत्यत्र च पूर्वपदस्थत्वात् उत्तरपदस्थत्वाभावेन नियमानाक्रान्तत्वात् तत्र णत्वसिद्धिः। अथवा मातरि वर्तितव्यं, पितरि शुश्रूषितव्यमित्युक्ते यथा तस्याः (मातुः) तस्य (पितुः) च पुत्रेणेत्यवगम्यते, न त्वन्येनेति तथैव पूर्वपदस्थाद्रेफादित्युक्ते स्वत एव प्रतिपूर्वपदं यदुत्तरपदं तत्स्थस्यैव नस्य णत्वनियमः, न तु तद्धितपूर्वपदस्थयोः। तस्माद्वार्तिकं न प्रणेतव्यम्।

नन्वस्मिन् पक्षेऽपि रामस्य हयः रामहयः तेन रामहयेनेत्यत्र विभक्तिस्थस्य नस्य नित्यंणत्वापत्तिः। नकारस्य उत्तरपदस्थत्वाभावेन नियमानाक्रान्तत्वात्। यदि च सर्वत्र पूर्वपदस्थनिमित्तात्परस्य विभक्तिस्थस्य नकारस्य विषये अट्कुप्वाङ्सूत्रप्राप्तौ तद्दृष्ट्या

---

23. अट्कुप्वाङ्सूत्रविषये 'अडादिमात्रव्यवधानेने'त्यादिर्योजनीयः।

24. खरं पातीति खरपः, खरपस्यापत्यं खारपायणः, 'नडादिभ्यः फक्' इति फक्, 'आयनेयी–' इत्यायन्नादेशः।

25. करणं प्रियं यस्यासौ करणप्रियः।

प्रातिपदिकान्तसूत्रस्य परत्रिपादीस्थत्वेनासिद्धत्वात् तत्रत्यविभक्तिग्रहणस्य वैयर्थ्यापत्तेः विभक्तिस्थनकारविषये प्रातिपदिकान्तेति सूत्रं अट्कुप्वाङित्येतत्सूत्रं बाधित्वा वैकल्पिकणत्वं साधयतीयुक्त्वा रामहयेनेत्यत्र दोषो वार्यते, तर्ह्यपि शोभना प्रिया नायिका यस्य सः शोभनप्रियनायिकः इति त्रिपदबहुव्रीहौ नायिकेत्यत्र नस्य णत्वापत्तिः। पूर्वपदपदस्य समासप्रथमावयवे रूढत्वेन प्रियशब्दस्य अत्र प्रथमावयवत्वाभावेन तत्रत्यरेफात्परस्य नस्य णत्वनियमासम्भवादिति चेन्न। उत्तरपदपदस्य सामासचरमावयवे रूढत्वे प्रमाणसत्त्वेऽपि पूर्वपदपदस्य समासप्रथमावयवे रूढत्वे मानाभावात्। उत्तरपदत्वस्य समासचरमावयववृत्तित्वे प्रमाणन्तु मयूरव्यंसकादिगणे 'अकिंचनं' शब्दस्य पाठः। न किं चन यस्यासौ इति विग्रहे बहुव्रीहिसमासे प्राप्ते तत्पुरुषे नञः नकारस्य लोपनिपातनार्थोऽयं पाठः। यदि च उत्तरपदपदं [26]यौगिकं स्यात् तर्हि 'न किंचन' इत्यत्र किम्पदस्याप्युत्तरपदत्वेन नञो नस्य लोपस्स्यादुत्तरपदे' इत्यर्थकेन 'नलोपोनञः' इतिसूत्रेणैव नलोपसिद्धौ तन्निपातनार्थः पाठः अनर्थकः स्यात्। समासचरमावयवे रूढत्वे तु चनेत्यस्यैव उत्तरपदत्वेन तस्य च नञः परत्वाभावेन नलोपाप्राप्तेः तन्निपातनं सार्थकम्। किंच पूर्वपदपदस्य समासप्रथमावयवे रूढत्वे शोभनः प्रियः वापः यस्य तेन शोभनप्रियवापेणेत्यत्र प्रातिपदिकान्तेति वैकल्पिकं णत्वं न स्यात्। तत्र प्रियपदस्य समासप्रथमावयत्वाभावेन तत्रत्यरेफस्य पूर्वपदस्थत्वाभावेन प्रातिपदिकान्तसूत्र– प्राप्त्यभावात्। न चोत्तरपदपदस्य समासचरमावयवे रूढत्वे पूर्वपदात्संज्ञायामितिसूत्रेण समासचरमावयवरूपोत्तरपदस्थस्यैव नस्य णत्वनियमेन सुन्दरनवीनप्रासाद इत्यत्र नवीनपदघटकनस्य णत्वापत्तिरिति वाच्यम्। अत्रत्योत्तरपदपदस्य यौगिकत्वात्। न चेदं प्रमाणविरुद्धमिति वाच्यम्। एतत्सूत्रभाष्ये "यत्प्रतिपूर्वपदमित्येतद्भवति तत्स्थस्य नियमः इति। किंच प्रत्येतद्भवति ? उत्तरपदमि"ति उक्तत्वेन अत्रत्योत्तरपदपदस्य यौगिकत्वावगमात्। [27]यौगिकपूर्वपदपदार्थप्रतिकोटित्वेन यौगिक एव हि उत्तरपदपदार्थः ग्रहीतुं शक्यते। अतोऽत्र पूर्वपदसम्बन्धित्वेन यौगिकोत्तरपदग्रहणेऽपि उत्तरपदाधिकारान्तर्गते नलोपोनञः इत्यादौ नैवम्।

नन्वेवमपि ऋगयनमित्यत्र णत्वापत्तिः। 'अगः' इति नियमप्रतिषेधात् – अगान्तपूर्वपदस्थनिमित्तान्नस्य णत्वं चेत्संज्ञायामेवेति। गान्तस्थात्तु असंज्ञायामपीति फलति इति चेदुच्यते—अगः इति योगो विभज्यते, प्रसज्य प्रतिषेधश्चाश्रीयते। अनेन योगेन अट्कुप्वाङ्सूत्रप्राप्तं गान्तपूर्वपदस्थान्निमित्तान्नस्य णत्वं निषिद्ध्यते। तेन ऋगयनमित्यत्र णत्वाभावः सिद्ध्यति। अथवा यथा 'सर्वादीनि सर्वनामानि' इत्यत्र यथा निपातनात् संज्ञायामपि णत्वाभावः, तथा ऋगयनमित्यत्रापि 'अणृगयनादिभ्यः' इति निपातनादेव णत्वाभावः सिद्ध्यतीति नार्थो योगविभागेन। वस्तुतस्तु अत्र णत्वमेव न प्राप्नोति। रषाभ्यामिति सूत्रमनुवर्त्य अट्कुप्वाङित्यनेनैव हि णत्वप्राप्तिर्वक्तव्या। तच्च समानपदे एव प्रवर्तते। न चेदं समानपदम्। न चात्रापि समासत्वेन

26 अत्र यैगिकत्वेन समासध्टकं समासारम्भकपदावधिकोत्तरत्वविशिष्टं पदं गृह्यते।

27 समासघटकसमासारम्भकपदावधिकपूर्वत्वविशिष्टं पदं यौगिकपूर्वपदम्।

समानपदत्वाण्णत्वं भवेदिति वाच्यम्। समानमेव यत्पदं न त्वसमानं, तत्स्थस्यैव नस्य णत्वविवक्षणात्। समस्तस्य तु पदस्य समानत्वमसमानत्वं चास्ति। ननु समानमेव यत्पदं तत्स्थस्येत्यर्थः कथं लभ्यते इति चेदुच्यते –

समानपदे इत्यस्य स्थाने पदे इत्येतावन्मात्रोक्तावपि अपदस्य अप्रयोगात् सर्वस्यापि नस्य पदस्थत्वस्यैव सत्वेन पदग्रहणस्य व्यावर्त्याभावेन वैयर्थ्यापत्त्या एकत्वविवक्षार्थं पदग्रहणमिति लभ्यते। तथा च पदे इत्यनेनैव एकपदे इत्यर्थलाभे समानग्रहणम् एकमेव यत् पदं तस्मिन्नित्यर्थलाभाय। अभेदानुकरणपक्षे कुर्वन्नित्य–पदघटकनस्य णत्ववारणेन तु पदपदम् न चरितार्थम्। समानग्रहणस्य ज्ञापकत्व–परभाष्यप्रामाण्येन विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थबोधकरूपपदस्य अत्र पदपदेन ग्रहणात्। कुर्वन्नित्यत्र च पूर्वोक्तदिशा पदान्तस्येतिसूत्रेण णत्वनिषेधः। समासस्थले समासत्वेन समानपदत्वं पूर्वोत्तरपदत्वेन असमानपदत्वं चास्ति। अतस्तत्र समान–पदत्वमात्राभावात् न णत्वम्। अयं भाष्यसम्मतः फलितोऽर्थः–स्वाधिकरणपदाघट–कत्वाभाववद्रषाभ्यां परो यो नस्तस्य णत्वमिति। व्रीहिवापाणीत्यत्र तु नुम्विषये प्रातिपदिकान्तसूत्रस्य प्रतिपदविधित्वात् नित्यणत्वं वारणीयम्।

सांख्ये प्रमाणं तत्स्वरूपञ्च

डॉ. शशिकान्तद्विवेदी

वस्तुतः सांख्यशास्त्रं प्रमेयं निरूपयति अतएव प्रमेयशास्त्रमस्ति इति केचन विद्वांसः व्यवहरन्ति। परन्तु प्रमेयस्य सिद्धिः प्रमाणाद् भवति। अतः सांख्यशास्त्रेऽपि प्रमाणविवेचनस्यावश्यकता। यथोक्तं सांख्यकारिकायाम् – ''प्रमेयसिद्धिः प्रमाणाद्धि।''[1]

प्रमेयस्य सिद्धिः प्रमेयसिद्धिः, सिद्धिपदस्यार्थः अधिगमोऽवबोध इति। प्रमीयतेऽनेनेति प्रमाणम्। अत्र 'प्र' उपसर्गक 'मा' धातुना करणार्थे ल्युट्प्रत्ययः इत्यनेन प्रमाणशब्दस्य निष्पत्तिः। तत् प्रमाणम् तु एकमेव बुद्धेरेकत्वाभ्युपगमात्। प्रत्यक्षाद्युपाधिवशात्तु भिन्नमाश्रीयते। परन्तु अत्र प्रमाणात् इति पदे एकवचनस्थङस्प्रत्ययस्य निर्देशः प्रमेयपरिच्छेदकत्वं सामान्यानुसारं न तु उपाधिकृतभेदानुसारम्।

एतस्मात् प्रमाणात् प्रमेयस्य सिद्धिरिति। कथम् प्रमेयस्य सिद्धिरित्यत्र यथा व्रीह्यादि प्रमेयं प्रस्थादिना प्रमाणेन परिच्छिद्यते तथैव सांख्ये व्यक्तादिप्रमेयं प्रत्यक्षादिप्रमाणेन परिच्छिद्यते। 'प्रमेयसिद्धिः प्रमाणाद्धि' इत्यत्र हिशब्दः किमर्थः स्यात् ? किं अवधारणार्थः? यदि अवधारणार्थोऽस्ति तर्हि कस्य, प्रमेयस्य वा प्रमाणस्य इति शंङ्का संजायते।

यदि प्रमेयस्यैव सिद्धिरित्यवधारणं भवितुं शक्नोतीति तु नोचितम् यतोहि प्रमेयादभिन्नस्य–अप्रमेयस्य सिद्धिः कदापि न भवितुं शक्नोति। यत्र व्यभिचारस्य सम्भावना भवति तत्रैवावधारणस्यावश्यकता इति यथा – गौरेवायं नाश्व इति नियमः। यदि 'प्रमाणेभ्य एव प्रमेयस्य सिद्धिरित्यवधारणं विवक्षितमस्ति। तदपि न आर्षज्ञानविरोधप्रसङ्गात्। परमर्षेः भगवतः कपिलस्य ज्ञानं सांसिद्धिकमतः अप्रमाणपूर्वकम् इति सांख्यपक्षः। सांख्यकारिकायामपि उक्तम् – 'सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः।' सा० का० 43

अनेन प्रकारेण विरोधः जायते। अर्थात् यदि प्रमाणाद् ज्ञानं भवति तर्हि आर्षज्ञानं सांसिद्धिकमस्ति एतादृक् कथं कथितम्। यदि (प्रमेयस्यैव तथाच प्रमोणभ्य एव) इति उभयावधारणा 'हि' शब्देन विवक्षितोस्ति। इदमपि न भवितुं शक्नोति यतोहि पूर्वोक्ताः ये दोषाः ते प्रसज्यन्ते।

यदि 'सिद्धिरेवेत्यवधारणं विवक्षितमस्ति। अर्थात् प्रमाणात् प्रमेयस्य

सिद्धिर्भविष्यति एव। अयं अभिप्रायः सूत्रकारस्यास्ति। अयमपि नास्ति युक्तिसहः। यतोहि नियमोऽयं व्यभिचरितोस्ति। यथा– 'कदाचिद्ध्ययं प्रमाता सन्निहितेऽप्या–दित्यादौ लिङ्गे दिङ्निश्चया– दिष्वर्थेषु प्रतिहन्यते। तस्मादनेकान्तात् सिद्धिरेवेत्ये–तदयुक्तमवधारणम्। (यु0 दी0 पृ0102)

इदं यदुक्तं यत् सूत्रे 'हि' शब्दः अकथनीयः यतोहि 'प्रमेयस्यैव, प्रमाणेभ्य एव, सिद्धिरेव इति त्रिविधमवधारणमनुपपन्नम्। मम विचारे तु 'प्रमाणेभ्य एव' अवधारणं भवतु। अत्र नास्ति अनुपपत्त्यवसरः आर्षज्ञानेनापि नास्ति विरोधप्रसक्तिः यतोहि आर्षज्ञानं तु सिद्धरूपं भवति। यत् वस्तु सिद्धं नास्ति अपितु साध्यमानकोटौ वर्तते तत्कृते स्व स्वरूपस्य निष्पतौ साधनसम्बन्धस्याकाङ्क्षा भवति।

यतोहि साध्यमानवस्तु साधनसम्बन्धेन विना नोत्पत्स्यते। भगवतः कपिलस्य ज्ञानं तु स्वतः सिद्धरूपमस्ति। अतः तत्कृते स्वोत्पत्तये साधनसम्बन्धं प्रति आकाङ्क्षा नास्ति एव। अतएव 'प्रमाणेभ्यः' एव इत्यवधारणस्य स्वीकरणे नास्ति कोऽपि विरोधः।

पुनर्यत् पूर्वमुक्तं सिद्धिरेवेत्यवधारणं तत्तु अनेकान्तादिदोषयुक्तम्। अर्थात् दिङ्निर्धारकस्यादित्यस्यादि लिङ्गस्य सन्निहितेऽपि प्रमातारं दिङ्निश्चयो न भवति यदियं प्राक्काष्ठा वा दक्षिणकाष्ठा। इदमपि न युक्तिसहम्। यतोहि सत्वादिगुणानामङ्गाङ्गिभावानियमात्। अत एव तमः प्राबल्यसामग्र्यात् प्रमाजनकं प्रमाणं दुर्बलं भवति। लोके सत्वादीनामनियतोऽङ्गाङ्गिभावः। यतोहि देशकाल–निमित्तसामर्थ्याद्धि कदाचित् सत्वं ,कदाचिद्रजः, कदाचित्तमः प्रकृष्यते। सत्वप्रकर्षश्च प्रकाशरूपत्वात् प्रमाणम्। तत्र यदा तमः प्रकृष्यते तदा सत्वस्याभिभूतत्वात् तत्कार्यमनुमानं त्रिकालेपि अङ्गत्वेन उपतिष्ठते न तु अङ्गित्वेन। अतएव आदित्या–दिलिङ्गप्रवृत्तौ अपि दिङ्निर्धारणादिष्वर्थेषु अनुमानं प्रतिहन्यते तथा च तस्य प्रमाणत्वस्य हानिर्भवति। यतो हि तदनुमानं प्रमेयस्य प्रतीतिं न कर्तुं शक्नोति। इतरथा तु न तस्य स्वरूपस्य (प्रमाणत्वस्य) हानम्।

परन्तु यस्य तु निश्चयात्मकबोधाभावेऽपि प्रमाणस्य प्रतिबन्धः नेष्टः अर्थात् तत् प्रमाणमेव मनुते, तत्र तु प्रमाणानां स्वरूपस्य हानं प्राप्तम्।

'प्रमाणसत्वेऽपि नास्ति अर्थनिश्चयः इत्यत्र व्यभिचारः। यतोहि प्रमाणानां स्वरूपं यत् प्रमेयस्य परिच्छेदः। अतः युक्तमेतद् 'हि' शब्दो अवधारणार्थः।

अत्र प्रमाणमिति यौगिकपदं लक्ष्यं तन्निर्वचनमेव तस्य लक्षणम् यथा – प्रमायाः करणं प्रमाणं इति व्युत्पत्त्याः माध्यमेन प्रमाणं विवेचितम्। अर्थात् यथार्थज्ञानस्य साधनं प्रमाणं।''

सांख्यतत्वकौमुद्यामप्युक्तम् –

''अत्र च प्रमाणमिति समाख्या लक्ष्यपदं तन्निर्वचनं च लक्षणम्।'' प्रमीयतेऽनेनेतिनिर्वचनात् प्रमां प्रति करणत्वमवगम्यते। तथा च प्रमायाः स्वरूपविषये

उक्तं – ''असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः प्रमा'' तथा च अग्रे ''बोधश्च पौरुषेयः फलं प्रमा।'' अनेन प्रकारेण ज्ञातं यत् प्रमायाः लक्षणद्वयं वर्तते। संशयविपर्ययविकल्पस्मृतिभिः भिन्ना चित्तवृत्तिः सा एव प्रमा। अर्थात् यथार्थज्ञानरूपा।

अपरा प्रमा पौरुषेयबोधरूपा। यथा घटमहं जानामि इत्याकारकचित्तवृत्त्याः फलस्वरूपो यो अनुभवः तस्य पुरुषे उपचरितत्वेन बोधः, वा बुद्धिदर्पणे पुरुषस्य प्रतिबिम्बतया संक्रान्तिः एव पौरुषेयबोधः कथितुं शक्यते।

सांख्यसूत्रेऽपि अयमेव बोधः –

''द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा, तत्साधकतमं यत् तत् त्रिविधं प्रमाणम्।[2]

सा प्रमा कस्य धर्मः बुद्ध्या वा पुरुषस्य वा द्वयोर्बुद्धिपुरुषयोर्वा इति प्रश्नः? विचारयन्तु भवन्तः।

अत्र यदि प्रमारूपं फलं पुरुषनिष्ठमात्रमुच्यते तदा बुद्धिवृत्तिरेव प्रमाणं भविष्यति। यदि च बुद्धिनिष्ठमात्रमुच्यते तदा तूक्तेन्द्रियसन्निकर्षादिरेव प्रमाणम् भविष्यति। वस्तुतस्तु पुरुषः प्रमासाक्षी एव न प्रमाता इति। यदि च पौरुषेयबोधो बुद्धिवृत्तिश्चोभयमपि प्रमा उच्यते तदा तूक्तमुभयमेव प्रमाभेदेन प्रमाणं भवति। वस्तुतः चक्षुरादिषु इन्द्रियेषु प्रमाणव्यवहारः परम्परयैव भवति न साक्षात् यथा पातंजलभाष्ये व्यासदेवैः पुरुषनिष्ठबोधः प्रमेत्युक्तः यथा– 'इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विधया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम् फलम् अविशिष्टः पौरुषेयश्चित्तवृत्तिबोध इति।'' अपि च नारायणतीर्थेनापि सांख्यचन्द्रिकायां स्वीकृतम् । यत् – इन्द्रियादिकं न प्रमाणं किन्त्विद्रियादिजन्या वृत्तिरेव, तथा हि अविसंवादिज्ञानमनधिगततत्त्वबोधो वा प्रमा तत्करणं प्रमाणं तस्या वृत्तेः अयोगव्यवच्छेदेन सम्बन्धि तदेव प्रमाणसामान्यलक्षणम्।

सांख्यमते प्रामाण्यं तथा च अप्रामाण्यं ज्ञानस्य वैशिष्ट्यम् यथोक्तं सर्वदर्शनसंग्रहे।

''प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः।''

सांख्यमतानुयायिनः प्रामाणिकस्य ज्ञानस्य कृते बहिर्गुणस्य आवश्यकतां न स्वीकुर्वन्ति। तेषां मतमस्ति यत् ज्ञानस्य प्रामाणिकता न अन्यासु बाह्यासु परिस्थितिषु आश्रिता भविष्यति।

अत्र 'अनधिगतार्थगन्तृप्रमाणम्' इति, प्रमाया इदं लक्षणं नानुकूलं, यतोहि प्रमाया लक्षणमिदं स्वीकरणे इयं बाधा – घटप्रत्यक्षीकरणावसरे घटोऽयं घटोऽयमिति धारावाहिकज्ञाने केवलं प्रथममेव ज्ञानं प्रमा भविष्यति अन्यानि ज्ञानानि तु स्वपूर्ववर्त्तिज्ञानेनाधिगतान् अर्थान् एव ग्रहीष्यन्ति। अनेन प्रकारेणास्य लक्षणस्य द्वितीयतृतीयादिप्रमात्मकेषु ज्ञानेषु अतिव्याप्तिर्भविष्यति। यथोक्तं तर्कभाषायाम्–

'तन्न एकस्मिन्नेव घटे घटोऽयमिति धारावाहिकज्ञानानां गृहीतग्राहिणाम्–

प्रामाण्यप्रसङ्गात्।'

अनेन प्रकारेण 'अगृहीतग्राहित्वं तु प्रमात्वस्य नियामकमिति' अस्वीकरणे अयं प्रश्नः असमाहितः एव – यदा अनुभवस्मृत्योर्यथार्थत्वांशे साम्यता तदा यथार्थस्मृतिः प्रमाणभिन्नेति स्वीकरणे किं कारणमस्ति। अस्यान्वेषणे न्यायवार्तिक–तात्पर्यटीकायां वाचस्पतिमिश्रेणोक्तं यद् नैयायिका "यथार्थानुभवः प्रमा तथा च यथार्थस्मृतिः प्रमाभिन्ना इति" स्वीकुर्वन्ति तत् तु लोकव्यवहाराधारेण– यथा–

'प्रमा साधनं हि प्रमाणम् न च स्मृतिः प्रमा, लोकाधीनावधारणो हि शब्दार्थ–सम्बन्धः। लोकश्च संस्कारमात्रजन्मनः स्मृतेरन्यामुपलब्धिमर्थाव्यभिचारिणीं प्रमामाचष्टे तस्मात्तद्धेतुः प्रमाणमिति न स्मृति हैतो प्रसंगः अनधिगतार्थगन्तृत्वं च धारा–वाहिकज्ञानानामधिगतार्थगोचराणां लोकसिद्धप्रमाणभावानां प्रामाण्यं वहन्तीति नाद्रियामहे।'[3]

परन्तु सांख्यमते तु अनधिगतानां प्रमेयाणां सिद्ध्यर्थमेव प्रमाणस्यावश्यकता अतस्तत्र अनधिगतार्थगन्तृत्वमपि प्रमाणलक्षणं भवितुं शक्नोति। इत्याधुनिकानां विचारः।

तर्हि बाह्यासु परिस्थितिषु प्रामाणिकता अन्यासु परिस्थितिषु अनेन प्रकारेण अनवस्था भविष्यति। प्रामाण्यं तथा अप्रामाण्यं च ज्ञानं भवति मतमिदं स्वव्याघाति प्रतीयते। परन्तु सांख्यदृष्ट्या नास्ति असंगतं कथं, सांख्यमतमस्ति यत् यो वस्तुस्थित्याः अंशः मम सम्मुखे स्फुरति स सदैव मम दृष्ट्या सापेक्षारूप एव अस्ति तथा च सत्कार्यवादानुसारेण केवलं अव्यक्तमेव व्यक्तं भवितुं शक्नोति अतः यत् किमपि व्यक्तं अस्ति तत् तु तत् ज्ञानात् पूर्वमेव स्वीकरणीयम्।

बहूनि प्रमाणानि आचार्यैरभ्युपगम्यन्ते तानि सर्वाणि किं सांख्याचार्योऽनुमन्यते। नो चेदुच्यते। किं तर्हि ? 'त्रिविधं प्रमाणमिष्टम्' (का04)। 'त्रिविधं' इति शब्दे विधानं विधा तिस्रो विधा अस्य तत् त्रिविधं त्रिप्रकारमित्यर्थः।

अनेनैतद् आचार्याः व्याख्यान्ति एकमेव बुद्धिस्वरूपं सत्वं भिन्ननिमित्ता–नुग्रहोपजनिताभिः कार्यविशेषेण परिच्छिन्ननानारूपभेदाभिः शक्तिभिरूपकाराद् भिन्नमिव भासमानदृष्टादिशब्दवाच्यं भवति।

सांख्यादिभिन्नशास्त्रेषु -विषययुक्तैरिन्द्रियैरुपजनिता बह्व्यो बुद्धयस्तथेह सांख्यशास्त्रेऽपि विद्यन्ते तथा च याः परिकल्प्यमानाः स्वतन्त्राणि त्रीणि प्रमाणानि स्युः "दृष्टमनुमानप्राप्तवचनं च।" अर्थात् सांख्यमते वस्तुतः एकमेव प्रमाणमस्ति बुद्धिः तथा च तस्या प्रकारमात्रं वर्तते "दृष्टमनुमानप्राप्तवचनं च।" इति।

कथं पुनरेतदवगम्यते यथा – त्रिविधमेव प्रमाणं न पुनरनेकविधम्। कारिका–यामुच्यते 'सर्वप्रमाणसिद्धत्वात्'। इति हेतुपदम्। अस्यार्थः सर्वाणि च तानि प्रमाणानि सर्वप्रमाणानि इति कर्मधारयः तदनन्तरं सिद्धस्यभावः सिद्धत्वम्, सर्वप्रमाणानां सिद्धत्वं–सर्वप्रमाणसिद्धत्वम् षष्ठीतत्पुरुषानन्तरं हेत्वर्थे ङस्विभक्त्यनन्तरं सर्वप्रमाणसिद्धत्वात्

इति हेतुवाक्यं निर्मितम्। तस्मिन्नेव त्रिविधे प्रमाण इति वाक्यशेषः। सम्पूर्णं वाक्यमिदं– 'तस्मिन्नेव त्रिविधे प्रमाणे सर्वप्रमाणसिद्धत्वात् इति। सर्वेषामन्यशास्त्राणां परिकल्पितानां प्रमाणानामस्मिन्नेव त्रिविधे प्रमाणेऽन्तर्भावादिति त्रिविधं प्रमाणम्।

अथवा – सर्वप्रमाणेषु सिद्धं सर्वप्रमाणसिद्धम्' इत्यत्र सप्तमीतत्पुरुषः 'सिद्धशुष्कपक्वबन्धैश्च '(पा० सू० 2/1/41) इति सूत्रेण जातः। तस्य भावः प्रमाणसिद्धत्वं तस्मात् प्रमाणसिद्धत्वात् , कस्य? अतः त्रिविधं प्रमाणं सिद्धमिति कारिकार्थः। किम्पुनस्तत् त्रिविधं प्रमाणमिति ? उच्यते कारिकायां दृष्टमनुमानं–माप्तवचनं च।' इति।

'तत्र दृष्टं नाम उपात्तविषयेन्द्रियवृत्युपनिपाती योऽध्यवसायः। अनुमानं द्वयोरविनाभाविनोरेकप्रत्येक्षण प्रमायाः तत्पूर्वकं सम्बन्ध्यन्तरे यत् पश्चान्मानं भवति। आप्तवचनं तु प्रमाणभूतशब्दद्वारकोऽत्यन्तपरोक्षेऽर्थे निश्चयः'। इति युक्तिदीपिकायां प्रतिपादतिम्।

पुनः त्रैविध्यानुपपत्तिः न्यूनाधिकश्रवणात् – यथोक्तम्

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानं च तच्चापि सांख्याः शब्दं च ते उभे।
न्यायैकदेशिनोऽप्येवमुपमानं च केचन।
अर्थापत्त्या सहैतानि चत्वार्याहुः प्रभाकराः।
अभावष्टान्येतानि भाट्टा वेदान्तिनस्तथा।
संभवैतिह्ययुक्तानि तानि पौराणिका जगुः।। मानसोल्लासे 2/17–20

एतेषां सर्वेषामुपरि प्रायः सर्वे भाष्यकाराः स्वस्वभाष्ये त्रिषु प्रमाणेषु अन्तर्भावयन्ति इति तत्रैव द्रष्टुं शक्नुवन्ति भवन्तः।

पुनः दृष्टादित्रिविधं प्रमाणं वर्तते परन्तु लक्षणं विना तत् ज्ञानं न भवितुं शक्नोति। अतः दृष्टादिप्रमाणस्य लक्षणावसरे शङ्का जायते – दृष्टिवैचित्र्यात् दृष्टादीनां लक्षणमनवस्थितम्। यथावलोकयन्तु –

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति केचित्। तथा आत्मेन्द्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यदित्येके। सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमित्यपरे। श्रोत्रादिवृत्तिरितिवार्षगणाः। कल्पनापोढमित्यन्ये, इत्थमनवस्थितं लक्षणमिति दृष्टादीना प्रतिपत्तिः। अतएव उच्चते 'प्रतिविषयाध्यवसायो दृष्टम् इत्यत्र विषिण्वन्तीति विषयाः शब्दादयः ता विषीयन्ते उपलभ्यन्ते इत्यर्थः। ते च द्विविधाः – विशिष्टा अविशिष्टाश्च विशिष्टाः पृथिव्यादिलक्षणा अस्मदादिगम्याः। अविशिष्टाश्च तन्मात्रलक्षणा योगिनामूर्ध्वस्रोतसां च गम्याः। कारिकायामग्रेऽपि प्रतिपादितम् – यथा –

''बुद्धीन्द्रियाणि तेषां पंच विशेषाविशेषविषयाणि।' (का० 34)

अपिच – 'अध्यवसायो बुद्धिरिति।' (का० 23)

विषयं विषयं प्रतिवर्तते इति प्रतिविषयम् इन्द्रियम् तस्मिन् यो अध्यवसायः स प्रतिविषयाध्यवसायः। युक्तविषयाणामिन्द्रियाणां वृत्त्यनन्तरं सत्वोद्रेकादरजस्तमन्यूनं यत्प्रकाशरूपं तद्दृष्टमिति प्रमाणं अनेन प्रमाणेन यश्चेतनाशक्तेरनुग्रहस्तत् फलम्। एवमग्रेऽपि प्रमाणं फलभावःस्मर्तव्यः।

किं पुनरिदं प्रमाणात्फलमर्थान्तरं वा अनर्थान्तरम् ? अधिगतरूपत्वात् प्रमाणात्फलमनर्थान्तरम्। अर्थात् ज्ञानस्योत्पत्त्यैवाधिगतोऽर्थ इति अतः कुतः ज्ञानात् फलभेदः?

पुनः यदि ज्ञानं फलं च एक एव, तर्हि फलं प्रति ज्ञाने करणत्वं कथं भविष्यति। अर्थात् तत् प्रमाणं कथं भविष्यति। प्रसिद्धिवशात् तु करणभावः। यतोहि विषयभानयुता हि ज्ञानस्योत्पत्तिः अधिगमरूपापि लोके सव्यापारेव प्रतीतेति। अतः ज्ञाने करणत्वं कल्पनया न तु परमार्थतः।

सांख्यानुसारेण तु ज्ञानात्फलमर्थान्तरमधिकरणभेदात्। ज्ञानरूपप्रमाण–मध्यवसायाख्यं हि बुद्ध्याश्रयं, पुरुषाश्रयं फलमनुग्रहलक्षणम्। अतः उभयोरधिकरणं भिन्नमस्ति। भिन्नाधिकरणयोरेकत्वं भवितुं नार्हति।

पुनः कारणतुल्यत्वात् शब्दतुल्यत्वम्। अक्षमक्षं प्रति वर्तते इति प्रत्यक्षमुच्यते द्वयं चाक्षं प्रति वर्तते विषयोऽध्यवसायश्च। विषयोऽनुग्राहकत्वेन तद् अध्यवसायो अनुग्राह्यत्वेन इन्द्रियादिकं प्रति सम्बद्धम्। अनेन प्रकारेण उभयोरपि तुल्यं निमित्तत्वमिति कृत्वा तुल्यशब्दवाच्यता भविष्यति।

अग्रे– त्रिविधमनुमानमाख्यातम्' पूर्तवत्, शेषवत्, ससामान्यतोदृष्टं च। तत्र पूर्वमिति कारणमुच्यते। यस्य हि यत् कारणं स लोके तत्पूर्वकमित्युच्यते। यथा तन्तुपूर्वकः पटः।

शेष इति विकारनाम शिष्यते इति कृत्वा। तथा चोक्तम् – न शेषोग्नेरन्यस्य जातमित्यस्ति नापत्यमन्येन जातं सम्भवतीत्यर्थः। अनेन प्रकारेण शेषोऽस्यास्तीति शेषवत्।

पूर्ववत्– यदा कारणमभ्युदितं दृष्ट्वा भविष्यत्त्वं कार्यस्य प्रतिपद्यते। यथा– मेघोदये भविष्यत्त्वं वृष्टेः। शेषवत् – यदा कार्यनिर्वृत्तिं दृष्ट्वा कारणसद्भावं प्रतिपद्यते। यथा– नदीपूरं दृष्ट्वा वृष्टिं प्रतिपद्यते। सामान्यतोदृष्टं नाम यत्रैकदाऽर्थयोरव्यभिचारमुपलभ्य देशान्तरे कालान्तरे च तज्जातीययोरव्यभिचारं प्रतिपद्यते। यथा– क्वचिद्धूमाग्नि–सम्बन्धं दृष्ट्वा क्वचिद्धूमान्तरेणाग्न्य–न्तरस्यास्तित्वं प्रतिपद्यते।

सांख्यकारिकायां शब्दप्रमाणविषये 'आप्तश्रुतिराप्तवचनन्तु' इत्युक्तम्। अत्र आप्तवचनं लक्ष्यपदं तथा च आप्तश्रुति लक्षणपदम् वर्तते। अत्र समासः आप्ता चासौ श्रुतिराप्तश्रुतिः। अथवा आप्तोऽस्यास्तीत्याप्तः अकारो मत्वर्थीयः अत्र प्रत्ययः, तद्यथा तुन्दोघट इति आप्तेभ्यः श्रुतिराप्तश्रुतिः। सरूपाणामित्येकशेषः।

अतः अत्र पूर्वेणाप्तश्रुतिग्रहणेन एवं अपुरुषबुद्धिपूर्वक आम्नायः (वेदः) स्वतन्त्रः पुरुषनिः श्रेयसार्थम् प्रवर्तमानो निःसंशयं प्रमाणम्। द्वितीयेन पदेन मन्वादिनि–बन्धनानां च स्मृतीनां वेदांगतर्केतिहासपुराणानां शिष्टानां नाना शिल्पाभियुक्तानां च अदुष्टमनसा यद् वचस्तत् प्रमाणमिति।

अनेन प्रकारेण आप्तश्रुतिरित्यत्र आप्तः ब्रह्मादिआचार्यः तथा च श्रुतिः वेदः, उभयोः ग्रहणे तात्पर्यम्।

सन्दर्भाः

[1] सां० का० ४

[2] सा० सू० १/८७

[3]. न्या० वा० ता० टी० पृ० २१

कालिदासस्य साहित्ये शिवस्वरूपम्

डॉ.शशिशेखरचतुर्वेदी

कविकुलगुरूः कालिदासः शैवमतावलम्बी शिवोपासक आसीद् इति तस्य ग्रन्थेभ्यः सुस्पष्टं प्रतीयते। तस्याराध्यदेवोऽयं शिवः किंस्वरूपः ? इति जिज्ञासायां तस्य त्रिविधं रूपं दृष्टिगोचरतामायाति – प्रथमं परमतात्विकं पारमेश्वरं रूपं द्वितीयं दिव्यं दैविकं रूपं, तृतीयं च मानवीयं रूपम्। तत्र प्रथमस्वरूपविचारणा– यामागमसम्मतः शिवाद्वयवाद एव शरणम्।

तन्त्रमतेन शिवः विश्वोत्तीर्णः कौलमतेन च विश्वमयः किन्तु त्रिकमतानुसारं प्रकाश स्वरूप एष शिवः विश्वोत्तीर्णो विश्वमयश्च उभयमप्यस्ति। इदमेव परमेश्वरस्य परमत्वं यत् विश्वोत्तीर्णता विश्वमयता चास्य स्वरूपभूते सहैव वर्त्तमाने स्तः। विश्वोत्तीर्णास्थायामेष शिवः केवलं शुद्धप्रकाशमयो वर्त्तते। तदतिरिक्तं न किंचनास्य स्वरूपम्। शिवस्य एतस्यामवस्थायामिदं विश्वं मयूराण्डरसन्यायेन तस्मिन्नेव स्थितं भवति किन्तु विश्वोतीर्णत्वात् तं न प्रतिभाति। एवमियमवस्था असीमशुद्धाहंस्वरूपा। पूर्ण तत्वस्य अस्यां गंभीरतमायां स्थितौ सत्वस्य चितः आनन्दस्य च कल्पनापि कर्त्तुं न शक्यते। एषा अव्याकृत– अव्यक्त–निरंश सन्मात्र चिरनिगूढतत्वस्य सा गंभीरतमा स्थितिर्यास्याः केनापि रूपेण कयापि वाचा निर्वचनमसम्भवि । अत्र इदमवधेयं यत् यदा शिवे शक्तिः अस्फुटा अर्थात् स्फुरणरहिता भवति तदा स शिवत्वे सत्यपि शव इव जड इव वा भवति। तदानीं अनाश्रितशिव इति नाम्ना शास्त्रे प्रसिद्धमिदं शिवतत्वं अविद्ययावृतं अख्यातिमयः कथ्यते। इदमस्य विश्वोतीर्णरूपम्। यथोक्तं पुरुषसूक्ते – 'त्रिपादस्यामृतं दिवि।' इति। एष विश्वोत्तीर्णः शिवः कृशोऽपूर्णः निमीलनसमाधिज्ञेयः।

शिवस्य द्वितीय परमतत्त्विकं रूपं विश्वमयं। परमशिव यदा स्वकीयां सत्तां स्वयमेव विमृशति, यदा च तस्याभ्यन्तरे वर्त्तमाना शक्तिः स्वयं समुल्लसति स्पन्दते वा तस्यां गभीरतमायां सन्मात्रायां स्थितौ सूक्ष्मतमशक्तिरूपा एका कला आविर्भवति या चिन्नामा परिगीयते। इयमेव शक्तिर्विमर्शप्रत्यवमर्शपरावाक् आदि नामभिरपि व्यवह्रियते। एषा चित्शक्तिः पूर्णसत्वस्य बहिर्मुखतायाः प्रथमः प्रकाशः। एवमेव चितः स्पन्दात् आनन्द आविर्भवति। इत्थं यदा परमेश्वरः स्वैविमर्शशक्त्या एभिस्त्रिभी रूपैः बहिरुन्मिषति तदा इदमस्य शिवतत्वस्य विश्वमयं रूपम्। विश्वमयतया अस्यां दशायां प्रकाशविमर्शौ सहैव वर्तमानौ स्तः। इदं सर्वं तस्य स्वातंत्र्येण सम्भवति।

यथोक्तमुत्पलदेवेन—

स्फारयस्यखिलमात्मनास्फुरन्
विश्वमामृशसि रूपमामृशन्।
यत् स्वयं निजरसेन घूर्णसे
तत्समुल्लसति भावमण्डलम्।

कविताकामिनी विलासेन कालिदासेन शिवस्य इदं विश्वमयमेव रूपमाराधितम्। अभिज्ञानशाकुन्तले ''या सृष्टिः स्रष्टुराद्या ....।'' इति नान्दीश्लोकेन कुमारसम्भवे'' तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः'' इति रघुवंशे च' अवेहि मां किंकरमष्टमूर्तेः'' इति श्लोकांशाभ्यां च महाकविः संकेतयति यत् पृथ्वी जलं तेजः वायुराकाशः सूर्यचन्द्रौ यजमानश्च इत्येतदष्टौ मूर्त्तयः स्वयं शिव एव। कुमारसम्भवे न विश्वमूर्तेरवधार्यते वपुः, एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता' इति चानेकवर्णनाभिः शिवस्य विश्वमयत्वं प्रतिपाद्यते कालिदासेन।

पुराणादिषु पृथ्वीतत्वस्याभ्यन्तर एवं विश्वस्य विस्तारः किन्त्वागभेभ्य इदं ज्ञायते यत् पृथिवीतत्वाद् बहिरपि विश्वं विस्तृतमस्ति। यथा अनन्तभुवनसमष्टि—रूपस्यास्य ब्रह्माण्डस्य ब्रह्मा अधिष्ठातृदेवः तथा अनन्तब्रह्माण्डसमष्टिभूतस्य प्राकृताण्डस्य, अनन्तप्राकृताण्ड समष्टिभूतस्य मायाण्डस्य एवमेवासंख्यमायाण्डसमष्टेः शाक्ताण्डस्य च क्रमशो विष्णुः रुद्रः ईश्वरसदाशिवौ च अधिष्ठातारः सन्ति। विश्वस्यैतावान् विस्तारः, यस्य प्रतिपादनं कालिदासः विश्वमूर्तिपदेन करोति।

कालिदासेन शिवस्यापरं वैशिष्टयं दर्शितं तच्चास्यात्मयोनित्व मस्ति। यस्य किमपि कारणं नास्ति अथ च तस्य सत्ता विद्यमानाऽस्ति सः आत्मयोनिः। आत्मानमात्मना बिभ्रत् सृजस्यात्मानमात्मना' इति नीत्या शिवः स्वयं स्वस्य रचयिता। अत्र स्वं किं यस्य रचयिता शिवः ? इति पिपृच्छायां निखिलं विश्वमेव तस्य स्वं अस्ति। ततः परतरं किंचिदपि नास्ति। ''मत्तः परतरं नान्यत् किंचिदस्ति धनंजय। 'अतएव कालिदासेन स 'ईश्वर' इति कथ्यते। ''अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम्।'' स च शिवः निरतिशयसामर्थ्यवान्। तेनेदं विश्वं ध्रयते। विश्वस्य सर्जनात् धारणात् संहारणाच्चयं जगद्गुरूरिति परमेश्वर इति च उक्तः।

परमेश्वरः शिवः पशुपतिरपि गीयते। पाश्यते बन्धनं प्राप्यते इति पशुः जीवः। पशुत्वं च जीवत्वप्रापकः अनादिः संस्कारः। मिथ्याज्ञानं अधर्मः आसक्तिः आसक्तिहेतुः सदाचरणादभ्रंशः इति पंचविधं पशुत्वस्य मूलम्। एवं पशुत्वयुक्तानां जीवनां संसारान्मोचकत्वात् शिवः पशुपतिः इति कथितः।

शिवस्यं द्वितीयरूपं दिव्यं देवत्वमयं अस्ति्।

'वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः।।''

इति नान्दीश्लोके स्थिरभक्तियोगसुलभः'' इति वचनेनास्य उपासनीयता स्फुटी भवति। 'एकैश्वर्ये स्थितोऽपि प्रणतबहुफलो'' इत्यनेनापि देवत्वं प्रकाशतेऽस्य शिवस्य। 'ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः' इति भरतवाक्यमपि अस्य मोक्षाप्रदं दिव्यं सामर्थ्यं समर्थयति। एष शिवः जगतः पिता। तस्य चरितमलोकसामान्यमचिन्त्य हेतुकम्। अत एव स महात्मा। स अकिंचनोऽपि सम्पदां प्रभवः। तस्य दिव्यं संसर्गमवाप्य अमंगलमपि मंगलं भवति, अमेध्यमपि मेध्यतां व्रजति। अतएवः स त्रिलोकनाथः। भीमरूपोऽपि शिवः। स देहिनामन्तरात्मा वन्द्यः विश्वगुरूः। न केवलं मानुषाणामपितु यक्षादीनामपि स पूज्यः। अलकापुर्या बाह्योय्याने तस्य प्रतिमा स्थापिता यस्याः शिरसि स्थिता चन्द्रचन्द्रिका हर्म्याणि धवलयति।

देवत्वस्यैव कारणात् अस्मिन् विरूद्धधर्माणामपि समावेशः आदराय भवति। स स्वय मेकैश्वर्यवानपि बहुफलदायी। कान्तासंमिश्रदेहोऽपि विषयविहीनानां यतीनामग्रगण्यः। जगद्धारणं कुर्वन्नपि निरभिमानः। स्वयं व्यालादितमोगुण–वर्धकैर्वस्तुभिर्वृतोऽपि भक्तजनानां तामसी वृत्ति नाशितुं क्षमः। अवस्तुनिर्बंधपरोऽपि भीमरूपोऽपि स शिवः। त्रिलोकनाथोऽपि पितृसद्मगोचरः। वस्तुतः यत्र अपूर्णता भवति तत्र भेदो भवति। कालिदासस्य शिवेऽपूर्णत्वं नास्ति। स सर्वदा सर्वथा च परिपूर्णः। तस्मात् तत्र भेदस्यावधारणा नास्ति। अतएव सामान्यदृष्टया अस्पृश्यमपि गजाजिन चिताभस्मादि तत्र कामप्यशुद्धिं न दधाति। शिवस्य इदमेव स्वरूपं कालिदासेन समर्थितम् अतएव स कथयति 'न विश्वमूर्तेरवधार्यते वपुः'। अर्थात् निखिलमपि विश्व शिव एव। यथा एकस्मिन्नेव शरीरे इदं शुद्धमिदमशुद्धमिति शुद्धाशुद्ध विकल्पना न सम्भवति तथा पूर्णाहंभावरूपस्य शिवस्य देहेऽपि न काचित् शुद्धाशुद्धविचारणा। तस्मादेव कारणादस्य महात्मनश्चरितं अलोकसामान्यमचिन्त्य हेतुकम्।

शिवस्य तृतीयं रूपं मानवीयम्। काव्यं सद्यः परनिर्वृतये भवति। परनिर्वृतिः परमानन्द प्राप्तिः। सा च साधारणीकरणेन। साधारणीकरणं च तदैव सम्भाव्यते यदा सामाजिकः स्वीये मानवजीवने घटमानान् क्रियाकलापान् साजसज्जाप्रदर्शनपूर्वकं अनुकूलवर्णविन्यासवर्णन पुरस्सरं वा अनुभवति। तदर्थं देवा अपि यदि काव्यपात्रतायै समानीयन्ते तदा तेषामपि मानवीकरणमनिवार्यं भवति। कालिदासस्य काव्यसाहित्येऽपि शिवस्य मानवीयं रूपं दरीदृश्यते। तत्र प्रथमं तावत् तस्य शरीरित्वं वर्णयति महाकविः – 'शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहास्ता। इत्यादि। कुमारसम्भवेऽयं शिवः साक्षात् मानवीयलीलां कुर्वन् दृश्यते। स धैर्यं विहाय उमामुखं पश्यति। एतेन तस्मिन् रागस्य प्रेम्णो वा संचारी ज्ञायते। कचित् क्रोधाविष्टचेता अपि इष्टः कालिदासेन यथा – क्रोधं प्रभो संहर संहेरति' इति। 'तथा समक्षं दहता मनोभवं पिनाकिना' इति च। नेत्रास्यनासिकाबाहुपादादिनिरिवलैरपि आकोपितोऽसौ मूर्ध्नि

अर्धचन्द्रं धारयति। शिवसि निपतन्ती गंगा तस्य शोभां वर्धयतितराम्। यद्यप्यस्य वपुर्विरूपाक्षं दिगम्बरं भस्मोद्धूलितं भुजगवलयितं त्रिशूलधारि तथाप्यसौ देवप्रियः लोकप्रियः सर्वप्रियः। असौ पार्वतीं परिणेतुं देवैः सन्देश प्रेषयति हिमवत्पार्श्वे। यदा देवा हिमालयात् वैवाहिकीं स्वीकृतिं समादाय शूलिनं संसूचयन्ति विवाहाय च निश्चितं दिनं ज्ञापयन्ति तदाऽद्रिसुतासमागमोत्मुकोऽसौ पशुपतिः अवशिष्टान्यहानि कृच्छात् नयति। अनन्तरं यथा लोके वरयात्रा विवाहार्थ प्रतिष्ठते तथास्यापि वरयात्रा प्रस्थिता। तत्रास्य शरीरे न काचिदलंक्रिया। नन्दिवृषभारूहूयासौ श्वसुरमन्दिरं प्रस्थितवान्। प्राप्ते च श्वसुरमन्दिरे स शिवः नारीभिः सस्पृहमुदीक्षितः। यथाह कविः—

''तमेकदृश्यं नयनैः पिन्त्यो नार्यो न जग्मुर्विषयान्तराणि।
तथाहि शेषेन्द्रियवृतिरासां सर्वात्मना चक्षुरिव प्रविष्टा।

एषः शिवः एतावान् सुन्दरः रूपवान् यत् अस्य सौन्दर्य विलोस्य कामः स्वयं स्वशरीरं न्यस्तवान् न तु दग्धः शिवेन। सर्वाकृतिसुन्दरोऽसौ शिवः मानवीयैर्गुणैरपि संयुक्तः। लज्जारोमोद्गमादि सर्वं दृश्यतेऽस्मिन् शिवे। स विधिना पार्वतीमुपयमयति। परिणीय च तां शिवः तया सह मनुष्योचितं विहारं करोति। यदा दैनन्दिनकिया वशात् रतिक्रीडा विघ्नविहता भवति फलस्वरूपं च पार्वती कोपं प्रयाति तदा शिवः कृतापराध– नायक इव तामनुनयति ''मुंच कोपमनिमित्तकोपने सन्ध्ययाप्रणमितोऽस्मि नान्यया। किं न वेत्सि सहधर्मचारिणं चक्रवाक समवृत्तिमात्मनः। इति। स शिवः दिव्यंभर्त्य चोभयप्रकारकमपि सुखमनुभवति। यथोक्तं कविना —

''मनुभूयशङ्करः पार्थिव च दयितासखः सुखम्।'
समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः।
शतमगमदृतूनां सार्धमेका निशेव।' इति।

यथा सामान्यो जनः जगत्यस्मिन् व्यवहरति तथा शिवोऽपि। तस्य कार्तिकेयनामकः पुत्रो जायते। स तस्मै स्निह्यति।

इत्थमुपर्युक्तविवेचनेन वयं पश्यामो यत् कालिदासस्य साहित्ये शिवस्यानेकानि रूपाणि चित्रितानि। किन्तु यतो हि कालिदास काल्यादसः काली च कलनात् विश्वस्य विरचनात् शक्तिरूपां शक्तिं विना कस्यापि कार्यस्य कर्त्तुमशक्यत्वात् शिवोऽपि शाश्वतं शक्तियुक्तः। यथोक्तं सोमानन्दनाथन ' न शिवः शक्तिरहितो न शक्तिव्यतिरेकित'' इति। शक्ति शक्तिमतोर्भेदः शैवे जातुन वर्ण्यते। शक्तयोऽस्य जगत् कृत्स्नं शक्तिमाँस्तुमहेश्वरः। इति च। एतामेव विचारणामभिसन्धाय तेन रघुवंशे उक्तम् —

वागर्थाविव सम्प्रक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ।।

वैष्णवागम में शक्ति का स्वरूप

डॉ.शीतला प्रसाद पाण्डेय

''शक्ति'' शब्द 'शक्लृ शक्तौ' धातु क्तिन प्रत्यय कर सिद्ध होता है। अर्थात् कारणों में अपृथक सिद्ध रहने वाला कर्मोपयोगी धर्म ही 'शक्ति' है। केवल निर्विकार 'शिव' (ब्रह्म) ही सृष्टि का कारण नहीं है। केवल स्वतंत्र्याभाव युक्त 'शक्ति' भी जगत का कारण नहीं है क्योंकि 'शिव' और 'शक्ति' दोनों के समन्वित स्वरूप से ही जगत की उत्पत्ति होती है।

प्राचीन वैदिक दर्शन में 'शक्ति' का उल्लेख 'स्वधा' के रूप में है। 'स्वधा' ऋग्वेद का शब्द है। इसके कई अर्थ किये गये हैं – डॉ0 स्टेला क्रामरीश ने इसका अर्थ आन्तरिक 'शक्ति'[1] या आन्तरिक स्वभाव[2] बतलाया है। प्रोफेसर जे0 गोण्डा 'विशेष स्वभाव'[3] और डॉ0 एल0 रेन्यो ने स्वेच्छाशक्ति[4] अर्थ किया है। श्वेताश्वतर उपनिषद् में इसी का निरूपण आत्मशक्ति के रूप में किया गया है। स्वधा या आत्मशक्ति ही संसार की सृष्टि क्रिया में निमित्तोपादान है।[5]

द्वन्द्वातीत तथा निष्कल परात्पर सत्ता से प्रपंचात्मक जगत् की सृष्टि का होना तर्कसंगत न देखकर उसमें निहित एक शक्ति की परिकल्पना की गयी। अद्वैत वेदान्त में उसे 'अविद्या' तथा 'माया' कहा जाता है। वह जडात्मक है। जड शक्ति में पुनः उन्मेष की समस्या खड़ी होती है। अतः उसे चित् शक्ति माना गया है। चित् शक्ति चैतन्य स्वरूप ब्रह्म से भिन्न नहीं है। अभिप्राय यह है कि शिव में स्फुरित शक्ति ही प्रपंच रचने में समर्थ है।

शिवः शक्त्या युक्तो यदि भवतिः प्रभवितुं, न च देवो न खलु कुशलः स्पन्दितुमपि।।[6]

शक्ति के बिना शक्तिमान् अपनी अभिव्यक्ति में असमर्थ है। अर्थात् शक्ति रहित शिव–शव तुल्य हैं।

नैव शक्त्या बिना काश्चिच्छक्तिमानस्ति कारणम्।
न च शक्तिमता शक्तिर्विनैका व्यवतिष्ठते।।[7]

वैष्णवागमों में 'शक्ति' तत्व की सविशेष प्रतिष्ठा इसलिए हुई है कि इसके बिना वासुदेव या नारायण अभिव्यक्त नहीं होता। अधिकांश ग्रन्थों में नारायण या वासुदेव आश्रयरूप में बने रहते हैं। उनकी क्रिया 'शक्ति' से प्रवर्तित होकर अभिव्यक्त होती है। इसी शक्ति की प्रधानता के कारण ही वैष्णवागमों में

'शक्तितत्व' की मुख्यता हो जाती है।

वैष्णव आगम की प्रमुख शाखा वैखानस आगम के विमानार्चन कल्प नामक ग्रन्थ में महर्षि मरीचि ने 'श्री' (शक्ति) का निरूपण करते हुए यह कहा कि वह आदि– अन्त रहिता, नित्या, अव्यक्त रूपवाली, विष्णु संकल्परूपा, नित्यानन्दमयी, मूल प्रकृतिरूपा तथा शक्ति स्वरूपिणी है। वह परमात्मा में अव्यक्त रूप से निहित रहती है और उसकी इच्छा से विभिन्न रूपों में परिवर्तित हो जाती है। वह प्रकृति दो प्रकार की है – चेतना तथा अचेतना। अचेतना प्रकृति पंचभूत, मन, बुद्धि तथा अहंकार के साथ आठ प्रकार की होती है। यही अनेकता का आधायक तत्व है। चेतना जीवभूता है।

"सा च नित्या आद्यन्तरहिता अव्यक्तरूपिणी प्रमाणाप्रमाणसाधारणभूता विष्णोस्संकल्पानुरूपा नित्यानन्दमयी मूलप्रकृतिरूपा शक्तिः[8]।

सा प्रकृतिर्द्विधा भवति चेतनाचेतनेति अचेतना पंचभूतैर्मनोबुध्यहंकार रूपैरष्टध ा भिन्ना। अन्या जीवभूता चेतनेति[9]।

पांचरात्रागम की प्रमुख संहिता जयाख्यसंहिता में इन शक्तियों को लक्ष्मी, कीर्ति, जया तथा माया कहा गया है। ये अपने रूप में निष्कल तथा निराकार है। ये सदा नारायण के आश्रित रहती हैं, जैसे सूर्य में किरणें तथा समुद्र में तरंगे अविनाभाव से निहित रहती हैं, उसी प्रकार श्रीपति में नानारूप से प्रतिष्ठित कमला का निवास रहता है। इनका ज्ञान योगियों द्वारा भक्ति के माध्यम से प्राप्त किया जाता है।

लक्ष्मीः कीर्तिर्जया माया देव्यस्तस्याश्रितास्सदा। स्वशक्तिनिचयोपेता निराकारास्तु निष्कलाः।। सूर्यस्य रश्मयो सद्वदूर्गयश्चाम्बुधेरिव। सर्वैश्वर्यप्रभावेन कमला श्रीपतेस्तथा।। भवच्छक्तिभिस्सम्यगाभिर्योगविभागतः।[10]

सात्वतसंहिता में सर्वव्यापी परमात्मा का प्रथम शरीर अग्निषोमात्मक माना गया है। इसी कारण उसकी दो शक्तियाँ भी हैं – लक्ष्मी तथा पुष्टि। जो भौक्तृ है उसे लक्ष्मी कहा जाता है। दूसरी शक्ति पुष्टि है जिसे कर्तृशक्ति कहा गया है। लोकपर अनुकम्पा के कारण परमात्मा भोक्तृ शक्ति के साथ अवतीर्ण होता है और उसी की भक्ति से शक्ति तथा शक्तिमान् सन्तुष्ट होकर भोग तथा मोक्ष प्रदान करते हैं।

अग्निषोममयो देह आद्यो यः सर्वगस्य च।
तस्य शक्तिद्वयं तादृगमिश्रं भिन्न लक्षणम्।।
भोक्तृशक्तिः स्मृता लक्ष्मीः पुष्टिर्वै कर्त्तृसंज्ञिता।
भोगार्थभवतीर्णस्य तस्य लोकानुकम्पया।।
उदितं सह तेनैव शक्ति द्वितयमव्ययम्।।[11]

विष्णुसंहिता में इसी बात को अभिव्यक्त करने के लिए ऐसा माना गया है

कि इच्छा, ज्ञान तथा क्रिया के भेद से शक्तियाँ तीन तरह की हैं। इन्हीं से चर–अचर सम्पूर्ण संसार व्याप्त है। अपने को दो प्रकार से विभक्त करके परमात्मा क्रिया तथा ज्ञान का प्रवर्तन करता है। स्वतः इनके (शक्तियों के) वश में होते हुए भी स्वतन्त्र की भाँति कार्य करता है। क्रिया शक्ति दूसरे विष्णु तथा ज्ञान शक्ति दूसरे खगेश्वर हैं। इन्हीं को यज्ञ पुरुष कहा जाता है क्योंकि खग तप तथा छन्दोमय हैं। अव्यय पुरुष को ही इच्छा शक्ति कहा गया है।

इच्छाज्ञान क्रियाभेदात् तिस्त्रो वै तस्य शक्तयः।।
ओतं प्रोतं यया सर्वं दृश्यते सचराचरम्।
द्विधा विभज्य सात्मानं क्रियाज्ञानप्रवर्तनम्।।
प्रकरोति जगत् कृत्स्नं स्वतंत्रमिव तद्वशात्।
क्रियाशक्त्यापरो विष्णुः ज्ञानशक्त्याखगेश्वरः।।
तं यज्ञपुरुषं प्राहुस्तपच्छन्दोमयं खगम।
इच्छाशक्त्या तु विज्ञेयः पुरुषोयः परोऽव्ययः।।[12]

परमसंहिता में सृष्टि–प्रसंग में परमात्मा की पाँच शक्तियाँ बतायी गयी हैं। इन्हीं शक्तियों से देव परमव्योम आकाश में स्थित रहता है। ये पंचोपनिषदाख्य शक्तियाँ कहीं गई हैं। ये शक्तियाँ इस प्रकार हैं – (1) परमेष्ठी, (2) पुमान्, (3) विश्व, (5) निवृत्ति तथा (6) सर्वात्म। ये शक्तियाँ निम्नलिखित रूप से शब्दादि में स्थित कही गई हैं –

परमेष्ठी – शब्द में, पुरुष–स्पर्श में, विश्वात्म–तेजस् में, निवृत्ति–रस में तथा सर्वात्म–गन्ध में स्थित है। ये पंचात्मक शक्तियाँ सूक्ष्मरूप से व्यवस्थित कहीं गयी हैं – जो चित्र में स्पष्ट किया गया है – परमात्मा पाँच प्रकार का ज्ञान इन्हीं के माध्यम से प्राप्त करता है।



शक्तयः पंच विख्याताः परस्य परमात्मनः।
याभिरेव परोदेवः परमव्योम्नि तिष्ठति।।
परमेष्ठी पुमान् विश्वो निवृत्तिः सर्वसंज्ञितः।
शक्तयः पंचतस्योक्ताः पंचोपनिषदाख्यया।।
पंचशक्तिमयो देवः परमात्मा जगत्प्रभुः।
पंचेन्द्रियसमायोगः पंचधा ज्ञानमश्नुते।।

परमेष्ठी स्मृतश्शब्दे स्पर्शेतु पुरुष स्मृतः।
पंच (विश्वा)त्मातेजसि प्रोक्तो निवृत्ता (त्या) त्मा रसे स्मृतः।।
सर्वात्मा कथितो गन्धे विषयो (यी) पुरुषः परः।
पंचात्मानः स्मृता ह्येते सूक्ष्मरूपा व्यवस्थिताः।।[13]

नारदीयसंहिता ने भी इन शक्तियों का निर्देश किया है।

परमेष्ठी पुमान् विश्वो निवृत्तिः सर्वसंज्ञितः।
पंचैताः शक्तयः प्रोक्ताः परस्य परमात्मनः।।
पंचभिः शक्तिभिस्तस्य विग्रहं परमात्मनः।।[14]

परमसंहिता में ये शक्तियाँ सांसारिक विषयों से अतीत, सनातन तथा योगगम्य बताई गई हैं। यह सूक्ष्म शरीर मुक्ति का कारण कहा गया है। प्रकृति के योग से अर्थात् सत्व, रज तथा तम नामक तीन गुणों से युक्त होकर ये शक्तियाँ पंचदश हो जाती हैं। समास–रूप से गुणयोनि पाँच–पाँच शक्तियाँ कही गयी हैं। सत्वगुण के कारण–ज्येष्ठा, विद्या, कान्ति, शान्ति तथा ऋद्धा–ये निर्मला कही गयी हैं।

रजोगुण के कारण – बागीश्वरी, क्रिया, कीर्त्ति, लक्ष्मी तथा सृष्टि–ये सामला कही गयी हैं।

तमोगुण के कारण–मोहिनी, अविद्या, तमोवती, मृत्यु तथा माया– ये मालिनी कही गयी हैं।

तीनों गुणों के लक्षण इस प्रकार कहे गये हैं – सत्वगुण–प्रकाशक, रजोगुण–क्रियात्मक तथा तमोगुण–आवरणात्मक है। इन गुणों के संसर्ग और व्यतिरेक से ही यह स्थावर – जंगम जगत् विविध वैचित्र्य को प्राप्त करता है।

संसार विषयातीता योगगम्या सनातनाः।
एतत्सूक्ष्म शरीरं तु कथितं मुक्तिकारणम्।
तेन तु प्रकृतेर्योगात् ज्ञाताः पंचदश क्रमात्।
पंच पंच समासेन शक्तयोगुण योनयः।।
ज्येष्ठा विद्या च कान्तिश्च शान्तिः श्रद्धाच पंचमी।
निर्मलाश्शक्तयः पंच जाताः सत्वस्य कारणम।।
वागीश्वरी क्रिया कीतिलक्ष्मीः सृष्टिश्च पंचमी।
साजान (सामला ?) किंचिदेवैका (ता ?) रजसः कारणं मतम्।।
मोहिनी प्रथमा चासामविद्याऽथ तमोवती।
मृत्युर्माया च मलिना योनयस्तमसस्त्विमाः।।
तत्र प्रकाशकं सत्वं रजो विद्धि क्रियात्मकम्।
तमस्त्वावरणं ज्ञेयमित्यते द्गुणलक्षणम्।।
एभिरेवगुणैरतं जगत् स्थावरजङ्गमम्।
वैचित्र्यं विविध संसर्गव्यतिरेकतः।।[15]

लक्ष्मीतन्त्र में लक्ष्मी अपने (शक्ति) के विषय में इस प्रकार कहती हैं – "मैं उसकी परमशक्ति, अहंता, सनातन और निर्विकार हूँ। सिसृक्षा मेरी क्रिया है। मैं अपनी स्वतंत्रशक्ति से दो भागों में विभक्त होकर अपने अत्यन्त स्वल्प अंश से सारे विश्व की रचना करती हूँ। मैं दो प्रकार के भूतों में अपने को उत्पन्न करती हूँ– चेत्यम् और अचेतन। मेरी चिच्छशक्ति दोनों को प्रकाशित करने वाली है। संवित रूप ही मेरा ज्ञान रूप है। और यही घनीभूत होकर जड़त्व को प्राप्त करता है। वह शुद्ध, स्वतन्त्र और पूर्ण है। योग द्वारा ईख के रस के समान घनीभूत हो जाता है। इससे चेत्य, चित्व हो जाता है। जिस प्रकार ईंधन आग से मिलकर अग्निमय हो जाता है, उसी प्रकार चेत्य संवित् से मिलकर चिन्मय हो जाता है। चित् उपाधियों से मुक्त होकर नानात्म को प्राप्त करता है। चेत्य ही अचेतना को प्राप्त होता है। वही घनीभूत होता है जैसे–जल बर्फ के रूप में घनीभूत होता है। अतः वर्फ जल का परिणाम होते हुए भी जल अपना स्वभाव नहीं छोड़ता। सृष्टि का यही परिणामवाद वैष्णवागमों को अभीष्ट है। स्वच्छ तथा स्वच्छन्द संवित् ही शक्ति का स्वरूप है।

सुखं सदैक रूपं तु पाड्गुण्यमजरामरम्।
तस्याहं परमाशक्तिरहंता शाश्वती ध्रुवा।।
व्यापारशक्तिरेषा में सिसृक्षालक्षणा भवेत्।
अयुतायुत कोट्योधकोटिकोट्ययुतांशतः।।
साहं सृजामि स्वाच्छन्द्याद् द्विधा भेदमुपेयुषी।
चेत्यचेतनभावेन चिच्छक्तिश्चेतनोऽनयोः।।
चेत्य चेतनतां प्राप्त संविदेव मदात्मिका।
संविदेव हि में रूपं स्वच्छ स्वच्छन्दनिर्भरा।।
सा त्विक्षुरसवद्योगात्त् स्त्यानतां प्रतिपद्यते।
अतो निरूप्यमाणं तच्चेत्यं चित्वमुपेष्यति।।
यथा हि वह्निना लीढमिन्धनं तन्मयं भवेत्।
एवं चिता समालीढं चेत्यं चिन्मयतां ब्रजेत्।।
नीले पीते सुखे दुःखे चित्तस्वरूपमखण्डितम्।
विशिनष्टि विकल्पस्तच्चित्रयोपाधिसंपदा।।[16]

परमात्मा, शक्ति और जीवात्मा का सम्बन्ध लक्ष्मीतन्त्र में इस प्रकार बतलाया गया है – वह सब भूतों का आत्मा है, मैं सब भूतों की सनातनी अहंता हूँ। चाहे जिस भाव से सनातन वासुदेव को पुकारा जाय, वह भाव मै ही हूँ। इसीलिए परमध्येय ब्रह्म भवद्भाव स्वभाव वाला है। भगवान् नारायण भवत् हैं। मैं महालक्ष्मी भाव हूँ। इसीलिए ब्रह्म लक्ष्मीनारायण कहलाता है। अहंता से आच्छादित होने पर ही अहंकार की पहचान होती है। अहंता 'मैं' पदवाच्य है। यह जानना

चाहिए कि अविनाभाव और समन्वय के कारण मुझमें और भगवान् में अन्योन्याश्रयता रूप तादात्म्य सम्बन्ध है। अहंता के बिना अहंकार का वर्णन और पहचान नहीं हो सकता। अहंता भी अहंकार के बिना निराधार है। संस्थ (समन्वय) और व्यस्था (विश्लेषण) के रूप में दृश्य भवद्भाव (ब्रह्म और सारा विश्व) परोक्ष और अपरोक्ष करके जाना जाता है।

आत्मा स सर्वभूतानामहंभूतो हरिः स्मृतः।
अहंता सर्वभूतानामहास्मि सनातनी।
येन भावेन भवति वासुदेवः सनातनः।
भवतस्तस्य देवस्य स भावोऽहमितीरिता।।
भवद्भावात्मकं ब्रह्म ततस्तच्छाश्वतं पदम्।
भवन्नारायणो देवो भावोलक्ष्मीरहं पर।।
लक्ष्मीनारायणाख्यातमतो ब्रह्म सनातनम्।
अहंतया समाक्रान्तो ह्यहमर्थः प्रसिध्यति।।
अहमर्थसमुत्था च साहंता परिकीर्तिता।
अन्योन्येनाविनाभावादन्योन्येन समन्वयात्।।
तदात्म्यं विद्धि सम्बन्धं मम नाथस्य चोभयो।
अहंतया विनाहं हि निरूपाख्यो न सिध्यति।।
अहमर्थं विनाहंता निराधारा न सिध्यति।
भवद्भावात्मकं रूपं समस्तव्यस्तगोचरम्।।
परोक्षमपरोक्षं च जगति प्रविचिन्त्यते।[17]

लक्ष्मीतन्त्र में लक्ष्मी सृष्टि का वर्णन इस प्रकार करती हैं – जब ब्रह्म सोता है तो मैं परमेश्वरी अहंता भी सोती रहती हूँ और समस्त विश्व को अपने गर्भ में धारण करती हूँ। सागर के ऊपर चन्द्रोदय के समान उसका उन्मेष (आंख खोलना) मैं ही हूँ। सिसृक्षा युक्त नारायणी शक्ति मैं ही हूँ। ऐश्वर्य एवं सिसृक्षा मुझमें ही विकसित होती है। सृष्टि, स्थिति, संहृति, तिरोभाव और अनुग्रह पंचकर्म मैं करती हूँ। दूध से जब दही बनता है तो दूध अपना स्वभाव छोड़ देता है, परन्तु जब मैं विश्व के रूप में प्रकट होती हूँ तो इस प्रकार का परिवर्तन मुझमें उत्पन्न नहीं होता। यही मेरा वीर्य है, इसी को विक्रम भी कहते हैं। मैं अपनी स्वेच्छा से सारे संसार का सर्जन करती हूँ। मुझमें जगत् उसी प्रकार प्रतिबिम्बित होता है जिस प्रकार पक्षी जल में। मुझमें ही सारा संसार चमकता है जैसे –दर्पण में पर्वत। जगत् मुझमें स्थित रहता है पर मैं जगत् में स्थित होते हुए भी उससे परे स्थित रहती हूँ।

निरूनोषे निरून्मेषा साहंता परमेश्वरी।
क्रोडीकृत्याखिलं सर्वं ब्रह्मणि व्यवतिष्ठते।

उन्मेषस्तस्य यो नाम यथा चन्द्रोदयेऽम्बुधेः।।
अहं नारायणी शक्तिः सिसृक्षालक्षणा तदा।
निगेपस्तस्य यो नाम संहृतौ परमात्मनः।।
अहं नारायणी शक्ति सुषुप्सालक्षणा हि सा।
सिसृक्षाया ममोद्यन्त्या देवाल्लक्ष्मीपतेः स्वयम्।।
अव्याह तम संकोचमैश्वर्यं प्रविजृम्भते।।[18]
तस्या मे पंच कर्माणि नित्यानि त्रिदशेश्वर।
तिरोभावस्तथा सृष्टिः स्थितिः संहृतिरेव न।
अनुग्रह इति प्रोक्तं मदीयं कर्मपंचकम्।[19]
विकार विरहो वीर्यं प्रकृतित्वेपि में सदा।
स्वभावं हि जहात्याशु पयो दधिसमुद्भवे।।
जगद्भावेऽपि सा नास्ति विकृतिर्मम नित्यदा।
विकार विरहो वीर्यमतस्तत्वविदां मतम्।।
विक्रमः कथितो वीर्यमैश्वर्यांशः स तु स्मृतः।
सहकार्यनपेक्षा में सर्वकार्यविधौ हिमा।।[20]
मयि लोकाः स्फुरन्त्येते जलेः शकुनयो यथा।
असिमन्नपि जगद्भाति दर्पणोदरशैलवत्।।[21]

पाद्मसंहिता के ज्ञानपाद में यह प्रतिपादित है कि परमात्मा का) विध स्वभाव ही प्रकृति और विकृति है। सत्व और अन्य गुणों का सामंजस्य ..कृति और पुरुष के कारण विकृति होती है। प्रकृति त्रिगुणात्मिका है। उसी में व्यक्तिगत चैतन्य स्थित है और वहीं सारी सृष्टि को उत्पन्न करती है और परमात्मा की आज्ञा से सबको धारण करती है।

प्रकृतिविकृतिश्चोभे स्वरूपे परमात्मनः।
सत्वादिगुणसङ्घातः प्रकृतिविकृतिः पुनः।।
पुरुषाः परमात्माख्यः तेनेयं त्रिगुणात्मिका।
अधिष्ठिता जगत्सर्वं प्रसूते चेतनात्मकम्।।
संहरत्यपि तत्सर्वं बियोगादेव तस्य सा।
एक एव परो देवो नानाशक्ति समन्वितः।।
करोति सर्गसंहारौ स च नारायणः स्मृतः।[22]

अहिर्बुध्न्यसंहिता में कहा गया है कि शक्ति भगवान की आत्मभूता है। वह उनके स्वरूप से अभिन्न है। शक्तियाँ अचिन्त्य तथा परमेश्वराश्रित है। स्वरूप से उनका दर्शन नहीं होता किन्तु वे कार्यानुमेय है। वे सदा सूक्ष्मावस्था में रहती है, तथा सभी भावों का अनुगमन करती हैं। उनका इदमित्थं विधान तथा निषेध दोनों ही असम्भव है।

शक्तयः सर्वभावानामचिन्त्या अपृथक्स्थिताः।
स्वरूपे नैव दृश्यन्ते दृश्यन्ते कार्यतस्तुताः।।
सूक्ष्मावस्था हि सा तेषा सर्वभावानुगामिनी।
इदंतया विधातुं सा न निषेद्धुं च शक्यते।।[23]

दोनों के अनेक नाम है – यथा – आनन्दा, स्वतन्त्रा, श्री, पद्मा, कमला, कुण्डलिनी, अनाहता, गौरी, गायत्री, शिवा, तारा तथा रति आदि शक्ति के नाम है।[24] इसी प्रकार परमात्मा, भगवान्, वासुदेव, अनन्त, प्रणव, हिरण्यगर्भ, शिव, विष्णु तथा नारायण आदि परमात्मा के नाम हैं।[25] विष्णु पुराण में तो प्रत्येक पुरुष को 'विष्णु' तथा प्रत्येक स्त्री को 'श्री' माना गया है।

देवतिर्यङ्नुव्यादौ पुन्नाभा भगवान्हरिः।
स्त्रीनाम्नी श्रीश्च विज्ञेया नानयोविद्य ते परम।।[26]

इस प्रकार नारायणी महालक्ष्मी की समता सांख्य की प्रकृति से नहीं हो सकती, क्योंकि यह पुरुष से भिन्न नहीं है, बल्कि वह परमपुरुष की अहंता है और उससे अभिन्न है। इसकी ठीक–ठीक समता तो गीता की आत्ममाया, योगमाया अथवा वेदान्त सूत्र की मायाशक्ति से ही बैठती है। यह नारायण से अभिन्न होती हुई भी अपनी विलक्षण प्रतिभा से सृष्टि का निर्माण करती है। नारायण लक्ष्मी या शक्ति –शक्तिमान के ऐक्य का उल्लेख करते हुए भी वैष्णवागम मायावाद या अविद्यावाद का प्रबल विरोध करता है। क्योंकि वह उसके अनुसार इसे चित् शक्ति मानता है। जगत् असत् अथवा मिथ्या नहीं है अपितु सत् परमतत्व से उत्पन्न होने के कारण सत्य है। संक्षेप में वैष्णवागमों में शक्ति का यही स्वरूप है।

सन्दर्भ

1. टू इट्स सिग्निफिकेन्स इन द ऋग्वेद,
अमेरिकन ओरिएण्टल सिरीज, वा0 47, पृ0 112।
2. तत्रैव, पृ0 115।
3. दी कासमोगानी आन ऋग्वेद,10,129, पृ0 692।
4. हाइम्स स्पेचुलेटीफिंक्स ह्यू वेदा, पेरिस,
1956, पृ0 126।
5. ऋग्वेद 10, 90।
6. सौन्दर्यलहरी, 1 ए।
7. अहिर्बुध्न्यसंहिता 6/3
8. विमानार्चनकल्प, 483–84।
9. विमानार्चनकल्प, पृ0 494
10. जयाख्यसंहिता – 6/77–78, 84 ए।
11. सात्वतसंहिता – 13/48–50
12. विष्णुसंहिता – 3/68, 70–72।

13. परमसंहिता – 2/29–33।
14. नारदीयसंहिता 5/88–89।
15. परमसंहिता 2/34–40
16. लक्ष्मीतन्त्र – 14/2–8।
17. लक्ष्मीतन्त्र 2/13–20
18. " 2/20बी–24ए
19. लक्ष्मीतन्त्र 12/13–14ए
20. लक्ष्मीतन्त्र 2/31–33
21. लक्ष्मीतन्त्र 13/23बी, 24बी
23. अहि० सं० 3/2–3।
24. अहि० सं० 3/7–24।
25. अहि० सं० 2/26–40।
26. विष्णुपुराण–1,8,35।

प्राकृतोत्पातविचारः

श्री सुरेन्द्र पाण्डेय

यथा भित्वा मचुराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि स्थितम्।।

अखिल ब्राह्मण्ड को प्रकाशित करने वाले कालचक्र के निर्माता स्वयं भगवान भास्कर ही जिस शास्त्र का उपदेश किये हो, उस शास्त्र पर प्रकाश डालना या उस शास्त्र को अपनी उपलब्धियों से संयुक्त करना असङ्गत सा प्रतीत होता है। हमें ज्योतिषशास्त्र में संशोधन या संवर्धन की आवश्यकता नहीं है। अपितु आत्मासमीक्ष की आवश्यकता है। ज्योतिषशास्त्र को हमने कहॉ तक समझा है। यह तो अगाध समुद्र हैं जितनी वार इस शास्त्र पारावार में हम गोता लगाते है उतनी ही बार हमें नवीनताऐं उपलब्ध होती है। हमें आधुनिक मान्यताओं के पीछे नहीं भागना है। हमारा अभिप्राय यह भी नहीं कि हम आधुनिक अनु–सन्धानों की ओर दृष्टिपात भी न करें। आशय यह है कि आधुनिकता की चकाचौंध में अपने मूल सिद्धान्तों को न खो बैठें।

ज्योतिष शास्त्र एकँ सम्पूर्ण विज्ञान है जिसके द्वारा न केवल मानव शरीर की आभ्यन्तर एवं बाह्य स्थिति का ज्ञान किया जा सकता है। अपितु इसके माध्यम से भूगर्भ का भी ज्ञान किया जा सकता है। ऋतुविज्ञान एवं जीवविज्ञान भी इस का प्रमुख विषय है। इतना हि नहीं भारत की प्राचीन मूर्तिकला एवं स्थापत्यकला के मूल में भी ज्योतिष शास्त्र का प्रमुख योगदान रहा है। ज्योतिष मानवजीवन का अध्ययन करने वाला प्राचीनतम शास्त्र है। ज्योतिषशास्त्र का आधार विध्यात्मक है। इसके मूल में कुछ वास्तविक प्राकृतिक तथा होते है, जिनके सामानान्तर घटनाओं की सम्भावनाओं को मानव जीवन में आरोपित किया जाता है। दूसरे शब्दों में प्रकृति जगत में घटित आकाशीय या सौरमण्डलीय प्रक्रियाओं की गवेषणा, व्याख्या तथा मानव जीवन में उनके अनुयोग से ही ज्योतिष शास्त्र निर्मित है। इस प्रकार ज्योतिष बौद्धिक एवं व्यवस्थित ढंग से मानव के क्रियाओं का विश्लेषण करता है। ज्योतिष के चिर नवीनता का आधार हम इसके द्वारा अध्ययन किये जाने वाले अथवा तथ्य रूप में संग्रहीत कुछ प्राकृतिक हलचलों के सूक्ष्म अध्ययनों को ही पाते है। नक्षत्रों की गति उनकी स्थिति एवं शक्ति का जैसा प्रामाणिक एवं विस्तृत अध्ययन ज्योतिष शास्त्रियों ने

संकलित किया है। वैसा अन्य किसी शास्त्र में नहीं प्राप्त होता। नक्षत्र ज्ञान की उपलब्धि मात्र करना ही ज्योतिष का मूल उद्देश्य नहीं है। सच तो नक्षत्र ज्ञान का मानव जीवन में उपयोग करना ही ज्योतिष का मूल उद्देश्य है।

प्राकृतोत्पातों के विषय में हमें अनेकों स्थलों पर विविध प्रमाण एवं लक्षण प्राप्त होते है। महर्षि गर्ग ने प्राकृतोत्पातों का लक्षण तीन प्रकार से लिखते हुए उद्धृत किया है। यथा –

यः प्रकृतिविपर्यासः सर्वः सङंक्षेपतः स उत्पातः।
क्षितिगगन दिव्यजातो यथोतरं गुरूतरो भवति।

आचार्य वराहमिहिर ने भी अपने ग्रन्थ वृहतसंहिता में प्राकृतोत्पातों का लक्षण दर्शाते हुए लिखा है कि मनुष्य के अविनय से पाप इकट्ठे होते है और उन पापों से उपद्रव होते हैं ये उपद्रव दिव्य, अन्तरिक्ष और भौम उत्पात के नाम से सूचित होते है। यथा –

अपचारेण नराणामुपसर्गः पाप संचयाद्भवति।
संसूचयन्ति दिव्यान्तरिक्षभौमास्त उत्पाताः।।

साथ ही साथ आचार्य मिहिर ने दिव्य, अन्तरिक्ष एवं भौम उत्पातों को पृथक–पृथक लक्षण दर्शाते हुए लिखा है। यथा –

दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्धात् पवन परिवेषाः।
गन्धर्वपुरपुरन्दरचावादि यदान्तरिक्षं तत्।।
भौमं चरस्थिरभवं तच्छान्तिभिराहतं भममुपैति।
नामसमुपैति मृदुतां भाम्यति नो दिव्यमित्येके ।।

सूर्य आदि ग्रह और नक्षत्रों के विकार चुत होने का नाम दिव्य उत्पात है। उल्का, निर्धात्, विकार चुत वायु, सूर्य–चन्द्र का परिवेष, गन्धर्वनगर, इन्द्रधनुष आदि से हुए उत्पातों का नाम अन्तरिक्ष है। चलायमान वस्तु के स्थिर और स्थिर वस्तु के चलायमान होने का भौम उत्पात नाम है।

वराहमिहिर ने लिखा है कि –

शान्ति कराने से इन तीनों उत्पातों का प्रभाव नष्ट हो जाता है। वृद्ध गर्ग ने भी भूमि कम्पन का फल निम्न प्रकार से दर्शाया है। कि यथा –

प्रजा धर्मप्ता यत्र तत्र कम्पं शुभं वदेत्।
जनानां श्रेयसे नित्यं विसृजन्ति सुरोतमाः।
विपरीतस्थिता यत्र जनास्तत्राशुभं तथा।
विसृजन्ति प्रजानां तु दुःखभोगाभिवृद्धये।।

आचार्य वराहमिहिर ने वृहत् संहिता के उत्पाताध्याय में अनेकों प्रकार से प्राकृतोत्पात होने का लक्षण दर्शाया है और साथ हि साथ उसकी शान्ति भी लिखी है। वे निम्नलिखित है।

लिङ्गवैकृत उत्पात –

अनिमितभङ्गचलन स्वेदाश्रुनिपात जल्पनाद्यानि।
लिङ्गाचयितनानां नाशाय नरेभ देभानाम्।।

शिवलिङ्ग देवमूर्क्ति और देवस्थानों का विना कारण फटना, कम्पन होना, उनमें पसीना होना, उनका रोना, उनमें शब्द होना, इत्यादि राजा और देश के लिए कष्टकारक है।

अग्निवैकृत उत्पात –

राष्ट्रे यस्थानग्नि प्रदीप्यते च नेन्धनवान्।
मनुजेष्वररस्थ पीडा तस्थ च राष्ट्रस्य विज्ञेया।

जिस राज्य में विना अग्नि की ज्वाला दिखाई दे और काष्ठचुत अग्नि प्रज्वलित न होतो राजा और राज्य दोनों के लिए हानिकारक है।

वृक्ष वैकृत उत्पात –

राष्ट्रविचेदरस्त्वनृतौ बालबधोऽतीव कुसुमिते बाले।
वृक्षात् क्षीरस्रावे सर्वद्रव्यं क्षयो भवति।।

ऋतु वर्जित काल में वृक्षों में पुष्प और फलों की उत्पति दोने से राज्य में विनोद और छोटे वृक्ष में बहुत पुष्प आने से बालको का नाश एवं वृक्षों से दूध निकलने पर द्रव्यों का लाश होता है।

सस्य वैकृत उत्पात –

अतिवृद्धि सस्थानां नानाफलकुसुम सम्भवों वृक्षे।
भवति हि यद्येकस्मिन परचक्रस्थागमों नियमात।।

यदि धान्यों को अधिक वृद्धि तथा एक वृक्ष में अनेक प्रकार के फल और पुष्पों की उत्पति हो तो निश्चय ही चक्र का आगम होता है।

वृष्टि वैकृत उत्पात –

दूर्भिक्षमनावृष्टावतिवृष्टौ क्षुद्भयं परभयं च
रोगो ह्यनृतुभवायां नृपतिबधोऽनभ्रजातायाम्।।

अनावृष्टि हो तो दुर्भिक्ष, अतिवृष्टि होतो दूर्भिक्ष तथा शत्रु भय, वर्षा ऋतु से भिन्न ऋतु में वृष्टि हो तो रोग और विना मेघ की वृष्टि हो तो राज्य ओर नृप के लिए कष्टदायक है।

जल वैकृत उत्पात –

अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरूते।
शोषश्चामोष्याणामन्येषां वा ह्रदादीनाम्।।

नगर के महल या पास (नजदीक) में बहती हुई नदियॉ दूर चली जाय या नहीं सुखने वाले ह्रद आदि सुख जाय तो शीघ्र प्राणियों से शूना नगर हो जाता है।

आचार्य मिहिर ने इसके अनन्तर अनेकों प्रकार से प्राकृतोत्पात होने का लक्षण बताया है। जैसे प्रसव वैकृत उत्पात चतुस्पदवैकृतउत्पात, वापव्य वैकृत उत्पात, मृगपक्ष्यादि वैकृत उत्पात, शक्रध्वजचन्द्रकीलकादि वैकृत उत्पात, ऋतु सम्बन्धी उत्पात, इत्यादि अनेक लक्षण कहा है। महर्षि गर्ग ने इन उत्पातों का फल मनुष्य आठ प्रकार से पाता है। लिखते हुए उधृत किया है।

पुरे जनपदे कोशे वाहनेऽय पुरोहिते।
पुत्रेस्वात्मनि भृत्पेषु पश्चते दैवमष्टधा।।

इस प्राकृतोत्पातों के शान्ति के विषय में गर्ग प्रभृतादि अनेकों आचार्यो ने लिखा है। कि यज्ञ, हवन, देवपूजन, गौदान, ब्राह्मणों का पूजन इत्यादि करने से इन उत्पातो का गमन हो सकता है। पूर्वोक्त जो लक्षण बताये गए हैं जैसे जलावैकृत उत्पात, तो उनके लक्षणा को देखकर हम भविष्य में आने वाले उत्पातों का पूर्वानुमान कर उससे अपनी तथा राष्ट्र की रक्षा करने का उपाय कर सकते हैं। तीनों उत्पातों के गमन हेतु आचार्य मिहिर ने लिखा है कि—

दिप्यमपि मममुपैति प्रभूतकनकान्नगोमहीदानैः।
रूद्रायतने भूमौ गोदोहात् कोटिंहोमाच्च।।

जयति विबुधवन्द्या भारती भारतीया,
जयति विबुधवन्द्यो जानकीशोऽवधेशः ।।
जयति जयति विष्वक्काशिका विश्वनाथः,
जयति जयति हिन्दूविश्वविद्यालयोऽयम् ।।

रक्षा होवै धर्म की, बढ़ै जाति का मान ।
देशपूर्ण गौरव लहै, जय भारत संतान ।।
अंश उसी के जीव हैं , करौ उसी से नेह ।
सदा रहौ दृढ धर्म चिर, बसौ निरामय देह ।।

पं. मदनमोहनमालवीयः

संस्कृतविद्याधर्मविज्ञानसङ्कायस्य प्रकाशनानुभागेन प्रकाशिता ग्रन्थाः

१. विज्ञानामृतभाष्यम् - पं. केदारनाथत्रिपाठी
२. दत्तकमीमांसा - प्रो. राजेन्द्रप्रसादपाण्डेयः
३. काव्यप्रकाशः - प्रो. रेवाप्रसादद्विवेदी
४. शुक्लयजुर्वेदप्रातिशाख्यम् - पं. जगन्नाथत्रिपाठी
५. प्रौढमनोरमा - प्रो. सीतारामशास्त्री
६. कालिदासग्रन्थावली - प्रो. रेवाप्रसादद्विवेदी
७. प्राच्यविद्या (शोधपत्रिका) - प्रो० राजमोहन उपाध्यायः
८. संस्कृतविद्या (शोधपत्रिका) - प्रो० रेवाप्रसादद्विवेदी
९. संस्कृतविद्या (शोधपत्रिका) - प्रो. सुधांशुशेखरशास्त्री
१०. संस्कृतविद्या (शोधपत्रिका) - प्रो. एन्.आर्. श्रीनिवासन्
(संस्कृतवर्षविशेषाङ्कः)

पदकं पुरस्कारश्च

महामनस्संस्कृतपुरस्कारः

श्रीशैलेशतिवारी व्याकरणस्य शोधच्छात्रः २००२ वर्षस्य गणतन्त्रदिवसे 'संस्कृतं सर्वभाषोपजीव्यमि'तिविषये श्रेष्ठनिबन्धलेखननिमित्तं माननीयकुलपतिना प्रो. वाई.सी. सिह्माद्रिमहोदयेन २०००-०१ सत्रस्य महामनस्संकृतपुरस्कारेण स्वर्णपदकेन च पुरस्कृतः ।

श्री एस्० वेङ्कटेशताताचार्यः मीमांसाविषये शास्त्रिद्वितीयकक्षाध्यायी २००३ तम वर्षस्य गणतन्त्रदिवसे "शास्त्राणां जीवनोपयोगित्व'मिति विषये श्रेष्ठनिबन्धलेखननिमित्तं माननीयकुलपतिन प्रो. रामचन्द्रावमहोदयेन २००१-०२ सत्रस्य महामनस्संस्कृतपुरस्कारेण स्वर्णपदकेन च पुरस्कृतः ।

वेदपण्डित पुरस्कारः

श्री एस्० वेङ्कटेशताताचार्यः मीमांसाविषयस्य शास्त्रिद्वितीयवर्षीयश्छात्रः उत्तरप्रदेशसंस्कृतसंस्थानेन पञ्चविंशतिसहस्ररूप्यकात्मकेन (रू. २५,०००.००)२००० वर्षस्य वेदपण्डितपुरस्कारेण सम्मानितः ।